...ा हि ज्ञानेन सदृशम् ॥

प्रबन्ध पारिजातः

श्री चामराजेन्द्र संस्कृत महापाठशाला विद्यार्थिनिलयः
चामराजपेट, ३ वीथी
बेंगळूरु-२

यस्यां भाषायां प्रचलितविषयाः तत्तत्कालिकाः नैव प्रतिफलन्ति अथवा न विव्रियन्ते, तादृशी भाषा व्यवह्रियमाणासु भाषासु न परिगणयितुं शक्यते । बहुभिः विमर्शकैः संस्कृतभाषामधिकृत्य अयमपि दोषः आरोपितः श्रूयते । संस्कृतभाषा भारतीयानां परस्सहस्रवर्षेभ्यः ऐक्यविधायिनी सांस्कृतिकी भाषा चकास्ति । इदानीं संस्कृतभाषायां महापुरुषाणां भावनाप्रवाहः काल प्रवाहेण सह यया रीत्या प्रावहदिति निरूपणाय विभिन्नविषयानालम्ब्य त्रयस्त्रिंशद्व्यासात्मकः प्रबन्ध-पारिजातः प्राकाशि ।

एस्. शङ्करप्प, एम्.ए.,बी.टि.,
महापाठशालाध्यक्षः

डा. वीरराघवाचार्यः,
विशिष्टाद्वैत प्राध्यापकः,
निलयवीक्षकश्च.

॥ न हि ज्ञानेन सदृशम् ॥

प्र ब न्ध पा रि जा तः

❀

श्री चामराजेन्द्र संस्कृत महापाठशाला विद्यार्थिनिलयः
चामराजपेट, ३ वीथी
बेंगलूरु–२

प्रथम मुद्रणम् — १९५८

विलम्बि वत्सर

चैत्र शुद्ध नवमि

Price : Rupee One.

मूल्यम्—एकरौप्यकम्

— मुद्रकः —

साधना छापखाना

६६/१, ५ वीथी, गान्धीनगरम्

बेंगळूरु-९

सम्पादकीयम्

हेविलम्बि हायने श्री चामराजेन्द्र संस्कृत महापाठशालायाः विद्यार्थिनिलये विद्यार्थिनां कार्यक्रमः बहुमुखः प्रावर्तत । तेषु संस्कृतभाषायां लघूपन्यासाः स्पृहणीया आसन् । तान् विद्यार्थिनामुपकाराय पण्डितानामवगाहनाय च उपहारीकर्तुं कतिपयोपन्यासानां मुद्रणं प्रकाशनं च आवश्यकमिति विद्यार्थिनः निरणैषुः । इमं विषयं अध्यक्षाय श्री एस्. शङ्करप्प, M.A.,B.T., महोदयाय न्यवेदयन् । सोऽपि उत्साहेन सहयोगमाततान । एतेषां सर्वेषां परिश्रमफलभूताः त्रयस्त्रिंशत् प्रबन्धाः इदानीं विभिन्नविषयानधिकृत्य लिखिताः तत्र भवद्भ्यो गुणपक्षपातिभ्यः समर्पयितुं मोदामहे ।

प्रकाशने किञ्चिदिव क्लेशश्चान्वभावि । दीर्घाणां व्यासानां संग्रहणे तथा भाषान्तरीकरणे च यावच्छक्यं मूलरूपमेव रक्षितं प्रतिफलितं च । भिन्नकर्तृकाणां व्यासानां संयोजने क्वचिदभिप्रायाणां तथैव प्रयोगाणां च पुनरुक्तिः दृश्यते, पुनरुक्तयः अस्मिन् प्रयत्ने स्वाभाविका इति विमृश्य यथान्यासमेव अमुद्रयाम । बालानां सुखबोधाय सन्धयः सर्वत्र नैव संयोजिताः । पदविभागक्रमश्च तत्र तत्र आदृतः वर्तते । सहृदयाः इमानुपन्यासान्परिशीलयेयुरिति विश्वसिमः ।

डा. वीरराघवाचार्यः
संपादकः
वै. नारायण शर्मा
जे. वि. सत्यनारायण शर्मा
उप-संपादकौ

अ ग्र ले ख न म्

संस्कृतभाषा देवभाषा इति प्रवदन्ति । पुरा अस्याः प्रभावः महीयान् मानवसमाजे अवर्ततेति संभाव्यते । सर्वे गिरयः पर्वताः नद्यः पुण्यक्षेत्राणि च संस्कृतभाषानामभिः व्यवह्रियन्ते । बहूनां मनुष्याणां नामानोऽपि संस्कृत-भाषायामेव जानन् अजानन्वा व्यवहरामः । भारतीयदेशभाषाः त्रिंशत्संख्या-मारभ्य अशीति पर्यन्तं पदानां संपदं संस्कृतभाषायाः स्वशरीरे सात्मीकृत्य व्यवहार गोचरी भवन्ति । परश्शत वर्षेभ्यः इयं संस्कृतभाषा भारतीयानां जनानां, मनोभावनायाः ऐक्य विधायिनी रराज । इदानीं अस्य न्यक्कारेण अथवा देशभाषा पक्षपातेन पूर्वापरं अनालोचयतां नेतॄणां व्यवहारेण च आसेतु शीताचलं प्रतिष्ठितमैक्यं कम्पते । अतः दूरदर्शिनः देशस्य ऐक्यं चिरकाला-त्प्रतिष्ठितं संरक्षयेयुः यस्मात् भारतीयाः वरिष्ठाभवेयुः, वैदिक विज्ञानेन नैतिकबलेन च गरिष्ठा भवेयुः, वार्तया–वैज्ञानिकाविष्करणैः सैन्य व्यवस्थया सर्वस्य मूलभूतया संस्कृत्या च बलिष्ठा भवेयुः । सर्वेषां शुभयोगानां आधारभूतां गैर्वाणीं अप्रमत्ता उपासेयुश्च ।

बहोः कालात् इयं जिज्ञासा मे मनसि अवर्तत । किं संस्कृत वाङ्मये वर्तमानकाले प्रचलिताः राजकीय–वैज्ञानिकादि विषयाः नैवप्रतिफलन्ति ? अथवा वेदैः पुराणैश्च तस्याः सर्वाङ्गीण सौन्दर्यस्य उपचयः अवसित प्रायो वा ? इति अद्यत्वे वैज्ञानिक आविष्करणानि आर्थिक–पारिश्रामिकादि विषयाश्च प्रतिवर्षं नव–नवैः रूपैः अभिवर्धन्ते । संस्कृतभाषायां तादृशविषयाणां लेखनं अतिविरलतया दृश्यते । इदानीमपि यदि संस्कृतपण्डितानामौदासीन्यं अस्मिन् विषये भवेत् आयत्यां लोकाः एषामसामर्थ्यमिति जानीयुः । जीवनोपयोगिनः

सर्वे विषयाः तत्तद्देशभाषासु लिखितुं प्रवृत्ताः तद्विदः । अतः संस्कृतभाषामपि यदि वयं भाषात्वेन जिजीविषामः जीवनोपयोगिनः विषयाः अवश्यं तस्यां प्रकाशनमर्हन्ति ।

संस्कृत महापाठशाला विद्यार्थिनिलयस्य विद्यार्थिनः (Samskrita Sangha) अस्मिन् वर्षे तैः विभिन्न विषयान् अधिकृत्य संस्कृतभाषायां लिखितान् व्यासान् मुद्रयित्वा प्रकाशयितुं मामभ्यर्थयन् । चिरादाकांक्षितस्यास्य विषयस्य यावच्छक्ति सहायं विदधामीति अवोचम् । तत इदानीं त्रयस्त्रिंशद्-विद्यार्थिनः विभिन्न विषयेषु लेखान् लिलिखुः । चत्वारः दत्त विद्वत्परीक्षाः शालायां अन्येषु शास्त्रविभागेषु अधीयानाः प्रौढान् लेखान् अरचयन् । पञ्च–संख्याकाः उपाध्यायाः अपि स्वीय लेखानुपहारीकृत्य एतान् प्रोत्साहयन् । संभूय त्रयस्त्रिंशत् लेखनानि "प्रबन्ध पारिजाता" रव्ये संपुटे महा–जनानां अवगाहनाय समर्पित आस्ते ।

अस्मिन् पारिजात प्रबन्धे आधुनिक विषयान् अधिकृत्य लघु–प्रबन्धाः संक्षेपेण लिखिताः सन्ति । वैज्ञानिक विषयान्—राजकीय विषयांश्च संस्कृत–भाषायां लेखनं श्रमसाध्यं भवति । महापाठशालायाः प्रार्थनां–पुरस्कृत्य उप-न्यासमाला प्रारभ्यते । "मङ्गलादीनि" इति नियममनुस्मरन् आदिकविं वाल्मीकिमनुस्मरन् । ऋमुकाराम–नागवल्ली व्यासयोः विद्यार्थिनां प्रकृतिसौंदर्या-भिरुचिः द्योतते । विशाल मैसूर् लेखः कर्णाटक जनपदं परिचाययति । पञ्चशीलानि विश्वसंस्थायाः संघटनं च प्रचलित राजकीयविषयावगाहने औत्सुक्यं व्यङ्क्तः । कुविन्दपरिश्रमः विद्यार्थिषु पारिश्रमिक विषयाणां जिज्ञासां व्यञ्जयति । बहुपत्नीव्रतविमर्शनं, सन्ततिनिरोधश्च समाजे मानवजीवनस्य समस्यां स्मारयतः । कनकपुरी नाम जैनानां पुण्यक्षेत्रं, अस्य वर्णनावसरे तीर्थंकरस्य महावीरस्य तथैव जैनधर्मस्य सूक्ष्मपरिचयः विहितः । वेलापुरी लेखने पुण्यक्षेत्रोपवर्णनं तस्य मूलभूता पुराणकथा, शिल्पकला वैशिष्ट्यं च वाचकेभ्यो निवेदितः । आर्थिक समस्या दैनन्दिन व्यवहारे अर्घपरिवर्तनं

विविनक्ति । वैज्ञानिकानां आविष्करणानां अधिगन्तव्यतां सर्वैरपि प्रति–किरणोपयोग व्यासः निवेदयति । साधकः जिज्ञासूनां मन्तव्यं ज्ञापयति । स्वामी श्रीचिन्मयानन्दयतिमधिकृत्य लिखितो व्यासः भारतीय संस्कृतेः प्रकर्षं अधुनातनैः तस्य पुनरुज्जीवनं अधिगतेरावश्यकत्वं च ज्ञापयति ।

सर्वेषां सुखाय शान्त्यै च याज्ञवल्क्यः धर्मं प्रधानं मेने । वेदव्यासः तस्य अध्यात्मतत्वाधिष्टातृत्वं परिवर्तनस्वभावं च व्याख्यास्यत् । भगवान् बुद्धः दयां पुरस्कृत्य शीलं दिदेश । चाणक्यस्तु धर्मार्थकामान् परस्पराविरोधेन सेवितव्य-मिति निजगाद । एकैकपुरुषार्थप्रवणानां इतरेतरहानिं च विवृण्वत् । झान्सी लक्ष्मीबाई सामयिकासु युद्धज्वालासु स्वात्मानं जुहाव । स्वामी दयानन्द सरस्वती विद्याभ्यासस्य तथा धर्मप्रचारमुखेन चाणक्योपदर्शितमार्गं अनुससार । गङ्गाधरतिलक् महाशयः राजकीयदृष्टिमवष्टभ्य देशस्य स्वातन्त्र्य प्राप्त्यै प्रववृते । महात्मा गान्धी तु अशेषान् विषयानाकलय्य स्वजीवनमेव दृष्टान्ती–कृत्य लोकानां कर्तव्यमादिदेश । शिष्टानि सप्त लेखनानि त्रैय्यन्त विचारधारा–मादर्शयन्ति । सच्चरित्रता मानवस्य जीवनादर्शमुपलक्षयति । पाञ्चरात्रागमः संक्षेपेण आगमदृष्टिं दीक्षितानां परिस्थितिं च परिचाययति । एवं त्रयस्त्रिंशत् लेखनानि संगृह्य प्रकाशितानि । अयं ''प्रबन्ध–पारिजातः'' बालानां व्युत्पादकः पण्डितानां मोदावहश्च विद्यते । विद्यार्थिनः अहमहमिकया इमं पठेयुः । आगामि–वत्सरे इतोप्यतिशयेन आत्मविश्वासेन च उपन्यासान् लिखेयुः, बृहदाकारेण प्रकाशयेयुरिति च विश्वसिमि ।

एस्. शङ्करप्प, M.A.,B.T.,
श्री चामराजेन्द्र संकृतमहापाठशालाध्यक्षः,
बेंगलूरु–२,

विषयानुक्रमणिका

ॐ

प्रबन्ध पारिजातः

" न हि ज्ञानेन सदृशम् "

—: प्रार्थना :—

विश्वानिदेवसवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥ १ ॥

—(कृष्णयजुर्वेदः)

स्वस्तिनइन्द्रो वृद्धश्रवास्स्वस्तिनः पूषा विश्ववेदाः ।
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥२॥

—(ऋग्वेदः)

अग्न आयाहि वीतये गृणानो हव्यदातये ।
निहोता सत्सि बर्हिषि ॥३॥

—(सामवेदः)

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्यपूर्णमादाय पूर्णमेवावशिष्यते ॥४॥

—(शुक्लयजुर्वेदः)

शरदिन्दुविकाससमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ॥५॥

यं शैवास्समुपासते शिव इति ब्रह्मेति वेदान्तिनः
बौद्धा बुद्धइति प्रमाणपटवः कर्तेति नैय्यायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो विभुः ॥६॥

यस्मादिदं जगदजायत यत्रतिष्ठत्यन्ते समस्तमिदमस्तमुपैति यत्र ।
तस्मै नमस्सदसदादिविकल्पशून्य चैतन्यमात्रवपुषे
पुरुषोत्तमाय ॥७॥

योऽन्तः प्रविश्यममवाचमिमां प्रसुप्तां संजीवयत्यखिलशक्ति-
धरस्स्वधाम्ना ।
अन्यांश्च हस्त चरण श्रवण त्वगादीन् प्राणान्नमोभगवते
पुरुषाय तस्मै ॥८॥

यत्कीर्तनं यच्छ्रवणं यदीक्षणं यद्वन्दनं
यत्स्मरणं यदर्हणम् ।
लोकस्य सद्योविधुनोति कल्मषम्
तस्मै सुभद्रश्रवसे नमो नमः ॥९॥

जीयाद्भारतदेशोऽयं
जीयाद्धर्मस्सनातनः ।
जीयाच्चविदुषां गोष्ठी
जीयाद्गीर्वाणभारती ॥१०॥

———*———

सद्बुद्धिस्साधुसेवी समुचितचरितः तत्वबोधाभिलाषी
शुश्रूषुः त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तोदान्तोऽनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
प्राप्तः शिष्यः परीक्षां कृतविदभिमतः तत्वतः शिक्षणीयः ॥

*

वन्दे वाल्मीकि कोकिलम्

(बि. जी. जयरामाचार्यः)

पुरा कश्चित् व्याधः दुर्वृत्तेन जीवतिस्म । कदाचित् दयालुभिः ऋषिभिः अनुगृहीतो बभूव । तदारभ्य सः दुर्वृत्तिं तत्याज । अनन्तरं तेषां अनुग्रह–महिम्ना प्रभावितः नितान्तं तपस्तेपे । चिरकालं तपस्यन्तमेनं भूमिः वल्मीक–रूपेण आलिलिङ्ग । तस्मात् वल्मीक एव परिदृश्यमानः आसीत् । व्याधः तस्मिन्नन्तर्हितो न ददृशे ।

एतस्मिन्नन्तरे ऋषयः तेन पथा जग्मुः । अस्य अध्यात्मविकासं प्रशशंसुः । वल्मीकसात्कृतं तस्य शरीरं दृष्ट्वा अनुकम्पितास्तमुद्धरन् । अनुपदमेव स वल्मीकान्निरगच्छत् । वल्मीकात् प्रभूतः वाल्मीकिरिति प्रथितोऽभवत् । तपसा विगतकल्मषः चकाशे । स्वरूपज्ञानविकासेन ननन्द । सर्वभूतहितैषिभिः ऋषिभिः अनुकम्पितो मुमोद । कदापि च स्वीयं पूर्ववृत्तान्तं न सस्मार । एवं वाल्मीकिः ऋषिर्बभूव ।

वाल्मीकिः आपन्नसत्वां विवासनव्यसनाकुलां जानकीं ररक्ष । जातौ यमौ कुशलवौ पुपोष । संस्कारैः विद्याभ्यासेन च तौ पर्यवर्धयत् । एतस्मिन्नन्तरे सिस्नासुः नदीमगच्छत् । मध्ये मार्गं पक्षिणौ वृक्षे ददर्श । व्याधः कश्चन तयोरेकं बाणेन जघान । परया कृपया आविष्टः वाल्मीकिरखिद्यत् । खिन्नस्य वाल्मीकेर्मुखात् छन्दोमयीवाणी निस्ससार—

" मानिषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकं अवधीः काममोहितम् ॥ "...इति

अयं श्लोकः श्लेषमहिम्ना रावणकथामपि सूचयति । अस्यार्थं स्मारं स्मारं ऋषिराश्चर्यचकितोऽ भवत् । किमियं घटनेति न मेने । देवर्षिर्नारदः एतदवसरे

तत्राजगाम। वाल्मीकिस्तं पूजयामास । नारदः प्रसन्नो भूत्वा "भवान् रामकथां प्रणये" ति तमाज्ञापयामास। प्रच्छन्नाः प्रकटाश्चविषयाः वाल्मीकये सुविशदं प्रास्फुरन् ।

पुराण प्रसिद्धः श्रीरामचन्द्रो विराजते। इतिहासेष्वस्य कीर्तिर्बोभूयते। वाल्मीकिरस्य चरितं प्रणिनाय । ग्रन्थस्यास्य नाम "श्रीमद्रामायण" मिति विश्वजनीनम् । रामस्यायनं रामायणम् । वाल्मीकिः "सीतायाश्चरितं महत्" इत्युद्गृणाति। रामायणे सप्तकाण्डानि सन्ति । बालकाण्डे श्रीरामस्य जन्म, विवाहश्च उपवर्णितौ । अयोध्याकाण्डे तस्य पट्टाभिषेकनिरोधः वन–गमनं च, अरण्यकाण्डे वनवासः, किष्किन्धाकाण्डे सुग्रीवसमागमः, सुन्दर-काण्डे सीतायाः गवेषणं च विवृतं वर्तते, युद्धकाण्डे रावणवधः पट्टाभिषेकश्च ।

उत्तरकाण्डे रामेण रावणस्य पूर्ववृत्तान्तश्रवणं, देवासुरयुद्धवर्णनं, सीतायाः विवासनं, कुशलवयोर्जन्म; अन्ततः सीतायाः भूमौ लयः; पुत्रयोः राज्यं दत्वा महाप्रस्थानं चेति विषयाः निरूपिताः ।

वाल्मीकिः रामायणं प्रणिनाय । कुशलवेभ्यः रामायणं प्रथमं सम्यक् ग्राहयामास। गानमार्गेण तावगायताम्। श्री रामचन्द्रोऽपि एतयोः काव्यगानं श्रुत्वा भृशं ननन्द। एवं श्रीरामचन्द्रस्य कीर्तेः वाल्मीकिराधारस्तम्भइव वर्तते। विश्वविख्याता तस्यकृतिर्विराजते । वर्णनं वर्णनातीतम्, भावाः पुनः भावुकरञ्जकाः, विषयः पुण्यश्लोकस्य, वाणी गैर्वाणी, कर्ता तपस्सिद्धपुरुषः, पात्राणि आञ्जनेय प्रभृतयः पुण्यश्लोकाः। एवमादिकाव्यं रामायणं महामन्त्रं बभूव।

इदानीमपि आस्तिकानां रामायणं पारायणमन्त्रं वर्तते । शरन्नवरात्रौ, वसन्तनवरात्रौ च अस्य पारायणं महते फलाय कल्पते। एवमादिकविर्वाल्मीकिः तपसा स्वयं तीर्णः स्वीयकृतिना विश्वेषां तारकः विराजते।

——*——

क्रमुकारामः

(गुरुनाथ श्रीपति भट्टः)

भारत देशे व्यवसायः अनेकरूपेण विद्योतते । प्राधान्येन विविधोऽयं प्रयत्नः । अर्थस्य उत्पादकः एको विभागः, अन्यस्तु आहारधान्यानामुत्पादकश्चेति । एवं द्रव्यमापादयन्तः व्यवसायप्रकाराः नारिकेल–आम्र–ताल–क्रमुकाद्यारामेषु तथैव पलाण्डु गृञ्जन विदाहिप्रभृतीनां व्यवसायेषु च समनुयन्ति ।

क्रमुकारामस्य वैशिष्ट्यमतीव मनोहरं भवति । यथा गृहस्थानां गृहे बालाः, युवानः स्थविराश्च एकीभूय वर्तन्ते तथास्मिन्नारामे भिन्नवयस्काः वृक्षाः सम्भूय विलसन्ति । कण्टकावरणमस्य आवश्यकं भवति । कण्टकावरणेपि निम्ब, पनस, आम्रादि वृक्षाः अभिवर्धन्ते वर्धयन्ति च । अन्तःप्रदेशे क्रमुक-वृक्षैः सह रम्भाः नारिकेल वृक्षाः अपि तत्र तत्र आरोप्यन्ते । नागवल्लीलताः क्रमुकवृक्षानालिङ्ग्य मोदन्ते । मध्ये-मध्ये एलाकुञ्जाः अहमहमिकया उल्लसन्ति । मरीचानां लताः अत्रैव प्रभवन्ति । जम्बीरवृक्षाः इममलंकुर्वन्ति । पिप्पली गुञ्जान्यपि केषुचित् प्रदेशेषु विलसन्ति । किं बहुना ? मानवानां सर्वार्थदाता अयमारामः नयनमनोहरः, विलासिनां विलासभूमिः, पारिश्रमिकाणां कार्य-क्षेत्रं, दिदृक्षूणां नयनानन्दकरं, अर्थार्थिनां कर्षकाणां च प्रधानमालम्बनम् ।

एते क्रमुकारामाः सर्वत्र नैव समुल्लसन्ति । सामान्येन समुद्रस्य एकशतक्रोशाभ्यन्तरप्रदेशेषु विशेषेण प्रभवन्ति । विशेषेण दक्षिणभारते, वङ्गदेशे, पश्चिमप्रान्तेषु क्रमुकव्यवसायः महीयान् वरीवर्ति । सामान्येनास्य वृक्षस्य परिमाणं दशपुरुषप्रमाणमप्यतिशेते । बीजादेव क्रमुकाङ्कुराणामुत्पत्तिः । अङ्कुराण्येवोत्पाद्य प्रथमं यथा सौकर्यं संयोजनीयानि भविष्यन्ति । किञ्चिदिव-रक्त-वर्णा भूमिः महते फलाय भवति । सुधामय प्रदेशस्तु विपरीतायैव । क्रमुकवृक्षाः

सदा जलमपेक्षन्ते विशेषेण वसन्तग्रीष्मयोः । तस्मात् आरामे प्रत्येकं त्रिहस्तावकाशेषु एकैकासारिणी अवखानितव्या । प्रत्येकवृक्षस्यमूले गोमयपूरितं उत्तेजकद्रव्यं स्थापनीयं तथा पर्णानि च । इदं सर्वं दोहदद्रव्यमिव भवति । सामान्येन अयमारामः सहस्रवर्षपर्यन्तमपि समानतया फलं दद्यात् । क्रमुक-वृक्षाणां सामान्येन आयुः षष्ठिवर्षपर्यन्तं भवति । बाल्यं पञ्चदशवर्षाः, वार्धक्यं च तावदेवस्यात् । त्रिंशद्वर्षाः केवलं अस्य वृक्षस्य यौवनम् । इदमेव समीचीनफलवितरणे अन्वेति । यद्यारामपालकः बुद्धिमान्, दूरदर्शी, अभिमानशाली जागरूकश्च स्यात् सः सर्वदा यौवनवृक्षाणां समानसंख्या यथा भवेत्तथा प्रयतेत । एतदर्थं प्रतिवर्षं अङ्कुरारोपणं सकाले कारयेत् । यद्यपि स्थविरवृक्षाः म्रियेरन्, बालवृक्षाः फलदाने अशक्ताः सन्ति—व्यवस्थामेनां कूलंकषं विमृश्य फलावाप्तिः यथा अन्यूना भवेत्तथा प्रयतितव्यम् । इदमेव वैशिष्ठ्यं हृद्यं क्रमुकारामस्य यदनेकमुखेन लोकेभ्यः साहाय्यमाचरति । पशूनामाहाराय पर्णानि, मनुष्याणां फलानि च वितरन् सर्वपुरुषार्थहेतुभूतं धनमपि दापयन् मातेव मानवं रक्षति ।

क्रमुकवाणिज्यमधिकृत्य केन्द्रशासकैः बहवो नियमाः तदा तदा उपपाद्यन्ते । तत्र वैदेशिकाः पदार्थाः बहवः, तेषु क्रमुक—नारिकेळादयोपि प्रेष्यन्ते भारतदेशाय । अनेन विदेशीय क्रमुकाणामागमनेन वाणिज्ये मनागिव स्पर्धा जायते, कतिपय समयेषु अस्मद्देशीयैः कृच्छ्रेणानुभूयते च । राज्यसभायां लोकसभायां च प्रजाप्रतिनिधयः वार्ताभिज्ञाश्च विदेशीयस्पर्धायाः प्रतिक्रियां करविधानप्रणालीमनुसृत्य विधेयामावेदयन्ति । तथापि सूचितानां नियमानां-अङ्गीकरणम् तेषां प्रयोगश्च सावधानेनैव प्रचलति । अनया मन्दगत्या तत्तत्समयेषु वणिग्भिःकर्षकैश्च धनाभावक्लेशः अनुभूयते । समीचीनव्यवस्थानुसरणेन कर्षकाणां धनागमः वणिजां लाभः केन्द्रशासनाय करादायश्च संपद्यते ।

—*—

नागवल्ली

(एम्. शिवराम दीक्षितः)

मङ्गलकरेऽस्मिन् धरावलये ओषधीनां नगानामगानाञ्च दैवमहिमायोजनं अनितरदेशसाधारणं जागर्ति । लताप्रपञ्चे नागवल्ली परां कोटिमाटीकते । इयं पार्वत्याः महिम्नः प्रतिनिधीभूता इति च प्रथिता लोके । तथैव पारदः शङ्करस्य वीर्यमिति च रूढिः आयुष्मती वरीवर्ति । पारदः गन्धकं विना केनापि निगृहीतुं असाध्य इव प्रतिभाति । परन्तु कतिपयौषधीनां रसैरवरुध्यते । प्रयोगेण पुनः नागवल्लीरसैः अव्यवहितोत्तरक्षणेन निरुध्यते । प्रत्यक्षसिद्धोऽयं विषयः ।

भूगोले प्राच्यावाच्यदेशेषु नागवल्लीपर्णानि सामान्यानां श्रीमतां च मनोविनोदनाय अनेकदोषनिराकरणाय च उपयुज्यन्ते । भारतीयताम्बूलवल्ल्यः उत्तर–दक्षिण–पश्चिम–पूर्वप्रान्तेषु विभिन्नजातीयाः प्ररोहन्ति । पाश्चात्यानामपि भारतीयवल्लीदलेषु प्रेम विजृम्भते । भिन्नजातीयेषु पर्णेषु समाना एव गुणा तरतमभावेन विद्योतन्ते । दक्षिणभारते मैसूर-प्रान्तीय–ताम्बूल–पर्णेषु वैशिष्ट्यं अनुभवैकसमधिगम्यम् । आकारेण मनोहराणि । स्वादुतायां हृदयरञ्जकानि । परिपाकेन स्फूर्तिदायकानि च सन्ति । ताम्बूलमधिकृत्य प्रावादुकाः प्रावोचन् ।

> “ ताम्बूलं कटुतिक्तमुक्तमधुरं क्षारं कषायान्वितं
> वातघ्नं क्रिमिनाशनं कफहरं दुर्गन्धनिर्नाशनम् ।
> वक्त्रस्याभरणं मलापहरणं कामाग्निसंदीपनं
> ताम्बूलस्य सखे ! त्रयोदशगुणास्स्वर्गेऽप्यमी दुर्लभाः ॥ ”

शुभाशुभकर्मसु समानतया एषां नागवल्लीपर्णानामुपयोगः साम्प्रदायिकतया दृश्यते । दरिद्राः, श्रीमन्तः, सन्यासिनः, निष्ठावन्तः, दैवतानि च,

किं पुनः पिशाचाः, भूताः अतीताः पित्रादयश्च ताम्बूलं पुरस्कृत्यैव बहूक्रियन्ते पूज्यन्ते च। ग्रामीणाः पुनः धूमपत्रेण साकं (Tobacco) ताम्बूलमास्वादयन्ति मोदन्ते च। विना ताम्बूलं तेषां हस्तपादा अपि न प्रचलन्ति, बुद्धिरपि न स्फुरति अशान्ताश्च भवन्ति। एवं ताम्बूलमहिमा संग्रहेण न्यरूपि।

इयं वल्ली, बीजेभ्यो न प्ररोहति। वल्लीखण्डैः प्ररोहति। आश्रयं विना न परिवर्धते। आरोपणानन्तरं वर्षत्रयपर्यन्तं पर्णानि त्रुटितुं न शक्यन्ते। बाल्ये त्रुटितानि पर्णानि वल्लीमेव नाशयन्ति। वर्षत्रयानन्तरं यावात्रिंशद्वर्षं पत्राणि यथाकालं कर्तयेयुः। शरीरपोषणमिवास्यारामस्य पोषणं श्रद्धया सुकुमाररीत्या अनुष्ठेयम्। उत्तेजकद्रव्यसंयोजनं, नवीनमृत्संयोजनं च प्रतिवर्षं कार्यं वर्तते। अहमहमिकया परिवर्धमाना लता तदा तदा वर्षत्रये एकवारमाकृष्य भूमौ निखातयितव्याः। परशुरामक्षेत्रे (South Canara) पुनरिदं विधानं नानुस्रियते, विजातीयत्वाद्वल्लीनाम्। आलवालाः चतुष्कोणाकारेण निर्मास्यन्ते। क्षुद्रसारिण्या जलं तेष्वापूर्यते। कण्टकशाखावरणं प्रबलतरं निर्मापयितव्यम्। कदापि नखैः पर्णानि न खण्डनीयानि। अनेन वल्ली शुष्यति। तदा तदा उपद्रवाश्च भविष्यन्ति। साम्प्रदायिकाः प्रतिक्रियास्तत्र तत्र श्रद्धालवः आचरन्ति। ताम्बूलवल्ली आरामः वर्षत्रयमेवं रक्षितश्चेत् आत्रिंशद्वर्षं रक्षितारं रक्षति धर्म इव। लोकोक्तिरायुष्मतीममर्थमावेदयतिः — "वर्षत्रयं मां रक्ष, त्रिंशद्वर्षं रक्षामि" इति। एवं पार्वत्यभिमानदेवताका समेषां विश्वेषां सर्वकर्मसु उपयोगमुद्वहन्ती नर–देव–भूत–पितृपिशाचैरपि अविशेषेण लालनीया नागवल्ली जेजीयते।

विशाल मैसूर्

(टि. एस्. नरसिम्हराजु)

संस्कृतवाङ्मये समय निर्देशपूर्वकं तत्तत्कालिक घटनानामुपवर्णनं अस्पष्टमिव प्रतिभाति। अनेन कारणेन वेदानां काल-निर्णये तथा पुराणानाञ्च नितरां भिन्नाभिप्रायाः वर्तन्ते। कदाचन परस्परविरुद्धाभिप्रायाः उदासीन-माकुलयन्ति। यथार्थदर्शिनस्तु वेदानां कालनिर्णये वेदमन्त्रेषु प्रतिपादितज्योतिर्गणितरीत्या कालनिर्णय-मिच्छन्ति। तथैव श्रीरामजननस्य भारतमहायुद्धस्य च वर्णनेषु-ज्योतिर्गणितसूचना विद्योतते। एनं नियमं यद्यनुसरेयुः विमर्शकाः, पौर्वात्यानां पाश्चात्यानां च गवेषणात्मकदृष्टिषु कोलाहलो न कदापि अभविष्यत्। सःस्वयं शाम्येतापि। कर्णाटकजनपदीयाः श्रीरामचन्द्रस्य "राज्याद्भ्रंशः, वने वासः, सीता नष्टा, द्विजो हतः," ईदृशदुःखपरम्परावसरे किञ्चिदिव समानदुःखोऽपि कर्णाटकजनपदाभिजनः सुग्रीवः, महाकर्मयोगी-आञ्जनेयः अन्ये च वानराः सहयोगं ददुः। एषां साहाय्येन रावणं जित्वा सीतां आनिनाय श्रीरामचन्द्रः। पट्टाभिषिक्तः धर्मेण राज्यं पालयामास। अयमेकः कीर्तिमकुटः कर्णाटकजन-पदीयानाम्। श्रीकृष्णः भारतयुद्धं निवारयितुं विराटनगरात् सन्धिमारेभे। देवांशसम्भवानां पाण्डवानां अज्ञातवाससमये रक्षणं पोषणं च कर्णाटकजनपदे विराटनगरे बभूवेति बहूकरणमस्य जनपदस्य। लङ्काधिपतेः रावणस्य भयं नासीदिति मन्यामहे अस्य जनपदस्य। कुतः खरदूषणादीनां सेनानिवेशः दण्ड-कारण्ये "नासिक्"क्षेत्रे समजनि। ताटका-सुबाहुमारीचौ च उत्तरभारत एव आसन्। जगदेकवीरस्य घटोत्कचस्य जननी हिडिम्बी कार्णाटकीति मोदामहे। अद्यापि एतेषां हिडिम्बादीनां ज्ञापकप्रदेशाः विराजन्ते। अतिथिसत्कारः एषां गुणविशेषो बभूव, अस्ति च। परम्परागतेन अनेन गुणेन केरलीयशङ्कराचार्याः द्राविडीयरामानुजाचार्याश्च आश्रयं रक्षणं च अलभताम्। परं कर्णाटकाभि-

जनानां श्रीमदानन्दतीर्थ—बसवेश्वरादीनां रक्षणं, पोषणं, अनुपालनंचात्रैवेति-प्रमोदस्थानमेतद्देशीयानाम् ।

ऐतिहासिककाले विद्यानगरसंस्थापकाः कृष्णदेवरायादयः तत्पूर्वं पुलिकेशिप्रभृतयः होय्सल–चालुक्य–गङ्गाभूपतयश्च बभूवुः । यवनैः विजय-नगर साम्राज्य पातनानन्तरं प्रातस्स्मरणीयः शिवाजीमहोदयः अस्मिन्जनपदे पादन्यासमकरोत् । प्रभावितश्च जनन्या, कार्णाटक जनन्या च धर्मरिरक्षया महान्तमायोगमाततान । आङ्ग्लसाम्राज्ये जनपदोऽयं पञ्चधाभिन्न आसीत् । भारतस्य स्वातन्त्र्यप्राप्त्यनन्तरं क्रि. श. १९५६ नवंबर्मासे पुनश्च कर्णाटक भाषा-भाषिणां एकीकरणं बभूव । अस्मिन्जनपदे नवधान्यान्यपि रोहन्ति । सुवर्ण-खनिः वर्तते । श्रीगन्धवनस्य गजानाञ्च आवासभूमिरियम् । मरीच–एला–क्रमुक–नारिकेल–काफीत्यादीनाञ्च रसतमाः अत्र उत्पाद्यन्ते । अस्य चीनांशुकाः जगद्विख्याताः । पारिश्रमिकविभागे अयःपरिश्रमकर्मागारं, विमान निर्माणम्, काच निर्माणम् (Glass), मृत्पात्र निर्माणम् (Porcelain), दूरवाणी (Telephone), श्रुतप्रकाशकयन्त्र निर्माणम् (Remco & I.T.I.) इत्यादीनां कर्मागाराणि विलसन्ति ।

दक्षिणभारते विद्युदायोजनं प्रथममत्रैवासीत् । कावेरी नद्याः मध्यरङ्गे प्रथमं शिल्पिवरेण्यः विश्वेश्वरः विद्युदुत्पादनकेन्द्रं निर्ममे । अनन्तरं तेनैव सूचितमार्गेण योगक्षेले (Jog Falls) जलपाते अन्यत्केन्द्रं निर्मासिषुः । धूमशकटमार्गाः अपि माकिम् १००० (Miles) अथवा ५०० क्रोशपरिमिता-स्सन्ति । अचिरेणैव कालेन प्रतिग्रामं विद्युच्छक्त्या अलंक्रियते । कावेरी, उत्तर पिनाकिनी, दक्षिणपिनाकिनी, लोकपावनी, कपिला, तुङ्गा, भद्रा च अन्याभिरनेकाभिर्नदीभिः सङ्गताः प्रवहन्ति । कृष्णानदी अपि कियद्दूरं अस्मिन् जनपदे प्रवहति । दक्षिणकाशीति प्रसिद्धं गोकर्णक्षेत्रं, कनकपुरीति प्रथितं जैनानां प्रसिद्धक्षेत्रंचात्र विलसतः । यादवगिरिः (Melkote), विषकण्ठपुरम् (Nanjangud) च परश्शतानामास्तिकानां आकर्षणीये स्तः । कावेरीनद्याः

अलङ्कारभूतेषु रङ्गत्रयेषु आदिरङ्गम्–मध्यरङ्गंचास्मिन् जनपदे विलसतः। जन-संख्या कोटिद्वयं वर्तते। द्वौ विश्वविद्यानिलयौ वर्तेते। एकोन विंशति संख्याकाः मण्डलविभागाः (Districts) व्यवहारसौकर्यार्थं परिष्कृताः वर्तन्ते।

नवव्याकृतिपण्डितं हनुमन्तमारभ्य संस्कृतपण्डितपरम्परा इदानीं यावदपि अच्छिन्ना आयुष्मती चकास्ति। वेदभाष्यकारः सायणाचार्यः अत्रैव रेजे। इदानीं संस्कृतविद्याभ्यासाय दश महापाठशालाः शताधिकपाठशालाश्च वर्तन्ते। श्रृङ्गेर्यां अद्वैतसम्प्रदायस्य महीशूर नगरे विशिष्टाद्वैतसम्प्रदायस्य, उडुपिक्षेत्रे तथान्यत्र च मध्वसिद्धान्तस्य पीठाः वर्तन्ते। वीरशैवानां पुनः पञ्चमठेषु प्रधानेषु त्रयः अत्रैव विलसन्ति। परन्तु परश्शतास्तत्रतत्र समुल्लसन्ति। प्रतिवर्षं पञ्चाशत्सहस्रसंख्याकाः विद्यार्थिनः प्रौढशालातः (High School) निर्गच्छन्ति। बृहज्जलाशयौ द्वौ स्तः—कृष्णराजसागरः तुङ्गभद्राजलाशयश्चेति। जैनाः, बौद्धाः, वैदिकाः, यवनाः, क्रिस्ताश्च प्राधान्येन वर्तन्ते।

सहस्रवर्षेभ्यः प्रागेव कर्णाटकभाषायाः निर्दिष्टं स्वरूपमासीत्। नागवर्मा नाम पण्डितः छन्दोम्बुधिं प्रणिनाय। इदं प्रथमं कर्णाटकभाषायाः व्याकरणम्। तदनु संस्कृतभाषायाः पुराणानां भाषान्तराणि पद्यरूपेण अहमहमिकया सम-जनिष्यन्त। वीरशैवानां फक्किकां अनुसृत्य कर्णाटकभाषायाः एका शाखा ववृधे। वैष्णवानां भक्तिभावपरिचुम्बिनी अन्या शाखा प्रफुल्लिता बभूव। जैनकवीनां रसभावनिर्भरा अपरा शाखा विराजते। वेणीत्रयमिदं कर्णाटकमोहिन्याः।

श्रीकृष्णपदार्पण पवित्रीकृतः दानशूरेण कर्णेन अटितः सन् कर्णाटकः इति गीयते "कर्णयोरटतीति कर्णाटः"। गच्छता कालेन यदुवंशीया एव अत्रागत्य राज्यमारेभिरे। तेषु चतुर्थः श्रीकृष्णराजभूपालः पुराण प्रसिद्धानां राजर्षीणां प्रतीक इव परदेशीय राज्यक्रमभारावनते अस्मिन् देशे चकाशे। यदुसन्तानश्रीः परम्परया राज्यभारनिर्वहणे धर्मरतिरासीत्। कर्णाटकवाङ्मयमभिवर्धयामास। आर्यसंस्कृतेराधारस्तम्भ इव रराज। वेदानां शास्त्राणाञ्च आश्रयभूमिरासीत्।

वेदाध्यायिनः पण्डितांश्च यथाकालं पुपोष । महिषासुरेणाधिष्ठितं सत् महिषासुरपुरमिति (Mysore) नाम्ना प्रथितं नगरम् । उच्चारण व्यत्यासेन इदानींतन संज्ञा मैसूर् इति वर्तते । महिषासुरमर्दिन्याः देवालयमिदानीमपि विद्योतते । इयं देवी कर्णाटक जनपदराज्ञां कुलदेवता बभूव । एवं सहृदयत्वेन अतिथि–सत्कारेण च श्रीरामचन्द्रं ये प्रपेदिरे, श्रीकृष्णं पाण्डवांश्च ये पूजयामासुः, वालि–सुग्रीव–आञ्जनेयादीन् ये जनयामासुः ते कार्णाटकीयाः पूर्वे रेजिरे ।

मध्यकाले आचार्यत्रयीं आरिराधयिषिरे । सायणमाधवादीन् महापण्डितान् अभिननन्दुः । यवनराजानं 'औरंगज़ेब्' महाशयमपि सामोपायेन वशीचक्रुः । वर्तमानशतके पुनः तत्वशास्त्रविशारदं राधाकृष्णमहोदयं, अर्थशास्त्रनिपुणं के. टि. षा महोदयं इतिहासविचक्षणं राधाकुमुदमुखर्जिनमपि विश्वविद्यानिलये अवकाश दानेन बहूकृतवन्तः । विश्वविख्यातः विश्वेश्वरशिल्पिः अत्रैव जज्ञे । नोबल् पारितोषकेण तथा लेनिन् विश्वशान्ति पारितोषिकेण च सम्मानितः चन्द्रशेखर वेङ्कटराममहोदयः अत्रैव प्रतितिष्ठति । गान्धीमहोदयश्च अस्मिन् जनपदे कियत्कालं रेमे । पराक्रमिणां प्रभावेण, ज्ञानिनामुपदेशेन, भक्तानां सहवासेन, सहृदयत्वं, परमतसहिष्णुत्वं, अतिथिसत्कारञ्च सात्मीकृतवतां कार्णाटकीयानां इदं वाक्चित्रम् ।

आदौ वालिनिषेवितो दशमुखो यैर्निर्जितो वानरैः
रामो यत्र सहायमाप हरिभिः कृष्णश्च सम्भावितः ।
भक्तानां विदुषां तथैव यमिनां आचार्यवृन्दस्य च
या भूमिः शरणं बभूव जयतात् कर्णाट देशस्सदा ॥

प ञ्च शी ला नि

(एम्. विठ्ठलदासः)

बहोः कालात् मानवानां सुखाय, शान्त्यै च अनेके मार्गाः विचक्षणै-र्दयालुभिः प्रतिपादिताः । इमे यथाकालं अनूदिताः देश-दशानुरोधेन परि-वर्तिताश्चाभूवन् । अधुनातन मानवानां ज्ञानपरिधिः गभीरः विलक्षणा सामान्यैः अपरिमेयश्च विभाति । अद्यत्वे भौतिकशास्त्रपरिश्रमैः वैज्ञानिकाविष्करण विशेषैश्च अशेषं भूगोलं एकगेहायितम् । तस्मात् पुरातनकालविचक्षणैः आदृताः मार्गाः सर्वेषु क्षेत्रेषु इदानींतनैरस्माभिः यथापूर्वमादातुं न शक्यन्ते । अस्मिन्-समये अनुभूयमानास्समस्याः तासां वैशिष्ट्यानुरूपेण परिहारमपेक्षन्ते, विवरण-मुदीक्षन्ते, प्रचारमाकांक्षन्ते, आचरणं नियमेनाभिवाञ्छन्ति । उभयविधं खलु नियमानुसरणं दृष्टं लोके, व्यक्तिसंस्करणाय, समाजजीवनहितायचेति ।

भारतीयाः प्रथमं व्यक्तेस्तात्त्विकं स्वरूपं निरणैषुः । अनन्तरं तस्य जीवनानुबन्धि आध्यात्मिक-आधिदैविक-आधिभौतिकादीनुपायान् पर्यशीलयन् । उपायांश्च निश्चितफलानाददिरे । तत्र मानवानां समाजजीवनमधिकृत्य बहून् नियमांश्च, व्यक्तीनामर्थित्वं शक्तिं च पुरस्कृत्य निरदिशन् । तथैव व्यक्ति-संस्करणमुद्दिश्य आत्मगुणविकासाय व्यवस्थितान् साधनाभ्यासान् ग्राहयामासुः । व्यक्तिसंस्करणं प्रथममपेक्षितम् । सामूहिकनीतिः तत्फलभूता परिणमेतेति केषांचिदाशयः रूढमूलोऽवर्तत । इदानीं सामूहिकनीत्या व्यक्तिनियमनं विधित्सितम्, संस्करणं तु दूराद्दूरतरंगतम् ।

भूगोलेऽस्मिन् माकिम् पञ्चाशदुत्तर शतसंख्याकाः राज्यनिर्वहणव्यवस्थाः वर्तन्ते । कतिपय देशेषु अद्यापि प्रजाः एकं राजानं वंशपरम्परागतमिच्छन्ति, तमनुवर्तन्ते च । बहुसंख्याकाः पुनः ईदृशं राजानं नेच्छन्ति, परन्तु प्रजाभिः

आहितशक्तिं एकनायकं बहुमन्यन्ते। ईदृशैकनायकप्रभुत्वं न सर्वजनमनोहरम्। तथा व्यक्तिस्वातन्त्र्यरक्षणास्पदं च भूयादित्याशङ्कमानाः प्रजाप्रतिनिधीनां समवायेन राज्यभारं चालयन्ति। अत्रापि दोषानुद्गृणन्तः विद्यावतामेवात्राव-काशोदीयते, अर्थवतामेव प्रागल्भ्यमादत्ते, मेधाविनामवकाशो नास्ति, पक्षप्रतिपक्षभावनाश्च अहमहमिकया समुल्लसन्ति, अन्ततः पक्षपातदेव्याः अमङ्गलशिरसस्समुत्थानं भविष्यतीत्यावेदयन्तः प्रजासाम्यवादं अशेषराज्य-क्रमानुबन्धिनां दोषाणां एकमात्रपरिहारोपायं मन्वानाः प्रजाः साम्यवाद-मनुसरन्ति। अस्मिन्क्रमेऽपि दोषान्—कापट्यं, पक्षपातं, स्वार्थपरत्वञ्च निपुणं निरीक्ष्य अन्ये प्रजासत्तावादं सर्वेषां दोषाणां निवारणे सिद्धौषधमित्यभिवदन्ति, यस्मिन् उपर्युपपादिता दोषा नास्कन्देरन्।

सत्येवं मानवानां भावनावलये राज्यभारक्रमस्य स्वरूपनिरूपणविचारे वैमत्यं साम्यं च निरीक्षामहे। प्रजासु व्यक्तेरवकाशः, रक्षणं, दारिद्र्य परिहरणम्, विद्याभ्यासादिसौलभ्यसम्पादनम्, प्रत्यक्षतः शासकवर्गस्यापि आयोजनवियोजनेषु मतदानाधिकारः इत्यादयस्सामान्यनियमाः सर्वेषु राज्य-क्रमेषु उद्दिष्टाः। सिद्धान्तस्तु स्वरूपतोभिद्यते, फलतः एकरूपमावहति। अनेन महता परिश्रमेण साधितानां सिद्धान्तानां चरमसीमा शान्तिर्विश्वेषाम्, विरामो दौर्जन्यस्य आक्रमणस्य, समीचीनजीविका प्राप्तिश्च।

वेदेषु धर्मं सर्वदोषनिवारणं इत्यभिवर्णितम्। पूर्वे ऋषयः मनुश्च धर्ममेव यमनियमाविति संचिक्षिपुः। गौतमबुद्धः यमानेव किञ्चिदिव परिष्कृत्य "पञ्चशीलानि" इति शिष्येभ्यो दीक्षितेभ्यो नियमानादिदेश। श्रीकृष्णः गीतायां परस्परभावनामन्त्रमुदाजहार। अधुनातन—राजकीय—नेतृषु परिगणिताः विविधराजकीय-सिद्धान्तानुयायिनोऽपि शान्तेरुपायं अन्यत्र सर्वाङ्गसुन्दरमनुपलभमानाः "पञ्चशील" परिभाषितान् नियमान् महता सम्भ्रमेण विवृण्वन्, लोकेभ्यः उपादिशन्। अहिंसा, सत्यम्, अस्तेयम्, शुद्धभावना, मादकद्रव्यविरतिरिति बौद्धपरिभाषा। परस्परदेशसीमायाः

तथा सार्वभौमत्वस्य च सम्माननम्, (Mutual respect for each other's territorial integrity and sovereignty), परस्परानाक्रमणम् (Mutual non-aggression), परस्परमान्तरीयविषयेष्वप्रवेशः (Mutual non-interference in each other's internal affairs), परस्परहिताय साम्यानुसन्धानम् (Equality and mutual benefit), शान्त्या सहवासश्चेति (Peaceful co-existence) इदानींतन व्याख्या। अन्ततः "परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" इति श्रीकृष्णसूक्तिरेव पञ्चशीलानां समष्टि स्वरूपेण विभ्राजते यथा सुकार्नो महाशयः एकादशवर्षेभ्यः प्रागेव उपापीपदत्।

सहनाववतु। सहनौ भुनक्तु।
सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु। माविद्विषावहै॥

ॐ शान्तिः शान्तिः शान्तिः।

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः।
सर्वभूतदयापुष्पं क्षमापुष्पं विशेषतः॥
शान्तिः पुष्पं तपः पुष्पं ध्यानं पुष्पं तथैव च।
सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं सदा॥

—(पद्मपुराणम्)

* * *

विश्वसंस्थायाः संघटनम्

(जि. रामचन्द्र राव्)

अस्मिन् शतमाने मानवजातेः निरन्वयोच्छेदसमर्थं विश्वसंग्रामयुगलमपश्याम ।
प्रथमसंग्रामानन्तरं दारिद्र्यं, वैमनस्यं, अनारोग्यं, आर्थिकदौर्बल्यं च मानवसमाजे परिपश्यन् आयत्यां सम्भविष्यमाणसंग्रामान् निरोद्धुं अमेरिका प्रजाराज्याध्यक्षः १९१२–१९२० "विल्सन्" महाशयः विश्वराष्ट्राणां संघं [League of Nations] दूरदृष्ट्या प्रत्यस्थापयत् । अस्याः संस्थायाः उद्देशः जगतिशान्तिस्थापनं, विभिन्नराष्ट्रेषु विद्यमानानां परस्परवैमनस्यापादकानां विषयाणां शान्त्या परिहारश्च । ईदृशविश्वसौहार्दभावनायाः अनभ्यासात् प्रधानराष्ट्राणामसहयोगात् अन्येषां सहृदयत्वाभावाच्च सा संस्था क्रमशः अन्तर्धानमगात् ।

पुनः द्वितीयविश्वसंग्रामः अतिभीकरः प्रवृत्तः । प्रथमयुद्धापेक्षयास्य परिणामः नितरां अपायकरः मानवजातिं भृशमपीडयत् । तदा १९४५ एप्रेल् मासे पञ्चाशत् राष्ट्रप्रतिनिधयः एकीभूय एकं समानाकृतिप्रमाणपत्रं स्वहस्ताङ्कैरलंचक्रिरे । नियमास्तु एवं प्रतिनिधिभिः प्रतिपादिताः ।

१) अन्तरराष्ट्रीय शान्तेः तथा रक्षणस्य अनुपालनम् ।

२) व्यक्तिस्वातन्त्र्यं तस्य संरक्षणं च ये अनुमोदन्ते तादृशैः राष्ट्रैः मैत्रीसंपादनम् ।

३) आर्थिकः, पारिश्रमिकः, सांस्कृतिका वा भवन्तु समस्याः विभिन्नयोः देशयोः, शान्त्या तादृशसमस्याः परिहरणीयाः । प्रतिव्यक्ति अव्यभिचरितं स्वातन्त्र्यं आत्मगौरवं च रक्षणीयम् ।

४) सर्वेषां राष्ट्रणां यत्नस्य परमं फलं मानवेषु मानवीयतापादनमिति। तादृश फलावाप्तेः इदं केन्द्रस्थानं भूयात्।

प्रारम्भकाले पञ्चाशद्राष्ट्राणि समवेतान्यासन्। इदानीं पुनः एकाशीति संख्याकानि समभ्युपेतानि वर्तन्ते, परन्तु बलवतां सहायेन चीनाजनपदस्य एको भागः प्रतिनिधीकृतः। अन्यो भागः प्रजासत्तावादी चीनादेशः इदानीमपि नाङ्गीकृतः अस्यां सभायां सदस्यत्वेन। इयं संस्था कार्याचरणे कतिपयविभागैः स्वीयोद्देशान् निर्वर्तयन्ती आस्ते। प्रथमो विभागः सामान्यसभा, अत्र सर्वे सदस्याः समानाः। प्रतिवर्षं एकदा सभ्याः नियमेन संमिलन्ति। यदि बहु–संख्याकाः प्रार्थयेयुः रक्षणासंघस्य [Security Council] तदा पुनर्मिलेयुः। द्वितीयः रक्षणासंघः, अस्मिम् विभागे एकादशसदस्याः तेषां पञ्चसंख्याकाः नित्य-सदस्याः इति निर्दिष्टाः वर्तन्ते। ते राष्ट्रीयचीणा, संयुक्त आङ्गुराष्ट्राणि, रष्या, फ्रान्स्, अमेरिकादेशानां प्रातिनिध्यमावहन्ति नित्यसदस्यत्वमावहन्ति च। शिष्टाः षट् अधिकृत सामान्यसभाप्रतिनिधिभिः प्रतिनिधीकृताः। अन्तर–राष्ट्रीयशान्तिसंरक्षणं अस्य परमोद्देशः। अत्र निर्णेष्यमानान् विषयान् नित्यसदस्येष्वन्यतमः यदि प्रतिभटेत् स नियमः कार्यरूपतां न भजते। तृतीयः अन्तरराष्ट्रीयन्यायालयः। हेग् नगरे अस्य स्थानम्। पञ्चदश–न्यायमूर्तयः अत्र वर्तन्ते। वार्षिकं वेतनं प्रत्येकं एकविंशति सहस्रसंख्याक डालर्–स्वर्णमुद्राः दीयन्ते। एते प्रधान विभागाः जगतः शान्तिस्थापनमुद्दिश्य प्रवर्तमाना विद्योतन्ते।

भारतदेशस्य गौरवं अनुमन्य विजयलक्ष्मीं अध्यक्षस्थानदानेन सम्मामयन्। अत्र-कार्यदर्शिनः, महाकार्यदर्शी च वर्तेते। अन्येऽपि सामान्य-विभागाः — १) अन्तरराष्ट्रीय कार्मिकसंस्था [I.L.O.], २) आहारः तथा व्यवसायसंस्था [F.A.O.], ३) विद्याभ्यास वैज्ञानिक आर्थिक सांस्कृतिक व्यवस्था [U.N.E.S.C.O.], अन्तरराष्ट्रीय निधेः संस्करणं, तत्परिवर्धनसंस्था [I.B.R.], ४) अन्तरराष्ट्रनिधिः [I.M.F.], ५) विश्वारोग्य व्यवस्था

[W.H.O.], एतेषु भारतदेशः स्वीयतत्वशास्त्र वैशिष्टयस्य पुरातनसंस्कृतेः महिम्ना च पौर्वात्य पाश्चात्ययोः सम्बन्धविधायिनी सेतुरिवास्ते। आयत्यामपि भारतदेशः यथाशक्ति सेवां वितरेत्। अनेक–विभाग–भूषितेषु सूक्ष्मरीत्या परिचय एव अत्रास्माभिरादृतः।

विद्यमानेषु एकाशीति सङ्ख्याकेषु राष्ट्रेषु बहूनि राष्ट्राणि अनेकेषु विषयेषु अवराण्येव येन जनसंख्यायां आर्थिकाभिवृद्धौ तथैव पारिश्रमिक संपदा च नितान्तं तरतमभावेन विद्यन्ते। नित्यसदस्यत्वमनुभूयमानेषु " राष्ट्रीयचीणा–देशः " सुतरामवररूपैव। तथापि अमेरिकादेशस्य आश्रयेण प्राधान्यं सर्वेषु विषयेषु अधितिष्टति। एवं सूक्ष्मेक्षिकया निरीक्षमाणे बलवतां राष्ट्राणां आश्रयः अनुग्रहश्च असाधारणहेतुतां भजन्ते इति प्रतिपद्यामहे।

अद्यत्वे रक्षणासंघे [S.C.O.] दशभ्यः वर्षेभ्यः काश्मीरविवादः नरीनर्ति। तत्रापि सदस्येषु पक्षीयभावना अव्यक्तं अङ्कुरायते इति किंवदन्ती श्रूयते। तादृशवैक्लव्यं माभूदित्याशास्महे। संघटितविश्वराष्ट्रसंघस्य मुख्योऽद्देशः एको वित्तनिधिः [World Bank], एका संस्था, सर्वसमाहारात्मकः एकः विशिष्टः राज्यमारक्रमः इति वर्तते। इदानींतन अणुशक्तिप्रभावेण जगदेव निरन्वयविनाशं कर्तुं उद्यतेषु अस्त्रबलेषु किंकर्तव्यता विमूढस्य लोकस्य इयं संस्था आशाकिरणान् बहुमुखान् वितरन् अभिवर्धताम्। " संघे शक्तिः कलौ युगे "।

कुविन्द–परिश्रमः

(आर्. सुब्रह्मण्यशर्मा)

मानवः प्राणिषु विशिष्ट इति प्रवदन्ति । अस्य वैशिष्ट्यं लोकाचारेषु दरीदृश्य–माण संस्कृतिद्वारा अधिगम्यं भवति । जीवनं सुखमयं विधातुं अनेके उपायाः अनेन आविष्कृता विलसन्ति । चिरादेव बहुमुखेन अभिवृद्धाः उपायाः आर्थिक—पारिश्रामिक—राजकीयादि भेदमभजन् । पारिश्रामिक विभागः इदानींतन नागरिकतायाः मातृस्थानपन्नः । अयं विभागः लोकानामैश्वर्यममि–वर्धयति । निरुद्योगं निस्सारयति, अकर्मण्यतां परिहरति, कर्मठत्वमावहति, आशाश्चाभिवर्धयति, राजकीय—सामाजिकादिक्षेत्रेषु स्वशक्तिमनन्यसाधारणां प्रतिष्ठापयति च ।

पारिश्रमिक विभागे कुविन्दपरिश्रमः अद्वितीयः । आहारानन्तरं वस्त्रं किलादेयम् । कुविन्दः पूर्वकाले कर्षकैः उपहारीकृतं कार्पासं स्वहस्तेनैव समीकृत्य तन्तूनाकृष्य वस्त्राणिवयतिस्म । अनन्तप्रकारोऽयं वस्त्रप्रपञ्चः । सूक्ष्मात् सूक्ष्मतरः, स्थूलात् स्थूलतमश्च । सूक्ष्मतरपटनिर्माणे प्राञ्चः अमानुषं कौशलं प्राकाशयन् । सप्तधापरिवेष्टितोऽपि देहः नग्नेवासीत् कस्याश्चन रमण्याः । इदानीं शर्मण्यदेशे वस्तुप्रदर्शनागारे भारतस्य तादृशं वस्त्रं आलक्ष्यते ।

" युवासुवासाः परिवीत आगात् " इति वेदेभ्यः प्रागेव वस्त्रनिर्मापण कौशलमासीदिति विज्ञायते । प्राच्यावाच्य–पाश्चात्या अपि भारतदेशात् वस्त्र–विशेषानादाय मोदन्ते स्म । मोगल् साम्राज्यपतनानन्तरं आंग्लानां दूरदर्शिता अस्योद्यमस्य चरमगीतमगायत् ।

वयमिदानीं विज्ञानयुगे कार्पास–ऊर्ण–चीना [Silk[–कृतकचीनादिषु [Art-Silk] पदार्थस्वरूपविभागान् सुविशदं अधिगच्छामहे। संक्षेपेण कार्पासस्य सूक्ष्मतरतन्त्वाकर्षणयोग्यता सांसिद्धिकगुणैः अष्टादशधा कीर्तिताः। कार्पास–वृक्षस्य बहवो भेदाः मानवजातेरपि चिरन्तनाः वर्तन्ते।

तन्तुवायस्य कर्म इदानीं विद्युच्छक्तिचालितसाधनैः द्रुततरं निष्पाद्यते। हस्तवयने कतिपयविशेषाः ये वर्तन्ते ते यन्त्रवयने नेदानीमपि आविष्कर्तुं शक्यन्ते। परन्तु प्राचीनकाले जनसंख्या न्यूना आसीत्। इदानीं एकोत्तरवृध्या अविश्रान्तमभिवर्धते। वस्त्राणामाकांक्षा अपि ज्यायसी। तस्मात् हस्तवयन–मिदानीं न शोभते। तथापि वैशिष्ट्यावह–वयन विशेषरिरक्षया हस्तवयन–संप्रदायरक्षणं आवश्यकम्। गौरवमेतदालक्ष्य शासकाः अनेकधा हस्तवयनवृत्तिं रक्षयिष्यन्ति। तथा हस्तनिर्मितपटानां विक्रीणनागाराणि अपि अमेरिका—इंग्लेण्ड् इत्यादि देशेषु संस्थापितानि, येन वयं अभिनन्दनीयं वाणिज्यं प्रवर्तामहे।

प्रथमं १८२१ तमे वर्षे कालीघट्ट समीपे एकः वस्त्रनिर्मापिक यंत्रालयः प्रतिष्ठामवाप। अनन्तरं चत्वारिंशद्वर्षेषु जवेन द्वादशागाराणि तत्र तत्र भारतदेशे प्रतिष्ठां लेभिरे। तदनन्तरं दशवर्षपर्यन्तं यथास्थितिरभूत्। १८७५ तमे वर्षे पञ्चाशत् सहस्रोत्तर सप्तलक्ष तन्तुसमीकरण नालिकाः [Spindles] आसन्, नवति कर्मागारेषु। अनन्तरं त्रिंशद्वर्षेषु चतुः पञ्चाशत् कर्मागाराणि जन्म लेभिरे। प्रथमद्वितीय महायुद्धयोः अस्य अभिवृद्धिः निरन्तरायं प्रववृते, स्पृहणीयोऽर्थलाभश्च समजनि।

१९४७ तमे वर्षे म्लेच्छानां आग्रहेण देशः अविभज्यत। अनेन हेतुना कार्पासोत्पादकप्रदेशाः पाकिस्ताने विलीना बभूवुः। इदानीं ईजिप्ट् जनपदेन सह वाणिज्यविनिमयं चक्रुः। अस्मिन् देशेऽपि वीर्यवत्तरकार्पासमुत्पादयितुं बहून् प्रयत्नानास्थितवन्तः। द्वितीयपाञ्चवार्षिकयोजनावधौ प्रतिव्यक्ति पर्याप्तं–सप्तत्रिंशत् — हस्तपरिमितं वस्त्रं उपहारीकर्तुं शासकाः दृढसंकल्पाः सन्ति।

अस्मिन् देशे आहत्य इदानीं ४६५ कर्मागाराणि सन्ति । चत्वारिंशल्लक्षजनाः अनेनोद्योगेन जीवन्ति । अस्य उद्यमविषये भारतदेशः अनेकेषुविषयेषु केवलं अमेरिका—जपान् देशापेक्षया द्वितीय इति वार्ताभिज्ञैरगणि । शतकोटि–संख्याकमुद्राः प्रतिवर्षं केन्द्रशासनाय करद्रव्यरूपेण आयं आयास्यति । हस्तवयनविधानेन विंशतिलक्षसंख्याकानां वृत्तिः संपत्स्यते ।

सर्वे भद्राणि पश्यंतु — सर्वः सर्वत्र नन्दतु ।

धर्मं भजस्व सततं त्यजभूतहिंसां
सेवस्व साधुपुरुषान् जहिकामशत्रून् ।
अन्यस्य दोषगुणचिन्तनमाशुमुञ्च
सत्यं वदार्चय हरिं भज जन्म लाभम् ॥

—(स्मृतिरत्नाकर)

बहुपत्नीव्रतविमर्शनम्

(दोड्डसंगे वडेयर्)

मानवाः समाजजीविन इत्यतिरोहितम् । समाजं व्यवस्थापयितुमस्य बुद्धि-शक्तिः प्रबलतरा वर्तते । भूतकालिक विषयानाकलय्य भविष्यति संपत्स्यमानान् अभ्यूह्य वर्तमानकाले विद्यमानान् अवस्थाविशेषान् संस्कुरुते । यथाकालं परिष्कुरुते, अथवा विरुद्धान् निराकुरुते च अयमव्यभिचरितो नियमः जीवनस्य सर्वास्ववस्थासु दरीदृश्यते ।

प्राणिनां समाजः पुनः विशिष्टैस्त्रिभिर्विभागैः स्त्री, पुमान् , नपुंसकश्चेति-अर्थक्रियाकारित्वात् सृष्टिवैचित्र्याच्च प्रभवन्ति । स्त्री सर्वस्य सृष्टेः प्रकृतिभूता । प्रकृतिं विना सर्गो नास्ति । पुरुषस्तु केवलं बीजभूतः , अप्रत्यक्षश्च भविष्यति । नपुंसकः पुनः न प्रकृतिर्नैवा बीजम् । बीजानामनिश्चितत्वात् सर्वासां प्रकृतीनां साधारणत्वाच्च तेषां विनियोगः नियमनमपेक्षते । प्राज्ञः समस्यायाः अस्याः गहनतां समालोच्य प्रजासृष्टिक्रमं अविरोधेन, विना संघर्षं च निर्वर्तयितुं उद्वाहं नाम संस्कारं विदधुः । स्त्रियो वा पुरुषा वा प्रजासृष्टिं ये तत्वतः नेच्छन्ति, तेषां ब्रह्मचर्यमेव निःश्रेयसहेतुं उपदिदिशुः । पुरुषस्तु "यावज्जीवं गुरुकुले वसन् देवब्रह्मचर्यं चरेत्" । स्त्री च ब्रह्मचर्येण शुभान् लोकानाप्नुयात् , इति च प्राचीनप्रबन्धेषु पश्यामः ।

प्रजासृष्टिमनिच्छन्तः पुरुषाः स्त्रियश्च बहुभिः कारणैर्भवन्ति । शरीरस्य अनारोग्येण, जन्मान्तरादागतसंस्कारपरिपाकेण, वैराग्येण, नीचोपसरणेन, स्वच्छन्दचारिमनोभावनया च गृहस्थधर्मं नेच्छन्ति । अन्ये पुनः स्वच्छन्द-चारिणः अर्थकामिनश्च देशान्तरेषु स्वेष्टापूर्त्यै यथाकामं चरन्तः सुखं दुःखं वा अनुभवन्ति । स्वभावस्यानतिक्रमणीयत्वात् , व्यवस्थायाः परिवर्तनशीलत्वाच्च

तृतीयः पन्था अपि अभ्यूहिता, निरूपिता च। तत्र पुनः स्त्रियः अविवाहिता स्सन्तः कलाराधनपरायणा भूयासुः। ता वेश्या इति प्रथां लेभिरे। स्वच्छन्द-चारिणी वेश्यात्वं कलाराधनमन्तरेण नाभ्युपगन्तुमर्हति, न वा तादृशगौरवं चार्हति।

स्त्रीजातेः रक्षणाय अन्योमार्गश्च सूचितः। पुरुषाः प्रभविष्णवः अल्पीयांसः एव नियमेन भवन्ति। उष्णवलये स्त्रियोऽधिकसंख्याकाः जायन्ते। परिस्थिति-मेनामाकलय्य श्रीमतां बहवः पत्न्यः स्युः इति बहुपत्नीव्रतमङ्गीकृतवन्तः। अस्मिन् गृहस्थधर्मे गुणा दोषाश्च बहवो भविष्यन्ति, अनुभूयन्ते च। यदि वयं नाभ्युपगच्छामहे बहुपत्नीव्रतं परोक्षेण स क्रमः प्रचलत्येव। श्रीरामचन्द्रः, श्रीकृष्णः, बुद्धः, वेदव्यासः इदानींतन महात्मा-गान्धी च बहुपत्नीव्रत परायणेष्वेव जन्म लेभिरे। नायमुत्सर्गवादः तथापि पुराणपुरुषाः, पुण्य-पुरुषाः, महात्मानोपि बहुपत्नीव्रतं न कदापि निराचक्रुः। वयमिदानीं अन्तरराष्ट्रीय-विज्ञानसंपन्नाः बहुपत्नीव्रतं यदि प्रभुशक्त्या निराकुर्मः तत्रायमपायो जागर्त्येव।

हैन्दवानामेवायं नियमोऽन्वेति, न माहम्मदीयानां, क्रैस्तानाञ्च। माहम्मदा नियमेन बहुपत्नीपरायणा वर्तन्ते। इदानीं भारते माहम्मदा क्रैस्ताश्चाल्पसंख्याकाः वर्तन्ते। यद्यस्मत्पार्श्ववर्ती माहम्मदः चतसृषु पत्नीषु षोडशापत्यानि जनयेत्, एकपत्नीव्रती हिन्दुः चत्वार्यपत्यानि जनयेत्, तर्हि पञ्चाशद्वर्षाभ्यन्तरे त एवाधिकसंख्याका भवन्ति। हिन्दुभ्यः सम्प्रदायेनैव दाम्पत्यविच्छेदः न रोचते। क्रैस्ताः पुनरस्मिन् विषये प्रसिद्धाः। अन्ततः एतादृशनियमैः हिन्दूस्त्रीणां रक्षणं गौरवं च अंशतः यथाकथंचिल्लुप्यते। प्रभविष्णवः पुरुषाः एकपत्नीव्रतनियमिता भविष्यन्ति। इदानींतन विद्याभ्यास-पद्धत्या प्रायशः स्त्रीणांशरीरशक्तिः कुण्ठिता दृश्यते। बह्व्यः स्त्रियः एकपत्नी-व्रतानुगतं गृहस्थधर्मभरं वोढुं न शक्नुवन्ति। अनेका बहुपत्नीव्रतं वा अङ्गीकृत्य स्वीयं जीवनं स्वभावं च सम्मानयितुमिच्छन्तीतिश्रूयते।

अस्मिन् यान्त्रिकयुगे मानिनीनां केवलं गार्हस्थ्यधर्ममेव सर्वदा जीवन सर्वस्वमिति न विधीयते। अकामैरपि उद्योगं आश्रयणीयं अविशेषेण सर्वैश्च स्त्रीपुंभिः — मानवजीवनस्य अनेक श्रृंखलाबन्धनैः सीमितत्वात्। अनेन कर्मचारिण्यः स्त्रियः यद्यपि स्वभावमतिवर्तितुं नशक्नुवन्ति, तथापि कर्मागारे कार्यनिर्वर्तनं गृहकर्मणां आचरणं च परस्परं घर्षणमावहति अन्यतरं हिनस्ति च। न केवलं कर्मागारे कर्मनिर्वर्तनपराणामेव अयं नियमः परंतु संगीत–नाट्यादि-कलाभ्यासतत्पराणामपि एकान्तेन सम्यक् गृहस्थधर्माचरणं साकल्येन न संपद्यते। अत एव चिरंतनाः बहवो बान्धवा एकीभूय वसंतिस्म। इदानीं कुटुम्बिनः समूहजीवनं नाभिनन्दन्ति। व्यष्टिजीवने बहवो दोषाः प्रादुष्यन्ति। "गृहिणी गृहमुच्यते" तस्मात्। बहूनां विषमावस्थानां बहुपत्नीव्रतमनुपदमेव निवारणो-पाय इव वर्तते सम्यगनुसृतश्चेत्; अन्यथा विपरीतफलायैव।

प्रजानां व्यक्तिस्वातन्त्र्यरक्षणं अस्मिन् काले राजकीयव्यवस्थायाः परमं फलम्। अत्र नेतृभिः सूक्ष्मेक्षिकया निरीक्षणीयम्। ये प्रौढास्त्रियः बहुपत्नीव्रत-मिच्छन्ति स्वीयाशक्तेः, अनपत्यदोषात्, प्रभविष्णुरागात्, संस्कारबलात्, गौरवकामनया वा, तेषामवकाशनिराकरणे व्यक्तिस्वातन्त्र्यभङ्गोऽप्यंशतः आपद्यते। परमतीयानां संख्याभिवृद्धेः अनपत्यतादिसंकटेषु आवश्यकत्वात्, आधुनिक विद्याभ्यासवतां अनेकधा रक्षणापादनात् कदाचित्समूहजीविना-मानुकूल्यात्, कर्षकाणां विशेषेणापेक्षितत्वाच्च अच्छमतिभिः बहुपत्नीव्रतं विमर्शनमर्हति।

सन्तति - निरोधः

(सोमशेखर स्वामी)

पूर्वं ऋषयः पुराणेषु प्रजासृष्टिक्रमं सृष्टिमारभ्य वर्णयाञ्चक्रिरे । तत्र "दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि" इति स्त्रियमुद्दिश्य अपत्यदशकप्राप्ति पर्यन्तं आशिषः प्रायुञ्जन् । दशापत्यजननानन्तरं स्त्रियं मातृवत् संमानयेयुरिति स्मृतिकाराः सूचयामासु; केचन "त्यजन्ति भार्यां दशपुत्रमातरं" इति च । संततिस्तु धर्मसंततिः, कामसन्तानमिति च मनीषिभिः द्विविधं निरूपितमस्ति । मनुरस्मिन् विषये निश्शंकं प्रोवाच ।

"यस्मादृणं सन्नयति येनचानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान् विदुः ॥"

विवाहविधिषु "धर्मप्रजार्थमिमां वृणे" इत्यादि वचनानि उदाहृतानि । जनसंख्या यदा अल्पीयसी आसीत् तदा ऋषयः एकस्य अङ्कस्य पार्श्वे पुनरेकाङ्कस्य अङ्केन एकादशसंख्या यथा भवति तथा स्त्रीपुरुषयोः समवायेन एकादशत्वं बहूकृतवन्तः इति उत्प्रेक्षितुं शक्यम् । अतएव धर्मशास्त्रेषु धर्मपत्नी, कामपत्नी, धर्मसन्तानं — कामसन्तानमिति भेदान् पर्यगणयन् ।

जनसंख्या देशस्य महती सम्पत् । कुण्डगोलकादयः प्राधान्येन सैन्यविभागे अवकाशमलभन्त । अपत्यजननं कुटुम्बस्य देशस्य च आवश्यकतामनुरुन्धति । अशक्तस्यगेहे अपत्यबाहुळ्यं महान्तं क्लेशमावहति । एवमेव श्रीमतां गेहे तदभावश्च न मोदावहो भवति । अपत्यानां जननस्य अदृष्टापेक्षितत्वात् तन्निरोधे नियमने च पुरुषस्यैव ज्यैष्ठ्यं वर्तते । अतएव निरपत्यानामपत्यस्वीकारक्रमोऽपि आयुष्मान् अभिनन्द्यते जनैः । सत्येवं, दैवं पुरुषकारं च लोकयात्रां

वहतः, मानवः स्वभावस्य परिणामप्रकारान् स्वप्रयत्नेन निरुन्ध्यात्, परमयं न कदापि असम्भवं सम्भवयितुं समर्थः।

वर्तमान मान्त्रिकयुगे जनानामवकाशः, उद्योगः, नगर वासः, अन्तर-राष्ट्रीय विचाराधिगतिश्च क्रमशः अभिवर्धते। वैद्यसहायसंपत्या अकालमरण-संख्यापि न्यूनीभवति। अतएव शतवर्षेभ्यः भूगोले सर्वेषु देशेषु जनसंख्या पूर्वापेक्षया त्रिगुणिता वर्तते। एवमेव एकोत्तरवृद्धिः यदि स्यात् पञ्चाशत् वर्षा-भ्यन्तरे इतोप्यतिशयेन त्रिगुणितास्याज्जनसंख्या। इदानीमेवाहाराभ्यवहारादिषु महान्क्लेशः अनुभूयते जनैः। सर्वंसहा कियद्वा आहारवस्त्रादिकमुत्पादयेत्। एवं जनसंख्यायाः अतिक्रमः दिने दिने बोभूयते। विशेषेण पौरस्त्येषु, सामान्येन पाश्चात्येषु च आतङ्कमातनोतीयं समस्या। पौष्टिकाहाराभावः, उदात्तध्येयराहित्यं, केवल संकुचितभावनाः, स्वीयउपपत्तिचिन्ताराहित्यं, धर्मश्रद्धाविरहः, केवलपाशवीभावना च सामान्येन अनपेक्षित-प्रजाभिवृध्यै कारणानि।

सन्ततिनिरोधाय प्राज्ञैः आयुर्वेदविहिताः उपायाः वर्तन्ते। योगाङ्गा-भ्यासेषु अयमुपायः "क्रियाविशेषतया" अङ्गीकृतः। धर्मशास्त्रेषु शमदमा इमं विवृण्वन्ति। ज्ञानिनः इन्द्रियनिग्रहं परमोपायं अभिप्रयन्ति। नराणां शौचस्यदुर्लभत्वात् अतीतकालविवाहः, जातिनियमाश्च एकदा जनसंख्या-या नियमने प्राभवन्। इदानीं नियमाभावात् स्वातन्त्र्याभिलाषायाः दुर्वारत्वात् स्वेच्छारतेश्च प्रजासृष्टिः दुर्वारा नरीनर्ति। तस्मात् अधिकारभेदेन इन्द्रियनिग्रहः शमदमान्वयः, योगसाधनाक्रमः, कामशास्त्रीयबन्धविशेषाः, वैद्योपज्ञ-भैषज्यानि, इदानींतन प्रौढा-विवाहः, समाजशास्त्रविज्ञानं, आधुनिक वैज्ञानिकरीतयश्च यथाधिकारं, यथाकालं चोपादाय इमां विपत्तिं सर्वथा तरेयुः। बहवो नक्षत्राः, चन्द्रस्तु एक एव। तस्मात् धर्मसन्तानमेव धर्मं रक्षति इति सर्वं चतुरश्रम्।

क न क पु री

(पि. शिशुपालेन्द्रः)

श्रीमत्परमगंभीर स्याद्वादामोघ लांछनम् ।
जीयात् त्रैलोक्यनाथस्य शासनं जिनशासनम् ॥

भारतदेशे क्रि. पू. ७०० वर्षेभ्यः प्राक् लोकानाम् हितेच्छया चतुर्विंशतितमः तीर्थंकरः प्रकृतिसौन्दर्यमनोहरे मगधदेशे वैशालीनगरे अवातरत् । अस्य पितुर्नाम सिद्धार्थः माता च प्रियकारिणी । अस्य जन्म लोकानाम् तारणाय तथैव मङ्गलाय च बभूव । प्राणिदयां सर्वधर्माणाम् अभ्यर्हिततमाम् व्याचख्यौ । वेदमार्गानुयायिभिः यागानुष्ठानव्याजेन क्रियमाणाम् पशुहिंसाम् आयत्यां अनिष्टावहां युक्तिभिः प्रमाणैश्च न्यरौत्सीत् । संसारविमोचनाय सागारधर्मं अनागारधर्मं च विभिन्नरूपेण यथाधिकारं दिदेश । यतिधर्मेषु अवान्तरधर्मांश्च समसूचयत् । पशुहिंसा सर्वास्ववस्थासु असमीचीना, स्वभावविरुद्धा चेति प्रत्यपादयत् । सृष्टेः क्रमस्य अनादित्वं प्रलयानाम् पर्यायत्वं च उपपादयामास । ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्रमान् अनुमेने । अधिकार-भेदेन आश्रमेषु नियमभेदांश्च उररीचकार । दुष्कर्मिणां सुकृतिनां च अनुभाव्यानि लोकान्तराणि यथा संप्रदायं उपवर्णयामास । परहिंसामपहाय यथोचितवृत्तीराश्रित्य जीविकां निर्वर्तयन्तु इति निरदिशत् ।

जन्मना देहभेदेऽपि योग्यतां प्राधान्येन अङ्गीकृत्य जीवात्मनां सर्वेषां मोक्षयोग्यतां अमानयत् । बंधमोक्षयोः कर्मैकमेव हेतुरिति उदीरयामास । कर्माणि कर्मभिरेव रूपान्तरं भजन्ते । अन्ततः विनश्यन्ति इति च कर्माचरणस्य

वैशिष्ठ्यं विशदीचकार। एतेन पुरुषस्य स्वातन्त्र्यं सत्कर्माचरणेषु प्रवृत्तिं च प्रचोदयामास। तथाऽपि एकं ईश्वरं जगतः नानुमन्यत। सर्वज्ञत्वं सर्वशक्तित्वं च जीवात्मनः निष्ठया प्रयत्नेन गुर्वनुग्रहेण च कालक्रमेण प्राप्याणीति सिद्धान्तयामास। अस्य महाशयस्य उपदेशेन बहवो ब्राह्मणाः ज्ञानिनश्च अस्य मतं अङ्गीचक्रुः। सर्वेषां अविशेषेण तीर्थंकरत्वप्राप्तिः संभवेदित्युद्घोषयत्। तेषां अनया धोरण्या एकेश्वरवादस्य निरवकाशः अभूत्। शिष्यप्रशिष्यैः बहवो ग्रंथाः एतदीय मतनिरूपणाय आरचयिष्यन्त। अनेके राजानः जिनधर्मपरायणाः रेजिरे। एवं तीर्थंकरमूर्तिः महावीर नाम्ना जगति प्रतिष्ठां लेभे। तेषु उत्तर–मधुरानगरतः सहकारराजस्य पुत्रः जिनदत्तः दैववशात् विषमां दशामापन्नः देशान्तरं जिगमिषुरासीत्। तत्वदर्शिभिः गुरुभिः प्रेरितः दक्षिणाशां परुष–पद्मावतीमूर्तिमादाय प्रतस्थे। गुरूपदिष्टमार्गेण युक्त्या च शत्रून् वंचयित्वा अनेन सुदूरमध्वा लंघितः। गत्वा गत्वा कर्नाटजनपदे अनेक तरुगुल्मलताभि-रुपशोभिते काननप्रदेशे नगरं निर्माय "कनकपुरी" इति अभिख्यां विदधे। राज्यं च विस्तारयामास। मधुरानगरात् आनीतां परुषपद्मावतीं प्रतिष्ठापयत्। कालकर्मसंयोगेन आपतितासु घटनासु सा मूर्तिः तिरोहिता अभूत्। अनन्तरं पद्मावतीमूर्त्तिं अन्यां परिकल्प्य अपूपुजत् या अद्यापि विराजते। जैन–संप्रदायानुरोधेन इयं देवी यक्षिणी पार्श्वनाथस्य। सर्वे जनाः शैवा वैष्णवाश्च अविशेषेण पद्मावतीं सेवन्ते। कुमुद्वती नदी अस्मात् स्थानात् निस्सरति। "मुक्तातटाकः" जिनदत्तेन निरमायि यस्मिन्नशोष्यं जलं इदानीमपि वर्तते। एतत् त्रयं अस्य क्षेत्रस्य महिम्नः मकुटत्रयमिव अवभासते।

जैनानां उदीचां दाक्षिणात्यानां च इदं यात्राक्षेत्रम्। सिद्धान्तकीर्त्तिर्नामा जिनयतिः जिनदत्तराज्ञः गुरुरासीत्। तस्य स्थानम् परंपरया जैनसंप्रदायस्य पीठो बभूव। अद्यापि श्री श्री 'देवेन्द्रकीर्ति' नामा यतिः इमं पीठं अलङ्करोति। अप्रसिद्धोऽयं ग्रामः पद्मावतीनाम्ना विभिन्नप्रान्तेषु सुप्रसिद्धः वर्तते। नित्योत्सव पक्षोत्सव मासोत्सवाः क्रमशः पद्मावत्याः मन्दिरे अनुष्ठीयन्ते। मन्दिरे वार्षिकोत्सवः-रथोत्सवः फाल्गुनमासे मूलानक्षत्रे प्रवर्तते। देवालये इष्टार्थदाय–

कानि यन्त्राणि अर्चकाः वितरन्ति, यैः श्रद्धावद्भिः प्रत्यक्षफलमनुभूयते । एकदा पण्डितानां आवासभूमिरासीत् । पूर्वं कनकनुरी इति अभिख्या आसीत् — परुषपद्मावत्याः महिम्ना अयःखण्डाः सुवर्णभावेन यत्र पर्यवर्तन्त । अस्माद्धेतोः कर्नाटकभाषायां "होम्बुज" इति आख्या प्रावर्तत । "होन्नु" इत्यस्य सुवर्णमित्यर्थः अनन्तरमपभ्रंशरूपेण "पोम्बुच्च" इति, तदनु "होम्बुज" इदानीं "हुंच" इति आहूयते अयं ग्रामः । अधुनातन राजकीय व्यवस्थानुरोधेन शिवमोग्गामण्डले होसनगरविभागे इदं क्षेत्रं लब्धपदमास्ते ।

दिगंबर जैनसंप्रदायमनुसरतामेव अयं मठः, प्रभावशालिभिः यति-भिरधिष्ठितः आसीत् । इदानीं अस्य मठस्य शाखा मठः मङ्गळूरु-मण्डलान्तर्गत वरङ्गक्षेत्रे वर्तते । विशाल-मैसूरु-प्रान्त-निर्वाचनानन्तरं पूर्वकाले उपचिताः व्यत्यासा अपि तनुतामवापुः । सामान्येन वार्षिको आयः मठस्य पञ्चविंशति सहस्ररूप्यकाणि स्युः । शिष्याः नितरां धनिनोपि उत्तरभारते वर्तन्ते । यदि स्वामिनः प्रजाश्च लोकहितं धर्माभिवृद्धिं प्रचारं—चेच्छेयुः इदं क्षेत्रं तत्वतः विश्वविद्यालयपदवीमाप्नुयात् ।

वे ला पु री

(वै. नारायण शर्मा)

पवित्रतमे अस्मिन् भारतदेशे पुराणप्रसिद्धपवित्रक्षेत्राणि बहवो विराजन्ते । तेषु वेलापुरीति (इदानींतन बेलूर्) पवित्रं क्षेत्रं बहुभिर्विशेषहेतुभिः विशिष्टमपि विश्वेषामपरिचितमिवालक्ष्यते । पुराणकथासु प्रथितं — इतिहास वैशिष्ट्यंचावाप्य इदानीमपि नेत्रासेचनक शिल्पकलापरिपूर्णमिदं राराजते ।

पूर्वं भस्मासुरो नाम राक्षसः आसीत् । सः अनन्यसाधारणं वरमन्विच्छन् शिवं प्रति तपस्तेपे । तपसा प्रसन्नः शिवः आविरभूत् । "वरं प्रार्थय" इत्यादिष्टः भस्मासुरः "यस्योपरि मम हस्तं निक्षिपामि सः अनुपदमेव म्रियतु" इति वरं वव्रे । ईश्वरः "ओमित्युवाच" । विधिग्रस्तः भस्मासुरः शिवस्य–मस्तकोपरि स्वहस्तं निक्षिप्य वरं परीक्षितुं उदयुंक्त । सत्यसन्धः शिवः धर्म–संकटे निमग्नः विपन्नस्सन् प्रपन्नं विष्णुं सस्मार । विष्णुरपि मार्गान्तरमलभमानः मोहिनीरूपेण अवततार । कपटमोहिनीविलासमोहितः भस्मासुरः शिवं त्यक्त्वा तामनुससार । प्रणयभिक्षां च ययाचे । मोहिनी स्वदीक्षां भस्मासुराय निवेदयामास "मत्समान–नाट्यदक्षमेवाहमङ्गीकरोमि" इति । मोहितः तस्याः नाट्य-भङ्ग्यनुकरणं प्रारभत । क्रमेण द्रुततरं मोहिनीपादहस्तविन्यासैः करण–अङ्गहारादीन् सगीताभिनयं प्रायुङ्क्त । एकस्यां भङ्ग्यां स्वमस्तकोपरिस्वहस्तं विन्यस्तवत् । अनुकुर्वाणः अयमपि स्वमस्तकोपरि स्वहस्तं न्यस्तवान् । शिवस्य वरानुरोधेन भस्मासुरः भस्मसात् बभूव । अस्य वृत्तान्तस्य ज्ञापनाय मोहिनीस्वरूपस्य भगवतः देवालयः भक्तैः निरमायि । गच्छताकालेन बहूनि परिवर्तनानि अभवन् । सहस्रवर्षेभ्यः प्राक् श्रीरामानुजाचार्येभ्यः विष्णुदीक्षां स्वीकृतस्य विष्णुवर्धनस्य आयोजनेन विविधकलापरिपूर्णः देवालयः निर्मित आसीत् । तस्य

महिषी शान्तलादेवी संगीते, नाट्ये, निपुणा भरतकलाप्रदीपेति नाट्यसरस्वतीति च प्रसिद्धा आसीत् । गीत–नाट्यैः भगवन्तमानर्च । भगवदुपासनेषु अय–मन्यतमोमार्गः । तस्याः माता जैनमतानुयायिनी आसीत्, पिता शैवः । शास्त्रज्ञा–कलाभिज्ञा च महिषी राजकार्येषु विष्णुवर्धनाय सहयोगमाततान । तया शैवमन्दिराणि, विष्णुदेवालयाः, जैनदेवालयाश्च अविशेषेण औदार्येण निर्मिताः इति शासनेषु उपश्लोकितम् ।

कर्नाटकभाषायां ''चेन्न'' इति पदस्य सुन्दरमित्यर्थः । अस्य क्षेत्रस्य अधिदैवं चेन्नकेशवः । यदा विष्णुवर्धनः पाञ्चरात्रागमसन्दब्धं देवालयं निर्मिमीषुरासीत् तदा देवालयपरिसर प्रदेशाः हरिजनानां वशे अवर्तन्त । 'वेल' 'चेन्न' इति द्वौ हरिजनप्रमुखावास्ताम् । ताभ्यामयं प्रदेशः आलयनिर्माणाय समर्पितः । तेषां नाम शाश्वतं भूयादिति प्राकारभित्तिशिल्पेषु तयोः मूर्ती निर्मिते । एकस्य नाम्ना ''वेलापुरी'' इति नगरनामा अन्यस्य नाम्ना ''चेन्न–केशव'' इति देवतानामा एवं द्वयोर्नाम्नी ख्यापिते । मोहिनीरूपी केशवः आकण्ठं पुरुषाकारेण विराजते । कण्ठोपरि स्त्रीसौन्दर्यं विभ्राजते । देवालय–निर्माणानन्तरं प्रतिवर्षं दिनत्रयं हरिजनानां प्रवेशः अनुमतः । पार्श्वे विष्णुसमुद्रो नामतटाको वर्तते यस्मिन् समुद्रप्रख्याः शंखाः जायन्ते । जकणाचार्यनामा शिल्पिः अनेकैः सहयोगिभिस्सह असमानकलानैपुण्यं देवालय निर्माणे प्रदर्शयामास । अष्टादशशिल्पिनः नामानि तत्र तत्र शिलाशिल्पानामधः निर्दिष्टाः वर्तन्ते । देवालयस्य पीठबन्धः सप्तविंशत्कोणात्मकः पाञ्चरात्रागमतत्वसंख्यां निवेदयति । शिल्पेषु सप्तपंक्तयः सप्तव्याहृतीः आवेदयन्ति । प्रायशः —

परिमितमपरिमितानां आस्पदमेतत्प्रपञ्चचित्राणाम् ।
दहरगगनावकाशं दिव्यं पुरुषं निरूपयति ।

पौराणिकविषयाः भित्तिषु विस्पष्टं दृश्यन्ते । विलासवैखरी स्त्रीणां सुविशदं सुमधुरं च विराजते । स्त्रीसैनिकानां दर्पश्च निभृतं विद्योतते । मानवजीवन–

घटनाविशेषाः प्रत्यक्षीकृता इव वर्तन्ते। प्राणिनः सजीवा इव स्वभावसौंदर्येण मुद्रिताः। कामशास्त्रीयबन्धविशेषाश्च तत्र तत्र शिल्पकलानैपुण्येन उपहारीकृताः, विष्णोः दशावताराः, तथा शिवस्य, दुर्गायाः, गणपतेः रूपविशेषा तान्त्रिक-सम्प्रदायानुरोधेन तेषां प्रतीकाश्च सुविशदं चित्रिताः राजन्ते। राजकीयव्यवहारे परदेशीयानां समागमश्च उपदर्शितः। उपरिभागे शिल्पविशेषाः अवर्तन्त। पञ्चाशदुत्तरशतवर्षेभ्भः पूर्वं शिल्पीनामनुरोधेन देवालयस्य भारेण अपाय-शंकया स भागः उत्पाटितः। तस्मात् वयमिदानीं वंचिताः तच्छिल्पसौन्दर्येण। शान्तलादेव्याः नाट्यसंघं ज्ञापयितुं द्वात्रिंशत् नर्तक्यः द्वौ क्लीबौ च चित्रिताः। शान्तलां ज्ञापयितुं नाट्यसरस्वतीविग्रहः निर्मितो वर्तते।

विश्वप्रीणन विश्वकर्मरचना चातुर्यकातर्यदैः
शिल्पैः कल्पयतीव मण्डनमसौ चेतस्थितेर्मण्डपः।
रत्नस्तंभभुवोपि रश्मय इमे सोपान गोपानसी
मध्यं यत्र गवाक्षयन्ति विहित प्रत्यग्र चित्रक्रमाः॥

कलाभिः भगवदुपासनं अत्र मुख्योद्देशः वरीवर्ति। शिल्पिनः कला-चातुर्येण देवालयं निर्माय भगवन्तमाराधयन्। राजा अस्मिन् कर्मणि निमित्तो भूत्वा भेजे। महिषी शान्तलादेवी पुनः स्वयं गानेन नाट्येन च भगवन्त-मतर्पयत्। प्रजाः कलासौन्दर्यसन्दर्शनेन आलये प्रवर्तिष्यमाण उत्सवेषु अन्वयेन च भजन्ति। एवं अत्र भगवदुपासनं बहुमुखं यथाधिकारं प्रवर्तते।

आर्थिक—समस्या

(बि. जे. गणपति)

मानवैरनुभूयमानासु समस्यासु आर्थिकसमस्या नितरां गरीयसी चकास्ति। दैनन्दिन जीवने अस्य प्रभावः सर्वास्ववस्थासु सर्वेषु कार्येषु च अविनाभाव सम्बन्धेन अनुस्यूतः। सामान्येन पदार्थानां अर्घपरिवर्तनं सर्वेषां गोचरी भवति। पदार्थानामुत्पत्त्यनुरोधेन तेषामर्घस्य व्यत्यासः स्वाभाविकोऽपि वाणिज्य-प्रकारेण, नियमेन अधिको वा न्यूनो वा भवति। अर्थः शासकवर्गस्य करविधान-प्रकारंचानुसरति। उदाहरणार्थं शर्करायाः कृतकमर्घं वयमिदानीमनुभवामः। वणिजः कुसीदवृत्तिमुपजीव्य प्रवर्तमानेभ्यः निधिभ्यः धनं गृहीत्वा पदार्थान् एकपदे क्रीणन्ति। अनन्तरं तानेव संगृह्य पुनः प्रजाभ्यः कियत्कालपर्यन्तं नैव विक्रीणन्ति। कदाचित् लोभेन निगूहयन्ति च। अनेन पदार्थानामर्घः अभिवर्धते। वणिजः अनेन क्रमेण अन्याय्यं लाभं विन्दन्ते। एवं पदार्थाना-मुत्पत्तिः वाणिज्यप्रकारः शासकानां करविधानं वणिजां लोभश्च पदार्थानां अर्घव्यत्यासे प्रधानानि कारणानि भवन्ति।

अन्यच्च, देशस्य आय—व्यययोः—व्ययाधिक्यात् धनह्रासो भविष्यति। तत्पूरणाय अनेकरूपैः करान् विधित्सन्ति शासकाः। अथवा विदेशेभ्यः ऋणा-दानेन धनं वा पदार्थान् वा देशं अधमर्णतां नयन्ति। करविधानं, स्वदेशीयेभ्यः विदेशीयेभ्यो वा ऋणादानंच कष्टतरं भवति। तस्मात् देशे प्रचलिष्यमाण नाण्य-जातमेव यथेच्छं मुद्रयित्वा प्रजाभ्यो वितरन्ति। इयं कृतकाभिवृद्धिर्धनस्य मौल्यं ह्रासयति। पदार्थानां अर्घमभिवर्धयति। सामान्यानां प्रजानां जीवनं पीडयति। लोभिनां वणिजां च आयं, अकाण्डे वसुमतां च प्रापयति। यदा कृतकाभिवृद्धिः निरुध्यते अथवा हीयते तदा पुनः समस्थितिं पदार्थानां

अर्घस्य अनुभवामः। एतैः कारणैः स्वाभाविक व्यसनापेक्षया मानवकल्पित आर्थिकानि व्यसनानि प्रजाः नितरां पीडयन्तीति सुवचम्।

अतीते विश्वसंग्रामसमये आर्थिकव्यवस्था प्रायेण सर्वत्र अस्तव्यस्ता आसीत्। तेन जीवनमेव कलुषितमभूत्। तथापि धनस्य कृतकाभिवृद्धि महिम्ना वंशपारम्पर्येण ये अधमर्णा एव आसन् कर्षकाः अन्ये च कर्मचारिणः ते चिरन्तन ऋणैः एकप्रहारेण मुमुचुः। अयमेको गुणः कृतकाभिवृद्धेः धनस्य। एतेन कुसीदवृत्तिमाश्रित्य प्रवर्तमानानि कोशागाराणि श्रीमन्तश्च नितान्तं धनिका भविष्यन्ति। धनस्य केन्द्रीकरणात् वणिजां श्रीमतां कर्मचारिणां कर्षकाणां च यो विद्यमानः अन्तरः सः विकृतिमेति। फलतः वैमनस्यं, असहकारः, अशान्तिः, अन्ततो घर्षणं च पदं धत्ते।

द्वितीय विश्वसंग्रामे पश्चिमदेशेषु कृतकाभिवृद्धिरभूत्। तेन महान् क्लेशः तज्जनपदीयैः अन्वभावि। अन्तरराष्ट्रीय वार्तायां विनिमयप्रतिबन्धः वणिजः क्लेशयति। कर्षकानास्कन्दति। सार्वदेशिकं नाण्यं सुवर्णमेकं वर्तते। सुवर्ण–नाण्यानि विनिमयसाधनतया वितरितुं बहूनि राष्ट्राणि असमर्थान्येव। तस्मात् कृतकाभिवृद्धिसमये तत्समानं सुवर्णं कोशागारे न्यासरूपेण निधाय कृतकाभि–वृद्धिर्निर्वर्तनीया। देशस्य आर्थिकस्थैर्यं वाणिज्यमवलम्बते। अद्यत्वे विशेषेण अन्तरराष्ट्रीयवार्तां नितान्तं आश्रयते। देशीयानां जनसंख्या पदार्थानामावश्यकता अन्तरराष्ट्रीयविनिमयस्य परिस्थितिः सुवर्णसंपच्च आकलय्य कृतकाभिवृद्धिः विधेया। अन्यथा प्रजानां जीवनक्षोभः अपरिहरणीयस्स्यात्।

वयमिदानीं यान्त्रिकयुगस्य बाल्ये स्मः। विदेशीयसहकारमन्तरा अस्म–देशीयपारिश्रामिक विभागः न प्रवर्तते। विदेशीय पदार्थैस्सह स्पर्धाप्यशक्या–

प्रकृते । अस्मदीय परिश्रमनिष्पन्नाः पदार्था अपि विदेशीय पदार्थापेक्षया दार्ढ्येन अवरा वर्तन्ते । शासकाः द्वितीयपञ्चवार्षिकयोजनायां चतुश्शतकोटिपरिमित–मुद्राः कृतकाभिवृद्धिक्रमेण पूरयितुमिच्छन्तीति शुश्रुम । संक्षेपेण विदेशीय-पदार्थानां स्पर्धा निरोद्धव्या । अनेन पारिश्रामिकविभागः रक्षितो भवति । वाणिज्यपरिस्थितिमनुरुध्य यथा प्रजापीडा न भवेत् तथा नाण्यनिर्माणं, कर–विधानं कृतकाभिवृद्धिश्च अर्थशास्त्रज्ञैः विधातव्या । तथैव स्वतन्त्र [Free Trade] अनिरुद्ध वार्ताव्याजेन विदेशीयैः सम्भविष्यमाणाः प्रतिकूल–परिस्थितीरपि यथा समयं समाधेयं येन अस्मद्देशस्य आर्थिकाभिवृद्धिः गौरवं च रक्ष्येत । "अर्थस्सर्वार्थ–साधकः" ।

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ॥

माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुते ह्यालापमात्रं सुहृत्
तस्मादर्थमुपार्जय प्रिय सखे अर्थेन सर्वे वशाः ॥

प्रतिकिरणोपयोगः

(वि. के. नविलगुन्दः)

स्वबुद्धिशक्तया नियमविशेषानारचय्य स्वयं यथासमयं अनुसरन् इतरानपि तस्मिन् मार्गे यः नेतुं समर्थः स एव मानव इत्यभिधीयते। अयं न केवलं सचेतनानां व्यापारान् निर्दिष्टे पथि प्रेरयितुमलम्। जडपदार्थान् तत्वानि च स्वमनीषितक्रमानुरोधेन सञ्चालयति। येन युक्तिक्रमेण प्रकृति–साम्राज्यं यथामनीषितं उपयुज्यते, तत्क्रमस्य परिभाषा अद्यत्वे ''विज्ञानम्'' इति विश्वजनीनम्।

प्राञ्चः विश्वस्य मूलकारणं ब्रह्म इति आस्थितवन्तः। तदनु सृष्टि–स्थिति–प्रलयानां निर्वहणे जडाजडेषु तत्वेषु नियमनशक्तिरूपेण अविश्रान्तं प्रवहन्तीं प्राणशक्तिं अभिदधुः। अनेकैः पदैरियं शक्तिरनूद्यते। आधुनिकाः विश्व–व्यापिनीमिमां द्विविधां निरीक्षण–परीक्षणैरधिजग्मुः। एका विधिरूपा, अन्या निषेधरूपा [Positive and Negative] उभे अपि नित्ये, अनादी, अनन्ते, सर्वव्यापिन्यौ च। अनयोः जननी आकर्षणशक्तिः अस्याः अवगतिः पूर्वेषां आसीत्। इमामेव धृतिः धारणशक्तिरिति च सम्बोधयन्। चन्द्र–सूर्यादयो ग्रहाः अनया प्रतिबद्धाः यथा नियमं खगोले भ्रमन्ति —

" द्यौ स्स चन्द्रार्कनक्षत्रं खंदिशो भूर्महोदधिः।
वासुदेवस्य वीर्येण विधृतानि महात्मनः।"

इत्येवं आकर्षणशक्तिरभिवर्णिता।

प्रकृते विश्वव्यापिनीशक्तिः अखण्डा सती निरीक्षण–परीक्षणैः आकर्षण–शक्तिरूपेण गृह्यते। ततः विधिनिषेधरूपिण्यो शक्ती आविष्क्रियेते। उभयोः

संयोगेन विद्युच्छक्तिः महाप्रभावा स्थूलरूपेणाभिव्यज्यते । परिवर्तनयुक्त्या च औष्ण्यम्, तेजः, दहनश्चेति स्थूलाकाराः अनुभूयन्ते । एवं स्थूलात्सूक्ष्म–शक्त्यवगतिः सूक्ष्मात् स्थूलशक्तीनां अभिव्यक्तिश्च सांसिद्धिकी राजते । विद्युच्छक्तेरुत्पत्तिः तैलयन्त्रैः, बाष्पयन्त्रैश्च वेगमुत्पाद्य वेगनुन्नैः चक्रभ्रमणैः चुम्बकसान्निध्याच्च भवति । अत एव जलपातेषु प्रवहन्तं जलवेगं उपयुज्य चक्राणि भ्रामयित्वा विद्युच्छक्तिमुत्पादयन्ति । ततः विद्युन्माध्यमद्वारा तत्तत्कार्यनिर्वहणाय वाहयन्ति । कर्णाटकजनपदे शिवनसमुद्रे जोग् जलपाते च निपुणतरमयं क्रमः प्रवर्तते ।

द्विशतवर्षेभ्यः बहुसंख्याकानां विज्ञानिनामविरतप्रयत्नेन भौतिकशास्त्र–विज्ञानं, निरीक्षण–परीक्षण प्रकाराश्च अपरिमेया इव भान्ति । प्रतिवर्षं गवेषणा-धुरन्धरैः नूतनशक्तीनामाविष्करणेन ऊहातिलङ्घिनी शक्तिः मानवमुपसेवते । उपकारेणाभिगम्यापि प्रमादेन दुरुपयोगे परमभीकरा च । विज्ञानं उपायं अपायं च आवेदयति । खगोलस्थितेः परीक्षणं कृतकग्रहप्रेषणेन प्रचाल्यते विज्ञानिभिः । अग्निगोलकनिर्माणकौशलं पुराणेषूपवर्णितानि आग्नेयब्रह्मशिरो–नामकादीनि अस्त्राणि स्मारयति । अचिरेणैव कालेन अणुशक्तिमहिम्ना उपयोगेन च चन्द्राङ्गारकादीन् ग्रहान् प्रति जिगमिषा सम्भाव्यते । गोलान्तरैः अनवरत मार्गामिष्यमाण किरण सन्दोहेन, तेषां परस्पर सम्मिश्रणेन च अनन्तजातीयानि किरणानि निष्पाद्यन्ते । अधुनातन वैज्ञानिकाविष्करणैः प्रतिवर्षमुपचीयमान विज्ञानप्रगतेः समालोचनायां च विद्युच्छक्तिः स्थूलरूपं भजते ।

प्रयोजनदृष्ट्या विद्युत्किरणानि प्राणिनां शरीरेषु विद्यमान विद्युता योजितानि प्रवहन्तः निर्दिष्टप्रमाणेन रोगान्निवारयन्ति । वातादिदोषजनित स्थूलविकारान् प्रशमयन्ति । तत्र तत्र प्रवृद्धान् दुर्मांसादीन् दहन्ति । अनेकैः पारिभाषिकपदैः अस्य रूपभेदं, उपयोगं च अभिवर्णयन्ति भिषजः । प्रति–

[४९ तमे पृष्ठे पश्यन्तु]

साधकः

(जि. नटराजन्)

तत्वज्ञानं प्रधानं समेषां ज्ञानिनाम्। भारतदेशे प्राचां भावनाप्रकर्षः सर्व-संग्रहात्मकः, समष्टिदृष्टिमालम्ब्यैव प्रावर्तत। संक्षेपेण तेषामखण्डतात्पर्य-मधिगन्तुं केचन नियमाः सुविशदं अनुसन्धेयाः वर्तन्ते। प्रथमं अशेषस्यास्य विश्वस्य नियामकः, अन्तर्यामी, सर्वशक्तः, सर्वज्ञश्च, एकः परमात्मा अस्तीति अभ्युपगन्तव्यम्। सर्वेषु पदार्थेषु सर्वत्र समानतया व्याप्तस्सन् जडाजडयोः अशेषाणां परिणामानां व्यापाराणां च परमकारणभूतः सलिलमिव बीजाङ्कुराणां अव्यभिचरितं निदानं आस्ते। यावत्पर्यन्तं सर्वस्य विश्वस्य परमात्माधीनतां तथैव व्यक्तेः व्यारारणां च मानवः न अनुसन्धत्ते तावदयं अहं—मदीयं–मम इत्यादिरूपेण अभिमानेन व्यवहरति, मनुते, अनुभवति, परेभ्यः उपदिशति च। अनेन स्वयं क्लिश्यति यथासमयं इतरानपि क्लेशयति। यदायं मानवः परमात्मानं, विश्वं, तत्स्वरूपं च सुविशदं अनुसन्दधाति आत्मानात्मनोः तात्विकं स्वरूपं अधीनतां च परस्परं अवगच्छति, तथा ज्ञातव्यं नावशिष्यते। सर्वं ब्रह्मात्मकमिति अधिगच्छन् अयं साधकः स्वनिष्ठान् अनीश्वरान् गुणान् व्यपोहति।

संकुचित अहंकारभावनानां व्यपोहनेन स्वरूपस्य साक्षात्कारात्मकं ज्ञानं क्रमशः परिपाकानुसारेण अवभासते। अयमध्यात्मविकासः स्वपरभेदं अतात्विकमावेदयति। जडाजडयोरपि ऐक्यं तत्वतः दर्शयति। प्रकृतिविलास-भूते अस्मिन्प्रपञ्चे सर्वेषु विषयेषु आनन्दमनुभावयति। सर्वास्ववस्थासु साधकः सच्चिदानन्दांशेषु अंशत्र्यमपि साकल्येन परिशीलयति। सामान्य इव न कदापि एकांशमात्रमाकलयति। आनन्दांशस्य अनुभवैकसमधिगम्यस्य वेदनेन

सर्वकर्मसु विद्यासु कलासु च तत्परो विश्वमशेषं "सत्यं शिवं सुन्दरं" अधिगच्छति। बन्धनहेतुषु बाह्यव्यापारेषु निर्लिप्तः अयं साधकः व्यवहारदृष्ट्या अखिलानि लोकहिताय स्वांतरङ्ग परिशुध्यै च कर्माणि आचरति। कर्मानु–सरणेन विगत कल्मषः " स्वयं–ज्योतिरुपसंपद्यस्वेनरूपेणाभिसम्पद्यते " इति श्रुत्युक्तरीत्या गुणाष्टकाविर्भावेन स्वात्मानन्दमनुभवति।

अहिंसासत्यास्तेय–ब्रह्मचर्यापरिग्रहाः अस्य जीवनस्य अलंकारभूताः गुणाः विकसन्ति। तपस्स्वाध्याय ईश्वरप्रणिधानानि साध्यावस्थायां साधनभूतानि सिद्धावस्थायां आदर्शभूमिमापद्यन्ते। सर्वभूतहितेरतिः अस्यस्वाभाविकी प्रवृत्तिः। स्वस्वरूपानुसन्धानं महाव्रतं–अस्य अखिलमायुः ज्ञानसत्वं स्वपरतारकं च। आत्मगुणविकासेन प्रफुल्लः लोकहितदीक्षया परिश्रमी कर्मयोगानुसरणेन शिष्टानां वत्सलः, अज्ञानां बोधकः, जिज्ञासूनां अभिगम्यः, फलवृक्ष इव सर्वेषु–प्राणिषु स्वीयव्यापारैः त्रिकरणोद्भूतैः विश्वात्मकत्वं विस्तारयन् लोकानां कामधेनुरिव राराजते।

"यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्समहेश्वरः॥ "

—*—

यश्च मूढतमो लोके यश्च बुद्धेः परं गतः।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः॥

॥ ॐ ॥

श्री स्वामी चिन्मयानन्दः

(-वीरराघवाचार्यः)

"पूर्वापरापरामृष्टः शब्दोऽन्यां कुरुते मतिम्" इति मनीषिणो निजगदुः। पूर्वापरविषयाणां परिशीलनं सर्वेष्वपि विषयेषु समानतया अन्वेति। स्वामी चिन्मयानन्द–यतिः अशेषे भारतदेशे पर्यटन् प्रधानेषु नगरेषु सर्वाधिकारान् "ज्ञानयज्ञान्" यजते याजयति च। अनेन यजनेन सर्वासु प्रजासु विशेषेण युवसु समवायेनावस्थितामपि विस्मृतप्रायां भारतीय–संस्कृतिं स्ववाङ्मुखीनधाराभिराप्लावयति प्रसुप्तावस्थायाः उद्बोधयति च। "सर्वोहि शास्त्रार्थः पुरुषार्थपर्यवसायी न स्वरूपनिष्ठः" इति राद्धान्तः सर्वसंमतः वर्तते।

आपाततः ज्ञनयज्ञानां यजनं न नित्यं न वा नैमित्तिकं काम्यं वा विधिवाक्यैर्विहितमुत्पश्यामः। तत्वतः विचार्यमाणे इदं यजनं "स्वाध्यायो अध्येतव्यः" इति विधिविहितमेव; यतः सर्वप्रकारं ज्ञानार्जनं अयं विधिरन्तर्भावयति। तथैव काम्यमपि भवति नैमित्तकत्वं च यथावसरं अधिकारभेदेन अनुभवति। सर्वेषां पुरुषार्थानां प्रापकं च। "सहयज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः" इत्यादिभिर्वचनैरनूदितं च। अस्य यजनस्य स्वरूपं प्रकारं परिणामं च साकल्येन अधिजिगमिषुभिः अस्य पूर्ववृत्तं संक्षेपण अधिगन्तव्यं भवति। परमिदं बहुविस्तारं ऋषीणां पण्डितानां योगिनां च विचारधारासु परस्सहस्र–वर्षेभ्यः अनेकरूपैः प्रफुल्लितं आस्ते। अस्मिन्ननुबन्धे इतिहासरूपेण पूर्वपीठिकां ज्ञानयज्ञानां विशदप्रतिपत्त्यै अनुसंदधामः।

पुराणवाङ्मये चिरन्तनानां मानवानां जीवनप्रकारः समाजरचनायां तत्तत्कालिकव्यवस्थाश्च समुपवर्णिताः दृश्यन्ते। परिवर्तनशीलेऽस्मिन् संसारे सर्वे व्यवहाराः, अशेषा नियमा, अनेका व्यवस्थाः तथा नीतयश्च प्रवाह–रूपेण परिवर्तन्ते। तथापि सामान्यानां मनोभावनाः, पण्डितानां विमर्शन–धोरिणी, ज्ञानिनां दूरदृष्टिः, अभियुक्तानां धर्मनिरूपणानि च विमर्शनमर्हन्ति। इतिहासकालेऽपि परिस्थितिः नैकरूपा बभूव। मानवस्वभावः, प्रकृतिविलास-मनुसरति, परिवर्तनशीलता च विश्वस्य अपरिहरणीयतया अस्मान् अभिभवति। यद्यपि चातुराश्रम्यनियमानुसारेण जीवनवृत्तिषु स्पर्धा, संघर्षो वा समाजे नासीदिति सम्भावयामः। प्रकृतेः वैचित्र्यात् सर्वदा वंशपारंपर्येण न कोऽपि नियमः वृत्तिर्वा अक्षुण्णं अचुम्बितं च यथापूर्वं अनुवर्तते। अतिवाहिते काले "तदात्वे नूतनं सर्वं आयत्यां तु पुरातनम्" भवति। सामान्याः लौकिकाः परीक्षकाः पण्डिताः ज्ञानिनः इत्यादि भेदभिन्ने मानवसमाजे प्रतिव्यक्ति मनोभावनाः भिद्यन्ते। अस्मिन्प्रकरणे इतिहास समुच्चयस्य वचनं तथा अन्यानि कतिपयवचनानि च विमर्शनमर्हन्ति।

"प्रायेण मुनयस्सर्वे स्वसन्तोष परायणाः।
द्वैपायनस्तु भगवान् सर्वभूतहिते रतः॥
श्रूयतां सिम्हनादोऽयं मुनेस्तस्य महात्मनः।
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु॥"

अनेन वचनेन कदाचन ऋषयोऽनेके स्वात्मनः श्रेय एव इहामुत्र च आकांक्षमाणाः बहुमन्यमानाश्चासन् इति विज्ञायते। एतस्या भावनायाः प्रतिद्वन्द्वितया सर्वभूतहितैषित्वं कतिपयेषु व्यास वाल्मीकि पराशरादिषु व्यजृम्भत इति च आश्चर्यावहोऽयं विषयः अस्मानानन्दयति। ब्रह्मणः शरीरादुत्पन्न इति प्रथितस्य नारदर्षेः वचनमपि अन्यत्र इममर्थमेव पुष्णाति।

" अद्य प्रभृति हे लोकाः यूयं यूयं वयं वयम् ।
अर्थकामपरा यूयं नारायणपरावयम् ॥
नास्ति संगतिरस्माकं युष्माकं च परस्परम् ।
वयंतु किंकराविष्णोर्यूयमिन्द्रिय–किंकराः ॥ "

उपनिषभ्द्यः पूर्वस्मिन् काले यद्यपीदानींतना दार्शनिकभावनाः आर्थिक–पारिश्रामिक–राजकीयादि विषयेषु निर्दिष्टरूपेण प्रजानां भावनावलये नावर्तन्ते स्म । तथापि तेषां व्यवहारेषु विभिन्न क्षेत्रेष्वनुसृतेषु, अभिमतेषु, आचरितेषु च तत्र तत्र व्यक्तिवैशिष्टयवादं पुरस्कृत्य प्राधान्येन प्रवर्तमाना आसन्निति निश्चीयते । सर्वसाम्यवादः अध्यात्मदृष्ट्या अनुमतः अभिमतश्च सर्वेषाम् । तथापि व्यवस्थित क्रमेण मानवजीवनस्य समुद्वहने अध्यात्मदृष्ट्या साम्यवादः अनुमतोऽपि व्यवहारेषु व्यत्यासेनैव अन्वभावि । व्यक्तिवैशिष्टय–तत्वानुसरणे एकैव दोषः परिदृश्यते । मानवस्वभावोऽयं, उपर्युपरि पश्यन्तः उत्तमश्लोकाः समानस्कन्धानेवाभिवांछन्ति, तैस्सह व्यवहरन्ति च । ज्ञानेन, आभिजात्येन, पाण्डित्येन च अवराः अनवकाशेन अज्ञानेन च उत्तमश्लोकता–माप्तुं कृच्छ्रेण प्राभवन्नित्यधिगन्तुमलम् ।

एवं ज्ञानज्योतिषां ऋषीणां पङ्क्तिः बहुमुखेन देदीप्यमानापि सर्वान् लोकानभिव्याप्य समानतया प्रबोधयितुं नाशकत् । अनेन कारणेन तदा तदा महान्तः व्यास वाल्मीकि पराशरादयः सर्वभूतहिताचरणमेव धर्ममभिदधुः स्वयमप्यभ्यलषन् । ते पुनराभिजात्यं तिरश्चक्रुः तथापि अधिकारभेदमङ्गीचक्रुः । योग्यतामन्वशीलयन् । निरर्थकान् वादविवादान् पर्यत्यजन् । बोधांशं प्रत्यगृह्णन् । तत्वं यथायोग्यं यथाधिकारं च ग्राहयामासुः । ज्ञानिनोपि, वैराग्यसंपन्नापि शान्तिमभिकांक्षमाणापि अज्ञानिभिः रागद्वेषयुतैः समाविष्टं अशान्तेरास्पदं जनसमाजं विहाय न कदापि पर्वतकन्दरान् अभिदुद्रुवुः । भेदेपि साम्यं, साम्येपि भेदमन्वविन्दन् । अयमपि व्यासस्याघोषः प्रति–ध्वनति, दूरदर्शिनः पण्डितान् मुखरयति यतः —

“ ब्राह्मणोऽपि प्रशान्तात्मा दीनानां यद्युपेक्षकः ।
स्रवते ब्रह्म तस्यापि भिन्नभाण्डात् पयो यथा ॥ ”

एतादृशानां लोकहितैकपरायणानां ऋषीणां ज्ञानप्रसारकाणां प्रवाहः कालप्रवाहे रूपविशेषानावहन् वर्तमानकाले साधूनां, सन्यासिनां च रूपेण शिष्यते ।

यदि वयं जनगणति प्रकारेण भारतदेशे पञ्चाशल्लक्षसंख्याका जनाः सामान्येन समाजस्य निरुपयुक्ताङ्गमिव वर्तन्त इत्यभ्युपगच्छाम—तत्रेदमवधेयम् — अस्मिन् पञ्चाशल्लक्ष परिमिते जनौघे दीर्घरोगिणः, अनैतिकजीवन मनुसरन्तः, साधवः, सन्यासिनः, स्वेच्छाचारिणः, अन्येपि समाजस्य कलङ्कभूताश्च सम्भूय पञ्चाशल्लक्षपरिमिता भवेयुः। एतेष्वनेके अनक्षरस्थाः, लोकानभिज्ञाः, शास्त्रज्ञानविधुराश्च सन्ति । अत्रापि अल्पसंख्याकाः पुनः महात्मानः पुरातनऋषीन् स्वकर्मणा प्रतिनिधीकुर्वन्तः लोककल्याणाय स्वजीवन मुद्वहन्ति । अन्ये पण्डिताः शास्त्राध्ययनैकतत्पराः अवकाशे लब्धे अध्यापन-परायणाश्च भवन्ति । परन्तु तत्वसाक्षात्कारे, आत्मगुणानां विकासे, लोकानु-जिघृक्षायां च निर्लिप्ता इव दृश्यन्ते । अपरे तीव्रावेगवन्तः केवलं शास्त्राध्ययनं अनुभवरहितं असहमानाः हिमालयप्रान्तेषु अनवरतं अध्यात्मविकासमभि-वांछन्तः साधनाभ्यासतत्पराः अवधूतचर्यामनुसरन्ति । सर्वेऽप्येते अविशेषेण -अज्ञानिनः गृहस्थस्य क्षमाशीलस्य देहश्रमोत्पन्नमाहारमेव भुंजते । अनया-रीत्या सामान्यजनाः तत्वसाक्षात्कारपरैः साधकैः, अध्ययना-ध्यापनमात्र तृप्तैः पण्डितैश्चोपेक्षिता गत्यन्तरमलभमानाः आङ्ग्लविद्याभ्यास मार्गमेकमेव आश्रित्य अपरिनिष्पन्नज्ञानिनो बभूवुः । विशेषेण यूनां पाश्चात्य संस्कृतिः न जीर्यते । साम्प्रदायिकी भारतीय संस्कृतिः नाधिगता न वा परिचिता । अस्यामवस्थायां विवशाः आधुनिकनीतिधुन्यां “ दन्द्रम्यमाणाः परियन्ति........ । ”

न केवलमियं समस्या नवीना । सामान्यानामुद्बोधयितुं श्रीकृष्णः कृष्ण-द्वैपायनश्च द्वापरे प्रायतेताम् । कालक्रमेण गौतमबुद्धः पण्डितानां पामराणां च

मनोभावनाः पर्यवर्तयत् । तदनन्तरं चाणक्यः अर्थशास्त्रोपदेशं पुरस्कृत्य सर्वेषां यथाधिकारं अविशेषेण कर्माचरणमादिदेश । मध्यकाले आचार्यत्रयी लोक-जीवनानुबद्धान् राजकीय सामाजिकादि विषयान् परिहाय त्रिमुखीमध्यात्म-भावनां भेद-अभेद-भेदाभेदरूपां विविच्य लोकेभ्यः अभ्यधात् । वर्तमानशतके रामकृष्णपरमहंसः, दयानन्दसरस्वती, विवेकानन्दः, अरविन्दघोष्, तिलक् प्रभृतयश्च राजकीय-सामाजिक-विद्याभ्यासादि विषयेषु जनान् बोधयामासुः । येन ते तस्मिन् काले यावत् शक्यं आत्मगौरवं ऐकमत्यं च अधिगन्तुं प्रायतन्त । महात्मा गान्धी स्वजीवनस्यादर्शेन अशेषाणां मार्गाणां एकं गम्यस्थानं निश्चिकाय । प्रत्येकं राजकीयादीनां मार्गाणां वैशिष्ट्यं व्याचख्यौ । एषां परस्परमधीनतां, आवश्यकतां च न्यरूपयत् । प्रत्येकं अध्यात्मभावनादीनां निस्सहायतां वर्णयाञ्चकार । एतेषामेव परस्परं परिपूरयितृत्वं च निवेदयामास । सम्भूयानुसृतानामेतेषां सर्वपुरुषार्थसाधकत्वं प्रतिबोधयामास ।

सिम्हावलोकनेन भारतीय संस्कृतेः समग्रस्वरूपं आदितः अधिगम्य स्वामी चिन्मयानन्दयतिः अशेषे भारते पर्यटन् भारतीयान् तेषां नित्यानुसरणीयां पैतामहीं संस्कृतिं परिचाययन् ज्ञानसत्रदीक्षितः उद्बोधयति ।

> " द्रव्य यज्ञास्तपो यज्ञा योगयज्ञा स्तथापरे ।
> स्वाध्यायज्ञान यज्ञाश्च यतयः संशितव्रताः ॥ — तथा
>
> अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
> ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मेमतिः ॥ " — इति च

श्रीकृष्णेन सूचितस्य पारिभाषिकस्य ज्ञानयज्ञपदस्य अतिगभीरं गूढार्थं स्वोपज्ञया मननरूपया भावनया गङ्गोत्तरीक्षेत्रे एकस्मिन्नपराह्णे आकलयामास । स्वामी समर्थरामदासप्रभृतयः येन प्रकारेण भजनसंकीर्तनादिभिः जनेषु राष्ट्रीयभावनां भगवति भक्तिं चोत्पादयामासुः, ऐकमत्यं च साधयामासुः, तान् क्रमानापाद-चूडं अनुसंदधौ । ततो पुण्यपत्तने आदौ ज्ञानयज्ञस्य नान्दीमातनोत् । ऋषीणां

ज्ञानसर्वस्वभूताः उपनिषदः भगवता–गीतां भगवद्गीतां च सात्मीचकार। सामान्यानपि परिचितपरमार्थान् विधातुमष्टवर्षेभ्योऽनवरतं भारतभूम्यां प्रधान नगरेषु ज्ञानयज्ञान् प्रवर्तयति।

अयं महाशयः दक्षिणभारते केरलदेशे शङ्कराचार्य-जन्मभूमेः कालटी–ग्रामात् द्वादशक्रोशाभ्यन्तरे विद्यमाने त्रिशिवपुरे त्रिचत्वारिंशद्वर्षेभ्यः पूर्वं जनिमवाप। मद्रपुरी विश्वविद्यानिलये स्नातको बभूव। पश्चात्तनविद्याभ्यासं लक्ष्मणपुर (Lucknow) विश्वविद्यानिलये अमानयत्, येन M.A.,LL.B. पदवीं लेभे। तदनन्तरं भारतीयान् स्वधर्मं स्वसंस्कृतिं च अनभिजानतः समुदीक्ष्य जातानुकम्पः भृशं चिन्तयामास। धृतिमान्, वशी, यावत् शक्यं भारतीयानुद्बोधयितुं बद्ध–परिकरः हृषीकेशस्थितात् काननविश्वविद्यानिलय प्रतिष्ठापनाचार्यात् श्री शिवानन्दयतेः सकाशात् तुरीयाश्रमदीक्षामगृह्णात्। आजन्मविरक्तं तपोवन यतिं ज्ञानपिपासुः शिश्रिये। तस्मात् वैदिकं लौकिकं च ज्ञानमधिजगाम।

अध्ययनेन श्रद्धया च शङ्करादिभिरादृतं विवर्तवादं संप्रदायेन अनुसंधत्ते। परन्तु पौराणिकमार्गमनुसृत्य अखण्डनाम-संकीर्तनादिरूपेण ज्ञानयज्ञेषु द्वैतभाव-परिमलितं भक्तिभावं जनेषूद्बोधयति। सर्वेषां यथाधिकारं लौकिकानि वैदिकानि च कर्माणि अनुष्ठेयाणीति सयुक्तिकं सप्रमाणं आवेदयति। पिता–माता, पत्नी–पुत्रः, नियम्य–नियामकादीनां शास्य–शासकादीनां च संबन्धानां पवित्रतामनुल्लंघनीयतां च व्युत्पाद्य सर्वेषां स्वरूपप्राप्तं धर्माचरणं काल–देश–दशानुसारेण अनुष्ठेयमिति अनेकैः दृष्टान्तैः दैनन्दिन जीवनानुगतै निर्दिशति। यदा मानवः स्वरूपानुबद्धं स्वधर्मं परिहाय स्वाधिकारमभिवांछति पूर्वोक्ताः तदा सर्वे संबन्धाः विपरिवर्तन्ते। तदात्वे मानवः मानवतां विहाय पशुत्वं, ततो राक्षसत्वं पिशाचतां च भजत इति वारं वारं सावतरणं सोप–पत्तिकं सोदाहरणं निपुणतरं चतुरवचनरचनावैदुष्येण सह अभिधास्यति।

द्वैतं अद्वैतं वा विशिष्टाद्वैतं शाक्तमतं वा ऐदम्पर्येण पक्षप्रतिपक्षभावनया वा न कदापि उपबृंहयति। कुतः सर्वसमाहारात्मकः खलु भारतीयधर्मः। नकोऽपि धर्मः एकान्तेन परकीय विषयैरसंकीर्णः स्वतन्त्रो कुत्रापि दृश्यते। अतः सर्वसमाहारात्मिकां भारतीय संस्कृतिं ज्ञापयति, अनुवदति, बोधयति उपदिशति च। यं कं वा पन्थानमाश्रयतु मानवः, यथा कामं, यथा रुचि। सामान्यरूपेण मानवजीवनादपृथक् सिद्धां संस्कृतिं सुविशदमधिगन्तव्यामभि-दधाति। कैश्चित् पण्डितैरादृतां खण्डनमण्डनमालिनीं वादसरणिं नानुमोदते। तत्वमवेहि, तदनन्तरं यथारुचि यस्मिन् कस्मिन्नपिमार्गे तत्परो भव इत्याशास्ते।

जन्मनाजातिः, स्वाभ्युपगत सम्प्रदाय एव अत्युच्चतमः इति पृथक्त्वमेवा वहतः नियमान् सामान्येन नादत्ते। संप्रदायरीत्या निष्ठागरिष्ठानां परमैकान्तित्वं नाभिनन्दति। समदर्शी, सर्वभूतहितैषी च अयं दीनेषु दलितेषु वा कुलीनेषु अकुलीनेषु वा पण्डितेषु पामरेषु वा दरिद्रेषु तदितरेषु वा विशेषं नोपलक्षयति। सर्वं ब्रह्मात्मकमित्यनुसन्धान तत्पराणां प्रवृत्तिं अपशूद्राधिकरणस्य व्याख्यानं न प्रतिबध्नाति। हठयोगं, राजयोगं च यथावसरं प्रतिपादयति। मन्त्रयोग-लययोगौ ध्यानाभ्यास विषयेषु विनियोजयति। युवसु देशभक्तिं आधुनिक-समाजपरिस्थितेरुपवर्णनपूर्वकं प्रेरयति। कर्मचारिणां "स्वजठरपूर्त्यै कर्मनिर्व-र्त्स्यामीति" संकुचितभावनां निराकृत्य "अस्मद्देश संपदभिवृध्यै, गौरवरक्षणाय लोकहिताय च अहं कर्मानुतिष्ठामीति" अनुसन्धत्त इति वारं वारं आवेदयाति। जानपदं दुःखं एकः शोचितु मर्हति किं? इति प्रश्नान् स्वयमुद्भाव्य जनपदस्य अङ्गभूतः त्वं भवतः उत्तरवादित्वं अनिर्विण्णः निर्यातय इति व्याख्यास्यन् —

"नहि जानपदं दुःखमेकः शोचितु मर्हति।
अशोचन् प्रतिकुर्वीत यदिपश्येदुपक्रमम्" इति ज्ञापितं

वेदव्यास वचनं स्मारयति।

चिन्मयानन्द यतिः व्यवहारशास्त्रे निष्णातः। मनःशास्त्रे कोविदः। अधुनातन वैज्ञानिक विषयेषु विचक्षणश्च वर्तते। अस्मादस्य विषय–ग्रहणक्रमः, मननप्रकारः, उपन्यास वैखरी च दुर्ग्राह्यापि सुबोधा, गभीरापि सरला, मनोहरापि गम्भीरा, श्रोतृपेयापि अनुभवैकसमधिगम्या च विजृम्भते। दार्शनिक भावनासु वर्तमान कालोपयोगिन्यः सादरं निःशंकं चादत्ते। केवलं चिखण्ड–यिषया प्रवृत्तानभिप्रायविशेषान् मनागपि नोदीक्षते। कस्मात् कदापि कलहे ज्ञानस्य विकासो नास्ति। वाचा विषयान् काममभिवदेयुः। मनसा तान्वि–जानीध्वम्। जीवने अनुसर्तव्यं च। यत्पुनः अनुभवक्षेत्रे नावतरति तादृशं विषयज्ञानं वन्ध्यात्वमावहति। अनुपयुज्यमानाः भावनाः अनुभवक्षेत्रे आशय-रूपं भजन्ते। ताः अस्मिन् जन्मनि जन्मान्तरे वा सुखाय दुःखाय वा परिणमेरन्। ततः यावच्छक्ति दुर्भावनाः मनसः निस्सारयितुं प्रयतितव्यम्। तत्कृते भगवदनुग्रहः, गुरूपदेशः चिरन्तनानां ऋषीणां उपदेशानां मननं च सहकारिणो भवन्ति। स्वप्रयत्नंतु सर्वत्र प्राधान्यमावहतीत्यावेदयति। एवं ज्ञानयज्ञेषु अयं महाशयः बालान् वृद्धान् यूनश्च समानतया संयुनक्ति। नाम संकीर्तनादि पर्वभेदेन स्त्रीणां पुंसां प्रवराणामवराणां च यथाशक्ति आर्त्विज्य-मनुगृह्णाति। अन्ते अवभृतस्नान प्रकारेण पवित्रं क्षेत्रान्तरमासाद्य तत्परैस्सह स्वयमन्वितः तान् अध्यात्मभावनायां कंचित्कालं निमीलयति। “ज्ञानयज्ञे सर्वे यजमानाः, सर्वे च ऋत्विजः।”

एवं स्वामी चिन्मयानन्दयतिः जन्मना दाक्षिणात्यः, वयसा युवा, विद्याभ्यासेन साधनाभ्यासेन च उदीच्यः, आश्रमेण यतिः, भावनया मुनिः, उपदेशेनाचार्यः, सौहार्देन मित्रं, सहृदयत्वेन बालः, (बाल्ये बालकृष्ण–नामायं), सर्वजनानुरागी, महिम्ना अशेषभारतस्य अध्यात्मप्रधानायाः संस्कृतेः प्रचारणे नेता, तत्वार्थानां व्याख्याता, चिरविस्मृतपूर्वस्य ज्ञानयज्ञस्य पुनरुज्जीवकः, साधुपरम्परायाः शिष्यः, लौकिकानां गुरुः, सम्प्रदायैकशरणानां किञ्चिदिव विप्रकृष्टश्च विराजते।

[३८ — पृष्टतः अनुवृत्तः]

किरणदर्पणं प्राणिनां शरीरं प्रतिकलं करबदरमिव दर्शयति। तथा बीजानां परीक्षणेऽपि दिव्यदृष्टिरिव उपकरोति। लोहनिर्मितेषु यन्त्रोपकरणेषु शतघ्नी–प्रभृतिषु शस्त्रेषु च दोषं विस्पष्टमावेदयति। किं बहुना रहस्यविषयदर्शकं अञ्जनमिव प्रतिकिरणानि मानवस्य साहाय्यं विदधाति।

यन्त्रप्रचालनेऽयं महाभूतः। अतीव औष्ण्यमापादयति, अतीव शीतं च। पिष्टीकरणमारभ्य अशेषयन्त्रागाराणि चालयति। अद्यतन कृतकग्रह निर्माण–पर्यन्तं यच्च यावच्च पारिश्रमिक कर्मजातं अस्य अधीने वर्तते। व्योमयानम्, धूमशकटः, तैलशकटादयश्च विद्युच्छक्तिमुपजीव्यैव प्रचलन्ति। वार्तावहने शुल्बतन्त्रीद्वारा एकस्मिन् क्षणे नवतिसहस्रक्रोशवेगेन धावति। तन्त्रीरहित वार्ताप्रसारेण आकाशवाणितां अविन्दत। तस्य श्रवणे उपश्रोत्रायते [Radio] तन्त्रीसहितक्रमेण ध्वनिविशेषैः देशाद्देशान्तरं गच्छन् तन्त्रीवार्ता इति प्रथा, साक्षरंचेत् टेलिफोन् [Telephone] इति च गीयते। उभयोः प्रयोगः विभिन्नः वर्तते। एवमभिन्ना शक्तिः अनेकैः रूपैः विविधकर्माणि निर्वर्तयन् कामधेनुरिव अनुभूयते मानवैः। पदार्थानां स्वभावं परिणामं च वैज्ञानिकदृष्टिमन्तरा केनापि सुविशदं प्रतिपत्तुं न शक्यते। अयं विज्ञानदृष्ट्या अनुसंधान क्रमः पदार्थानां अज्ञानं न्यक्करोति भावनाबलमुपचाययति पदार्थानां अधिगतिं अनुभवपर्यव–सायिनीं विदधाति।

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेपि च।
विज्ञानं देवास्सर्वे ब्रह्म ज्येष्ठमुपासते।
विज्ञानं ब्रह्मचेद्वेद।

याज्ञवल्क्यः

(पि. पद्मनाभशास्त्री)

ज्ञानज्योतीनां चिरंतनमुनीनां चरितं समीचीनप्रकारेण निर्णेतुं सुदुष्करम्। तथापि उपदेशपरंपरया तेषां वैशिष्ट्यमवगाहामहे। पुरा मैथिलदेशे महर्षेर्देवरातस्य पत्न्यां सुनन्दायां याज्ञवल्क्यो जज्ञे। पुराणेषु तत्र तत्र अस्य नाम प्रभावश्च उपवर्णितो दरीदृश्यते।

पूर्वे वयसि पैलमुनेःसकाशात् ऋग्वेदमधिजगाम। अनन्तरं यजुर्वेदमध्येतुं वैशम्पायनमुपासर्पत्, अध्यगीष्ट च। कदाचित् मेरुपर्वते ऋषीणां समावेशः सम्भावित आसीत्। "यथा समयमाहूतैस्सर्वैर्मुनुभिरागन्तव्यमिति नियमः" अवर्तत। वैशम्पायनः आहूतोऽपि नियमितकाले सभायां अनुपस्थितो बभूव। अनुपस्थितौ हेतुश्च दैवादापतितः। एकदा वैशम्पायनः छन्दांसि अध्यापयन्नासीत्। अध्यापनकाले कश्चन माणवकः गुरुशिष्ययोः मध्ये सम्प्रदायमजानन् इयाय। तदा झटिति उद्रिक्तो वैशम्पायनः हस्तेन तमताडयत्। ताडितमात्र एव स ममार। ब्राह्मणवधाद्वैशम्पायनः ब्रह्महत्याभिभूतो बभूव। ऋषीणां सभायां यथासमयमनुपस्थितौ इदमेव निदानमसीत्। अनुपस्थितानां ऋषीणां ब्रह्महत्यादोषं भविष्यतीति नियमश्च ऋषिभिरादिष्ट आसीत्। एवमुभयतो वैशम्पायनः ब्रह्महत्यादोषग्रस्तो बभूव। अस्य दोषस्य निबर्हणाय व्रतमनुष्ठीयतामिति शिष्यानादिदेश। याज्ञवल्क्य आह, अल्पसाराणां व्रतस्याचरितेनालं, अहमेव दुश्चरमपि व्रतं चरिष्य इति व्यजिज्ञपत्। वैशम्पायनः स्वशिष्यावधीरणेन क्रुद्धो भूत्वा "याज्ञवल्क्य! त्वं ब्राह्मणानामवमन्तासि, त्वया एतावत्पर्यन्तं यदधीतं मत्तः तानि छन्दासि आशु त्यज" इत्यादिदेश। याज्ञवल्क्योऽपि अधीतानि छंदांसि ववाम। तानि यजूंषि

तित्तिरपक्षिणो भूत्वा उदडीयन्त । वैशम्पायनशिष्याः गुरोरनुज्ञां लब्ध्वा तानास्वादयामासुः । इयं तित्तिरपक्षिरूपेण प्रवृत्ता सती "तैत्तिरीय शाखा" इति अध्ययनप्रणाल्यां प्रथां लेभे ।

अनन्तरं याज्ञवल्क्यः वेदविरहितो बभूव । तत्संपिपादयिषया भगवन्तं सूर्यं उपासाञ्चक्रे । भगवान् द्युमणिः प्रसन्नः अयातयामानि यजूंषि वाजिरूपेण दृष्टिविषयो भूत्वा ददौ । याज्ञवल्क्यः परितुष्टः अयातयामानि यजूंषि लोके अध्यापयामास । तान्येवेदानीमपि "काण्व–माध्यन्दिन शाखा" भेदेन समुल्लसन्ति । अस्यैव "शुक्लयजुर्वेदः तथा वाजसनेयी संहिता" इति च सांप्रदायिकी अभिख्या वर्तते ।

याज्ञवल्क्यस्य द्वे भार्ये आस्ताम् । कात्यायनी मैत्रेयी चेति । कात्यायिन्यां पुत्रिकात्रयमजीजनत्, चन्द्रकान्ता, महामेधा, विजया चेति । मैत्रेय्यां मैत्रेयमुनिः जनिमवाप, यः पराशरात् विष्णुपुराणं समग्रहीत् ।

याज्ञवल्क्यमुनिः स्वसमकालिकेषु प्रथित यशाः रराज । अनेकासु सभासु परमगहनां अध्यात्मतत्वचिन्तनां अधिकृत्य वादविवादेषु स्वीयज्ञान–विकासं प्रकटीचकार । ब्रह्मज्ञानिष्वग्रगण्यः, राजा जनकः याज्ञवल्क्यं आचार्यं अङ्गीचकार । अनेकसभासु अस्य उपदेशाः बहुमुखाः आसन् । बृहदारण्यकेऽस्य प्रभावप्रतिपादकाः कथाः उपवर्णिताः । "न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति......" ॥ इत्यादि ।

एवं पाण्डित्यं तत्वज्ञानं, समानेषु कीर्तिं च प्रतिपद्य अध्यात्मतत्व–साक्षात्कारे मतिं चकार । प्रविव्रजिषया भार्ययोः विद्यमानां संपत्तिं विभज्य व्यतरत् । तुरीयाश्रममङ्गीकृत्य शाश्वतं ब्रह्म निरन्तरमनुध्यायन्नासीत् । न केवल मयं ऋषिः, मन्त्रद्रष्टा, शास्त्रपण्डितः; अपितु लोकज्ञश्च । लोकानां धर्मा–

चरणाय धर्मशास्त्रं प्रणिनाय । इदानीमपि "याज्ञवल्क्यस्मृति"रिति मानव-जीवनस्य धर्मनिर्णये प्रमाणग्रन्थो विराजते । जन्मना सिद्धपुरुषोऽपि लोकमर्यादामनुससार । गुरुणावधीरितोऽपि आत्मनिष्ठां न जहौ । तृरीयाश्रम्यपि लोकाननुजिघृक्षत् "ब्राह्मणोऽपि प्रशान्तात्मादीनानां यद्युपेक्षकः । स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ।" इति व्यासवचनं अनुष्ठाय स्वजीवन-मेवादर्शमादर्शयत् ।

अज्ञानध्वान्तरोधात् अघपरिहरणात् आत्मसाम्यावहत्वात्
जन्मप्रध्वंसि जन्मप्रदगरिमतया दिव्यदृष्टिप्रदानात् ।
निष्प्रत्यूहानृशंस्यात् नियतरसतया नित्यशेषित्वयोगात्
आचार्यः सद्भिरप्रत्युपकरणधिया देववत्स्यादुपास्यः ॥

सद्बुद्धिः साधुसेवी समुचितचरितः तत्वबोधाभिलाषी
शुश्रूषुः त्यक्तमानः प्रणिपतनपरः प्रश्नकाल प्रतीक्षः ।
शान्तो दान्तो अनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
प्राप्तः शिष्यः परीक्षां कृतविदभिमतः तत्वतः शिक्षणीयः ॥

अचतुर्वदनो ब्रह्मा

(के. एल्. सुब्बाशास्त्री)

वेदवाङ्मये ब्रह्मशब्दः जगत्कारणे परमात्मनि रूढः वर्तते। पुराणेषु पुनरयं सृष्टि–स्थिति–प्रलयेषु सृष्टिकर्तारं सूचयति। अयं चतुर्मुखः, सरस्वतीकान्तः सदावेदपाठकः, इति वर्णना विद्यते। अस्य मानसपुत्राः सनकादयः, अन्ये दक्षादयः प्रजापतयश्च बहवः आसन्। ब्रह्मर्षिर्वसिष्ठः ब्रह्मणः पुत्रः। अस्यात्मजः शक्तिः, तस्य सूनुः पराशरो बभूव। "परान् बाह्यकुदृष्टीन् शरति विदार–यतीति पराशरः"। अयं पुराणकर्ता स्मृतिकर्ता च, यस्य विष्णुपुराणं पराशरस्मृतिं च वयमुपलभामहे।

पराशरः कदाचित् यमुनां तितीर्षुः नावमारुरोह। कालकर्मसंयोगेन नाविको नासीत्। तस्य दुहिता सत्यवती नावं चालयतिस्म। पराशरमुनिस्तां चकमे। सत्यवती प्रथमं म्लानमुखी सती अनन्तरमङ्गीचकार। तस्यां कृष्ण–द्वैपायनो जज्ञे। वेदानां समीकरणात् वेदव्यासेति अन्वर्थ संज्ञां लेभे। पुराणानां व्ययस्थाकरणात् "अष्टादशपुराणानां कर्ता सत्यवती सुतः" इति प्रथा वर्तते। अनेन कदाचित्काचिदप्सरा संगता अवधूतचक्रवर्तिनं शुकं जनयामास। वेद व्यासजननात्पूर्वं सत्यवत्याः नाम मत्स्यगन्धीति विख्यातमासीत्। अनन्तरं योजनगन्धीति प्रथां लेभे।

चन्द्रवंशराजसु शन्तनुर्नाम राजर्षिर्बभूव। व्यासस्य जननी सत्यवती शन्तनुं पर्यणयत्। सत्यवत्यां जातौ पुत्रौ चित्रवीर्य—विचित्रवीर्यौ प्रख्यातौ आस्ताम्। द्वावपि निरपत्यौ मम्रतुः। तत्पत्नीष्वयं व्यासः क्रमेण धृतराष्ट्रं, पाण्डुं, विदुरं च जनयामास। पाण्डु पुत्राः धर्मादयः पञ्च। धृतराष्ट्रपुत्राः

एकोत्तरशतम् । विदुरः दासीपुत्रः नीतिविशारदश्चेति प्रसिद्धिरस्ति । पाण्डवानां चरितं महाभारतम् । अस्यैव संज्ञा "जय" इति ।

वेदव्यासमहिमानं साकल्येन वर्णयितुं कः शक्नुयात् । वेदानां संस्कर्ता, पुराणानां परिष्कर्ता, चायं ऋषिः ब्रह्मसूत्राणि जग्रन्थ । भगवद्गीतां च संजग्राह । मानवहिताय धर्मरहस्यं विशदीचकार । साधकानां मार्गदर्शनाय योगाभ्यास विषयान् उपब्रुम्हयत् । चतुर्वर्ग परायणानां कृते तदर्थान् सूक्ष्मेक्षिकया वर्णयाञ्चक्रे । भावुकानां कृते बाह्यं प्रकृतिसौंदर्यं वर्णरञ्जितचित्रमिव निरूपयामास । तत्वजिज्ञासूनां महते उपकाराय दार्शनिकतत्वानि उपवर्णयामास । आयत्यां जिज्ञासूनां कृते आत्मगुणानेव परिवर्धनीयानुपदिदेश ।

पाण्डित्यं आचरणविमुखं निष्फलमिति जगर्ज । "उदारचरितानां तु वसुधैव कुटुम्बकमिति" दिदेश । स्वपर भेदः अस्वाभाविक इति निरणैषीत् । धर्माविरुद्धान् कामक्रोधलोभाधीन् गुणान् अङ्गीचकार । शारीरकं सुखम्, मानसिक भावनाश्च आत्मगुणाननुसरेयुरिति सिद्धान्तयामास, कर्मठत्वमनतिक्रमणीयमिति स्थिरीचकार । अनुभवरहितस्य ज्ञानस्य नैष्फल्यं प्रसाधयामास । पुण्य–पापयोः, धर्मकर्मणोश्च स्वरूपं न्यरूपयत् । तस्य उपदेशवचनानि सदा अनुसन्धानात् ज्ञानिनामज्ञानिनां च महते फलाय भवेयुः । दिङ्मात्रमुदाहरामः —

"इदं पुण्यमिदं पापं इत्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां अल्पं शास्त्रप्रयोजनम् ॥
श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
यच्छ्रुतं न विरागाय न धर्माय न शान्तये ।
सुबद्धमपि शब्देन काकवाशितमेव तत् ॥
शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः ।
स एव सर्वशास्त्रज्ञः यस्य शान्तं मनः सदा ॥"—इति ।

भगवान् बुद्धः

(के. बि. सुन्दरराज)

द्वापरयुगान्ते श्रीकृष्णः मानवानां धर्मं विशिष्टयारीत्या उपदिदेश। धर्मः न केवलं शास्त्रयुक्तिभिः रक्षितुं, अनुसर्तुं, प्रचारयितुं वा शक्यते। अथ केन प्रकारेण? "शास्त्रज्ञानसहकृत–शस्त्रबल सहायेन" इति तस्याभिप्रायः। तस्मात् शास्त्रशस्त्रयोः सम्मेलनं तेन धर्मसंस्थापनाय अनुसृतमादिष्टं च। "मामनुस्मर युध्य च" इति किल तस्य घण्टाघोषः।

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्य व्यवस्थितौ।
ज्ञात्वा शास्त्रविधानेन कर्मकर्तुमिहार्हसि॥"

वेदव्यासः परं स्वप्रणीते वाङ्मये साकल्येन एतत्तत्वं निपुणतरं उपपादयामास लोकानां ज्ञापनाय। बुद्धः शस्त्रं विजहौ शास्त्रमेकमेव परिजग्राह तस्यानुयायिनः अशोकादयः प्रायशः इममेव पन्थानमन्ततः उररीचक्रुः। बौद्धमतं भारतदेशे एव तिरोहितो बभूव। अयं विषयः जिज्ञासुभिः विमर्शनमर्हति।

गच्छताकालेन धर्मस्य प्रभावः तनुतामाप्नोत्। तस्य पुनरुद्धरणे बद्ध–परिकरेषु गौतमबुद्धः अद्वितीयः। इतिहासानुसारेण अस्य नाम शौद्धोदनिः, सिद्धार्थः, मायादेवीसुतः, गौतमः इत्यादिभिः पर्यायपदैर्गीयते। संप्रदायेनाऽयं महानुभावः इक्ष्वाकुवंशजस्य शुद्धोदनस्य द्वितीयभार्यायाः पुत्रः। अश्वघोषस्य एकः श्लोकः अस्मिन्नवसरे उदाहरणमर्हति —

" महीभृतां मूर्ध्नि कृताभिषेकः शुद्धोदनोनाम नृपोर्क बन्धुः ।
शुद्धाशयो यः स्फुटपुण्डरीको दयार्द्रचेताः तदलं चकार ॥ "—इति ।

शुद्धोदनस्य माता मायादेवी, त्रयः भ्रातरश्चासन् । अस्य तत्वसाक्षात्कारानन्तरं आनन्दोनाम पितृष्वसुः पुत्रः अच्छिन्नभक्तो बभूव । जातमात्रस्यास्य सप्तमे दिवसे अनुरागवती माता मायादेवी परलोकं जगाम । अस्य अवतारः B. C. 623 वैशाखमासस्य पूर्णिमायामिति निश्चप्रचम् ।

अस्य गुरवः बहवः, तेष्वष्टौ प्रथिता आसन् । धनुर्वेदेप्यस्य पाण्डित्य-मनन्यादृशमवर्तत । षोडषवार्षिकः नवमन्मथ इव रराज । पित्रादीनां महता प्रयासेन यशोधरामुपयेमे । कालक्रमेण अन्ये द्वे कन्ये अनेन उपायंस्तेति बौद्धग्रन्थेषु दृश्यते । अचिरेणैव कालेन राहुलो नाम पुत्रो जज्ञे ।

अयं महोदयो जन्मनैव दयामूर्तिः, तत्वजिज्ञासुः, लोकाभिरामः, परहिते रञ्जनेच आनन्दधुमनुभवानश्चासीत् । स्मारं स्मारं लोकवृत्तान्तं उद्वेजितो बभूव । मानवजीवनस्य दुःखमिश्रत्वं, दुःखोदर्कत्वं च सम्भाव्य चिखेद । अन्ततः अनादेरनन्तस्यास्य लोकामयस्य निवारणोपायमन्विष्यन् राजभवनान्निरगच्छत् । दयामूर्तिः प्रमाणपरतन्त्रान् अन्धपरम्परानुयायिनः दिव्यज्ञानदानेन विमोचयामास । अहं वच्मीति न श्रद्धत्त, प्राचीनग्रन्थेषु निरूपितमिति माङ्गीकुरुष्व, पण्डितैः अनुसृतमिति मा बंभ्रमीः, परैरनुष्ठीयत इति न कदापि परवशो भव, परंपरागतोयमाचारः इति मा विश्वसिहि, प्रभु-शक्तिवद्भिः उपदिष्ट इति मानुसर । अथ कं पन्थमाश्रयेथाः ? यदाचरण-पर्यवसायि भविष्यति, अनुभवारूढमनुभवसि, यदादि कल्याणाय, मध्य-कल्याणाय, अन्त्य-कल्याणाय च प्रभवति, तमेव धर्ममवगच्छध्वम् " इति सिंहनादं ननाद । संक्षेपेण तस्य धर्मोपदेशः "आर्याष्टाङ्ग-मार्गोऽयं" सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वचनम्, सम्यक्कर्म, सम्यग्जीविका, सम्यक्स्मृतिः, सम्यग्व्यायामः, सम्यक्समाधिः " इति । पञ्चशीलानि च अहिंसा, अपरिग्रहः, अस्तेयं, सत्यम्, ब्रह्मचर्यं, मादकद्रव्यसेवन विरतिश्चेति ।

पाली भाषायां तदा तदा धर्मसंस्थापनार्थाय बुद्धाः अवतरन्तीति प्रार्थनाश्लोकः वर्तते । —

" ये च बुद्धा अतीता च ये च बुद्धा अनागता ।
पच्चुप्पन्ना च ये बुद्धा अहं वन्दामि सब्बदा " । इति ।

बौद्धमतानुयायिनां रत्नत्रयवाक्यानि " बुद्धं सरणं गच्छामि, संघं सरणं गच्छामि, धम्मं सरणं गच्छामि " इति । लोकहितैषिणः राज्यं पुत्रदारादिकं च तृणायतेस्म । अस्य व्यापारास्तदनन्तरं बहुधा उपश्लोकिता वर्तन्ते । गत्वा गत्वा निरञ्जननद्यास्तीरे (बिहार प्रान्ते) बुद्धगयेति इदानीं प्रसिद्धे क्षेत्रे तत्व-साक्षात्कारपर्यन्तं नोत्तिष्ठामीति प्रतिज्ञां चकार । " रक्तं शुष्यतु, मांसः नश्यतु, अस्थीनि परिलुठन्तु तत्वसाक्षात्कारं विनाहं नोत्तिष्ठामि " इति दृढसंकल्पः अश्वत्थमूले उपाविशत् । तीव्रतरं तत्वं दध्यौ । अचिरेण ऋतंभरा प्रज्ञा तस्या-विरासीत् । यत्रास्य तत्वज्ञानसाक्षात्कारः समजनि तत्र अशोक चक्रवर्तिना निर्मितं महत् गोपुरं इदानीमपि चकास्ति यस्मिन् बुद्धविग्रहः विराजते ।

तदनन्तरं पादचारी भूत्वा देशं बभ्राम । साधून् ज्ञापयामास । दुष्टानपि सत्पथमनयत् । धर्मबोधकानि अमृतवचनानि उपदिदेश । " अहं धर्ममुप-दिशामि आदिकल्याणाय, मध्यकल्याणाय, अन्त्यकल्याणाय " इति घोषया-मास । समदृष्टिः स्वपरभेद रहित ज्ञानवान् परिपूर्णः दयामयः सर्वज्ञः बुद्धः इति प्रथितोऽभवत् ।

श्रीकृष्णेन यामिमां पुष्पितां वाचमिति निन्दितं केवलकर्मविषयं पुनर्निरूपयन्निव यज्ञेषु पशुबलिं निराचकार । जन्मना जातिरिति मोमुह्यमानान् पण्डितंमन्यान् प्रबोधयामास । वेषधारिणः वेदान्तिनः युक्तिशरैर्व्यदारयत् । उज्ज्वल ज्ञानज्योतिः जंगमः परःसहस्रमानवानां हृदयांधकारं न्यरुन्धत् । "हस्तादिरूपेण बहुप्रकारः कायोयथैकः परिपालनीयः । तथा जगद्भिन्नमभिन्न-दुःखसुखात्मकं सर्वमिदं तथैव " इति तस्य विश्वात्मभावनां बोधिचर्यावतारे समग्राहि ।

चाणक्यः

(जे. वी. सत्यनारायण शर्मा)

भूगोलं प्रकृति परिणामपरिवर्तनवशात् मानवानामावासभूमिः कस्मिन्काले बभूव कदा सर्वात्मना व्यवस्थामापेति चिन्तयन्तो भूगर्भशास्त्रज्ञाः इदानीमपि विभिन्नाभिप्रायान् सूचयन्ति । मानवजातेः प्रथमं वाङ्मयं वेदसंहिताः इति सर्वैं रप्यभ्यनुज्ञायि । अत्रापि कालनिर्णये वैमत्यं विद्योतते । वाङ्मयेऽस्मिन् मानवानामैकमत्योपयोगिनः संघाः, जीवनोपयोगिन्यो वृत्तयः, शान्त्यै रक्षणाय च आरचिता नियम्य–नियामकभावाः विश्वैकरक्षकस्येश्वरस्य प्रभावानुवर्णनात्मका मन्त्राश्च विद्योतन्ते । इमे विषयाः ब्राह्मणग्रन्थेषु तथार्वाचीन संस्कृतवाङ्मयेष्वनूदिता व्याख्याताश्च, येषु मानवं धर्मशास्त्रं प्रथमं गौरवमर्हति। समाजव्यवस्थायै, रक्षणाय, शान्त्यै च धर्मः एकैवोपाय इति च प्रभुसम्मितया व्याचिख्यासव आसन् पूर्वे महर्षयः ।

शास्त्रीयनियमाः

विश्वव्यापाराणां परिवर्तनशीलत्वात्, देश–नगर–निगमजनपदेषु वर्तमानानां मनुष्याणां काम–क्रोध–लोभादीनां सहजानां आगन्तुकादीनाञ्च गुणानां विजृम्भणात्, प्राचीनधर्ममार्गः एकरूपेण परिपालयितुं न शक्यते, न वा केनापि व्यवहारशास्त्रेण व्यवस्थापयितुं अथवा सामान्यजनेष्वाचरणाय विधातुमपिशक्यम् । तस्माच्चिरन्तनानां धर्माणां परिष्करणमावश्यकमभूत् । काल–देश–दशानुरोधेन अनन्वयिनां निराकरणञ्च अपरिहार्यमापतत् । केषाञ्चनधर्माणां किञ्चिदिव तत्तत्कालिकरेखासंयोजनेन संस्करणं च अभीप्सितमासीत् । लोक–

हिताय नवीनानां नियमानामाविष्करणं, निरूपणं च दूरदर्शिनां कर्तव्यतया उपपन्नतरम् । ईदृशव्यत्यासः परिवर्तनशीलेऽस्मिन्संसारे अनादेः कालात् प्रावर्तत, वर्तते भविष्यति च ।

शास्त्रोद्देशः

सर्वेषां शास्त्राणां उपदेशस्य विशिष्टपुरुषाणां व्यापारविशेषाणां च परमं फलं लोकहितम् । तेषां सिसाधयिषया सर्वे धर्माः, सर्वाणि शास्त्राणि, सर्वाः कलाः, सर्वे उद्यमाश्च अभ्यूहिताः, उपदिष्टाः, अनुसृताः, आचरिताश्च; ये व्यसने, अभ्युदयेचोपकुर्वन्ति, इहामुत्र च हिताय प्रभवन्ति । शास्त्राणि कामं बहुसंख्याकानि भवन्तुनाम, परंतु सर्वाणि शास्त्राणि मानवस्य नीतिं पुरस्कृत्यैव प्रवर्तन्ते । मानवसमाजस्य रक्षणं, अभिवर्धनं, धर्माचरणे दक्षता–सम्पादनं च अर्थशास्त्रायत्तम् । अत एव ‘सुखस्य मूलं धर्मः’, ‘धर्मस्य मूलमर्थः’, ‘अर्थस्य मूलं राज्यम्’, ‘राज्यमूलमिन्द्रियजयः’, ‘इन्द्रिय–जयमूलं विनयः’, ‘विनयस्य मूलं वृद्धोपसेवा’, ‘वृद्धोपसेवाया विज्ञानम्’, ‘विज्ञानेनात्मानं सम्पादयेत्’, ‘सम्पादितात्मा जितात्मा भवति’, ‘जितात्मा सर्वार्थैस्संयुज्यते ।’ इति दशसु सूत्रेषु धर्मसर्वस्वं संजग्राह चाणक्यः सर्वभूत–हितैषी ।

चाणक्यस्य जीवितम्

पञ्चनदक्षेत्रे (Punjab) तक्षशिलानगरे अयं महात्मा जनिं लेभे । चणकदेशे जातश्चाणक्यः इति, कुटिलगोत्रेण कौटिल्येति, मातापितृभिर्विष्णु–गुप्तेति नामकरणेन च प्रथितो बभूव । केचन वात्स्यायनः कामसूत्रप्रणेता, न्याय-सूत्राणां भाष्यकारश्चायमेवेति बहुधा विकल्पयन्ति । अनेन वेदत्रयी अध्यगायि । रूपेण विकृतः, कुशाग्रमतिः, आमरणं नैष्ठिकब्रह्मचारी चावर्तत । तस्मिन्काले

पाटलीपुत्रे (Patna) मगधशासनं प्रावर्तत। सम्प्रदायानुसारेण तत्र धर्म-शालाधिकारे कौटिल्यः नियोजयितव्य आसीत्। राजा महापद्मनन्दः अस्य व्यक्तित्वमेवानर्हताहेतुं निरूप्यास्मै दानशालाधिकारं निराचकार। अनेनो-द्वेजितश्चाणक्यः प्रतीकारं दध्यौ। महापद्मस्य सुनन्दा नाम महिषी, मुरा नाम्नी (मौर्वी) भोगिनी चास्ताम्। महिष्यामष्टौ पुत्राः समजनिष्यन्त। भोगिन्यां पुनश्चन्द्रगुप्त नाम्ना एकः पुत्रः समजनि। चाणक्यः चन्द्रगुप्तस्य सहजान् गुणानाकलय्य एनं तक्षशिला विश्वविद्यालयमनयत्। तत्रार्थशास्त्रे धनु-र्विद्यायां च प्रवीणमकरोत्। चन्द्रगुप्तं नन्दवंश प्रतीकाराय उपकरणीकृत्य सेनां संघटयामास। ग्रीक् आक्रमणकारिणः अलेक्साण्डर् महाराजस्य युद्धक्रमान् कूलंकषं राज्यविस्तरणदक्षतां च अधिजगाम। केचन ऐतिहासिकाः ग्रीक् राज्ञः आदर्शमनुसर्तुं इच्छन् एकच्छत्राधिपत्यस्थापने अस्य मतिरजायतेति वर्णयन्ति।

एकच्छत्राधिपत्य भावना

भारतीयानां एकच्छत्राधिपत्यभावना अनादिकालतः नरीनर्ति भावनां-वरेषु। "यावत्सूर्य उदेत्यस्तं यावच्च प्रतिगच्छति। तत्सर्वं यौवनाश्वस्य मान्धातुः क्षेत्रमिष्यते"॥ इति विष्णुपुराण वचनं स्मरणमर्हति। अधुनातन कल्पना या "यस्मिन् राज्ये सूर्यो नास्तं गच्छतीति" सा प्राचीनतमा भावना। तथा चक्रवर्तिपदवीमधिकृत्यापि "हरिश्चन्द्रो नलो राजा पुरुकुत्सः पुरूरवः। सगरः कार्तवीर्यश्च षडेते चक्रवर्तिनः"॥ इत्यनन्यसामान्यं चक्रवर्तिपदं एकच्छत्राधिपत्यसूचकं संजगदिरे।

अलेक्साण्डर् महोदयः भारताक्रमणकाले पराजितप्राय आसीत्। अनन्तरं चाणक्यसहकृतश्चन्द्रगुप्तः तक्षशिलां स्ववशमनैषीत्, ग्रीक् सैन्यं व्यद्रावयत्। सामान्येषु राष्ट्रीयभावनां उदपादयत्। अनेकान् प्रधानान् मण्डलेश्वरान् स्ववशीचकार। B. C. 321 तमे वत्सरे नन्दराज्यं स्वायत्तमकरोत्। अलेक्सांडर् प्रतिनिधिना सह सन्धिं विधाय तस्य पुत्रीमुपायंस्त। एवं चन्द्रगुप्तः

वङ्गसमुद्रमभिव्याप्य अरब्बीसमुद्र पर्यन्तं आफगानूदेशं च स्वीयाखण्डच्छत्र–छायामनैषीत् । अनेनोद्यमेन भारतीयानां भावनाम्बरविहारी एकच्छत्राधि–पत्यस्थापना प्रत्यक्षानुभवेन अनुभूयमाना राष्ट्रीयतां भेजे ।

चाणक्यो न केवलं ग्रन्थाध्ययनपटुः अथवा उपदेशविचक्षणः, किन्तु अवगतमधिगतं च विषयं प्रयोग–परीक्षणैः, फल–निरीक्षणैश्च अनुभव पर्यन्तं परीक्षयामास । यो नियमः प्रयोगे नान्वेति स नियमः औदासीन्यमर्हति । व्यक्तीनामधिकारानुरोधेन सर्वेऽपि स्वं स्वं कर्म अप्रमत्ततया अनुतिष्ठेयुः "धर्मो वा सम्प्रदायो वा न्यायो वा नीतिर्वा आदर्शो वा भवतु लोकहितस्य यदि प्रत्यनीकः स्यात् स परित्यागमर्हति । सनातना वा अधुनातना वा ये नियमाः सर्वात्मना लोकहितमेवातन्वन्ति ते पुरस्कारमर्हन्ति । व्यक्तेः स्वातन्त्र्यं लोकहितनिघ्नेन भवितव्यम् । सर्वदा मानव समाजे इदं लोकहितम् । इद–महितमिति निर्णये तत्तत्कालिक शासकवर्गाध्यक्षाः, पण्डिताश्च लोकज्ञाः प्रमाणम् "शास्त्रज्ञोऽप्यलोकज्ञो मूर्खतुल्यः" तादृशानां पण्डितानां वचनं नादर्तव्यं धर्मनिर्णये ।

त्रिवर्ग प्राधान्यम्

त्रिवर्गं प्रधानं मानवजीवनस्य । त्रिवर्गविमुखानां पण्डितानां सामा–न्यानां च इहलोके सुखं नास्ति, परलोकः संशयितः । तस्माद्धर्मार्थकामानां विशदप्रतिपत्यर्थं अर्थशास्त्रं प्रणिनाय । राज्यं विना अर्थसंपन्नसंपद्यते । अर्थाभावे धर्माभावः, तदभावे सुखाभावः कामः खलु सर्वैरनुभूयते । धर्माविरुद्धाः कामाः भोगाय भवेयुः । "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" इति भगवद्गीतायां च दृश्यते । "धर्ममूलत्वात् कामफलत्वाच्चार्थानाम्" अत एव महाभारते 'राजानं प्रथमं विन्देत् ततो भार्यां ततः सुखमिति' व्यासः राज्यस्य प्राथम्यं उररीचकार ।

प्रजापालनायोजनम्

समाजस्य रक्षणं बहुमुखं अनंतप्रकारं च काल—देश—दशानुरोधेन प्रकारान्तरमापद्यन्ते, रूपान्तराणि भजन्ते। तस्माद्राज्यभारक्रमः नवनवोन्मेषशालिनां प्रतिभावतां निर्णयानुरोधेन प्रयोगविषयो भवितुमर्हति। पराभिक्रमणाद्रक्षणं अविशिष्टम्। प्रकृतिव्याकोपेनापि रक्षणं प्रजानां गुरुतरं वर्तते। क्षामडामरेषु अतिवृष्टि-अनावृष्टिग्रस्तेषु सामूहिक रोगाभिघातेषु च राज्ञः सहायः प्रजाः रक्षयिष्यति। तथा विद्याभ्यासेन, धर्ममार्गनयनेन, विवाद-परिहारेण धर्मविरुद्धानामुत्पथं प्रतिपन्नानां यथोचितदण्डनेन सर्वदा यथाशक्ति स्व स्व कर्मसु निर्बाधं विनियोजनेन च सामान्यं हितं सुविशदं अनाकुलमभिवर्धयति। रक्षणाविभागे आन्तरीयशान्तिः, उद्रिक्तानां दमनम्, अनुरक्तानां समर्थानां गुरुतर कार्यनिर्वहणेविनियोगश्चेति सामान्य नियमास्सर्वत्र सर्वदानुष्ठिताः। पुण्यस्थलेषु अन्तःप्रान्तीय प्रवासेषु च विशेषतः रक्षणाविभागः तत्परो भूयात्। अविवाहितानां विधवानां च व्यसने प्रभुशक्ति रक्षणं विधित्सितम्। तथैव कुटुम्बजीवने यद्यशान्तिः सम्भवेत् तदा दाम्पत्यविच्छेदनं विच्छिन्नानां स्त्रीपुरुषाणां पुनः विवाहश्चापत्काले अङ्गीकृतः।

लोकानां नियमनप्रकारः

संचारसौकर्यार्थं राजपथः निर्मापयत्। वैद्यशालाः पशूनां मनुष्याणां च व्यवस्थापयत्, प्रजानां मनोविनोदनाय फलाहारमन्दिराणि पानमन्दिराणि नाट्यशालाश्च अपेक्षानुरोधेन निरमायि। वेश्यावासान् द्यूतागाराणि च रक्षणाविभागेन सीमितान् विदधे। विस्तृतत्वाद्राज्यस्य अतिशीघ्रगामिनां वाहनानां इदानीमिवाभावात् मण्डलेश्वरेषु ग्रामाणां संघाध्यक्षेषु च व्यवस्थाधिकारं समर्पयत्। प्रतिग्रामं एकः अधिकारी। सः दशग्रामाधिकरिणः अधीनः। सोऽपि अधिकसंख्याकग्रामाधिकारिणः अधीन इति नियम्यनियामकभावश्रृंखलां

वितेने । रजकस्य प्रमत्ततया वस्त्रक्षालन कर्मणि यदि वस्त्राणि त्रुट्यन्ति तदा तस्य दण्डः । भूकरग्रहणे, वार्तायां च करान् अनेक प्रकारान् लाभानुरोधेन अगृह्णात् । देशस्य विपदि श्रीमद्भ्यः बलात् धनं; धान्यं चाददे ।

उपायचतुष्टयम्

परदेशव्यवहारेषु सन्धिः, विग्रहः, यानम्, माध्यस्थ्यम्, सामः, दानम्, भेदः, दण्डश्च यथासमयं प्रायुञ्जत् । साम एव तेषां प्रधानः । तेन इष्टार्थासिद्धौ दानभेदौ, तस्याप्यनवकाशे अन्ततो दण्डः । दण्डोऽपि यथार्हः स्यात् । बुद्धिमान्, पराक्रमशाली शत्रुरपि शनैः शनैः वशीकर्तव्यः न तु हन्तव्यः । गत्यन्तराभावे हन्यादेव । प्रजाहिताय करादानम् । प्रजाहिताय राज्यस्याभि-वर्धनम्, प्रजाहितार्थं सैन्यत्रिभागसंरक्षणम्, प्रजानां अभिप्रायानुरोधेन मण्डलेश्वराणां प्रतिष्ठापनं च विहितम् । अनेन पथा राज्यभारक्रमेण संपदभिवृद्धिः तेन धर्माचरणम्, ततः प्रजानां सुखमित्यध्यगात् ।

इममर्थं उपदिश्यमानं अर्थशास्त्रमिति गीयते । "धर्ममर्थं च कामं च प्रवर्तयति पाति च । अधर्मानर्थ विद्वेषानिदं शास्त्रं व्यपोहति ।" चिरन्तनैः समकालिकैश्च लिखितान्यर्थशास्त्राणि समालोच्य काल-देशानुरोधेन समीचीन-मर्थशास्त्रं प्रणिनाय कौटिल्यः यथा स्वयमेवाह " दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकारणाम् । स्वयमेव विष्णुगुप्तश्चकार सूत्राणि भाष्यं च " ।

एवं चाणक्यः स्वजीवने नैष्ठिकब्रह्मचारी, भावनया स्वार्थरहितः, व्यवहारेषु ममतारहितः, आञ्जनेय इव भीष्म इव च महिम्ना बभौ । बुध्या गीष्पतिः, वात्सल्येन प्रजाः चन्द्रगुप्तं चासेवत । अर्थशास्त्र प्रणयनेन राज्य-विस्तरणेन भारतस्य गौरवं ऐकमत्यं च प्रत्यस्थापयत् । न कदापि अमात्यपद-मधिरूढमात्मानं राज्ञः अधीनं सम्भावयामास । परन्तु वात्सल्येन तमाराधयत् ।

अनेनाधिकारिणां आदर्शमुपहारीकृतवान् । कर्माचरणमावश्यकं, परं निर्लिसेन भाव्यम् । संप्रदायोऽनुसर्तव्यः श्रद्धेयश्च तथापि काल-देशासंगतास्त्याज्याः । व्यक्तिस्वातन्त्र्यं, स्वतन्त्रभावना च आवश्यके, परमेते मानवजीवनहिताधीनतया सीमिता भूयासुः । तस्मात् प्रजानां वेदाध्ययनेन धर्माधर्मं ग्राहयामास । वार्तायां देशस्य हिताहितौ दण्डनीत्या नयानयौ च न्यवेदयत् । स्वातन्त्र्येण विषयविमर्शनं निर्णयश्च विमर्शनशक्तिं विना न संपनीपद्यते । तादृश स्वतन्त्रचिन्तनाशक्ति संपादनीं आन्वीक्षकीं बला-बलनिर्णयाय अध्यापयां बभूव । यस्मिन् अधुनातनाः स्वातन्त्र्यं व्यक्तेः उत्तरवादित्वं, अधिकारं च एकीकृत्य बंभ्रम्यमाणाः परिलुठन्ति । स्वातन्त्र्यं नियमरहितं अधरोत्तरं भवति ।

"चतस्रः एव विद्या इति कौटिल्यः । ताभिः धर्मार्थौ यद्विद्यात् तद्विद्यानां विद्यात्वम् । साख्यं, योगो लोकायतंचेत्यान्वीक्षकी । धर्माधर्मौ त्रय्याम् । अर्थानर्थौ वार्तायाम् । नयानयौ दण्डनीत्याम् । बला-बले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्य वैशारद्यं च करोति" ।

" प्रदीपः सर्व विद्यानां उपायः सर्वः कर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षकी मता । " — इति ।

मानवस्य कर्तव्यम्

अलेदमवधेयं अधीतविद्यः पुरुषः प्रापञ्चिकव्यवहारेषु स्वयोग्यतानुसारेण विभिन्नेषु मार्गेषु कार्यनिर्वहण समर्थो भूयात् । तदर्थमेव धर्म,-नय-वार्तादिषु लोकयात्राया साधनभूतेषु परिचयः संपादनीयः । विषयानधीत्य स्वहितं देशहितं च विदधीरन् । विषयानभिज्ञाने कूपमण्डूकायते तस्य बुद्धिः यतः स्वयमेवाह त्रिवर्गं अन्योन्यानुबन्धं सेवेत, न निःसुखः स्यात् । " अत्यासेवितः अन्योन्यं हिनस्तीति त्रिवर्गानुसरणं अविशिष्टं सर्वेषां मानवानाम् । समष्टिदृष्टिमुपजीव्य

प्रवृत्तायास्मै "कामैव पुरुषार्थः, अर्थकामा एव, एकैव विद्या, द्वे अलम्" इत्यादि प्रावादुकानां वादाः नैव रुरुचिरे। अत एव तान्निराह। समष्टिदृष्ट्याधिगतं ज्ञानं बुद्धिमवस्थापयति, प्रज्ञावाक्यवैशद्यं च करोतीति स्थूणानिखनन-न्यायेन निरूपयामास।

अपिच सर्वे प्रतिभाशालिनः लोकहितैषिणः भूयासुरिति तस्य आशंसा। श्रीमतां राज्ञां चाश्रयेण ये जिजीविषन्ति अथवा जीवन्ति ते संकुचितदृष्टिमपहाय कार्त्स्न्येन देशहितं चिन्तयेयुरिति स्वकर्मणा प्रादर्शयत्। प्राचामुपदेशेषु सार-मादद्दे। मध्यकालिकाः अर्वाचीनाश्च इमां सर्वभूतहितैषिणीं भावनां पर्यहरन्। संकुचितभावनां प्रायशोऽनुसरन्तो ये आचार्याः, श्रीहर्षादयः पण्डिताश्च अन्ये लोकोत्तरगुणोत्तराश्च समष्टिमानवजातेः हिताय यतमानाः राज्ञः श्रीमतश्च शिश्रियुः। परन्तु तेषामेते गुरवः संवृत्ताः। प्रयोजने लोकोपयोगे च तेषां संपदधीनाश्च बभूवुः। परश्शताः पण्डिताः अतिलोकमेधाविनः, आत्मगुण-परिपूर्णाः, स्वार्थरहिताश्च आसन्। परन्तु चाणक्योपदिष्टं मार्गं अनुसर्तुं लोकानां त्रिवर्गसंपादनसमर्थं स्वीयभावनाम्बरेषु केन वा कारणेन न संभावया मासुरिति न जानीमहे। तर्क–व्याकरण–मीमांसा–वेदान्तशास्त्राणि ववृधिरे। राजाश्रयेण जीविकामुद्वहन्तः कृत्स्नस्य लोकस्य हितं नानुशीलयन्तः स्वाधीतं शास्त्रं प्रवर्तयामासुः। कौटिल्येनोऽपदर्शितप्रकारमनुपजीव्य पण्डितपरंपरा लोकज्ञानवञ्चिता सीदति। आङ्गुविद्याभ्यासिनः इदानीं अन्तरराष्ट्रीयविज्ञानं पुरस्कृत्य प्रवर्तन्ते। केचनाधिनायकाः विश्वशान्त्यै यावच्छक्ति प्रयतन्तः अशेषे भूगोले यशश्चन्द्रिकाधवलितदिगन्तराः भारतदेशस्य मकुटायन्ते। चाणक्यस्य नाम्ना केन्द्रशासन राजधान्यां चाणक्यपुरीति विदेशीय दूतावासभागस्य आख्या विहिता एनं स्मारयति।

महाराणी लक्ष्मीबाई

(बि. पद्मनाभ भट्टः)

प्रातः स्मरणीय छत्रपति शिवाजी महाराजेन प्रतिष्ठापिते महाराष्ट्रसाम्राज्ये क्रमेण पेष्वे राज्यभारक्रमो राजति स्म। तेषां पङ्क्तौ बाजीराव् नामा महाराष्ट्रीयः पूनाप्रान्तं परिपालयन्नासीत्। अयं पुनः तृतीय महाराष्ट्र युद्धे निर्जितः विठुरग्रामे निवसति स्म। तदा आंग्लेयाः अप्पासाहेबनामानं अस्य संबन्धिनं पूना राज्ये अभिषेचयितुं उद्युक्ता अभवन्। तदायं तदधीनो भूत्वा राज्ये स्ववासं नोचितमिति परिगणयन् काशीक्षेत्रं ययौ। बाजीरायस्य मन्त्री मोरोपन्त् नामा महाराष्ट्र ब्राह्मणः तमन्वगच्छत्। मोरोपन्तस्य भागीरथी नाम भार्या आसीत्। सा तत्र क्रि. श. १८३४ तमे वर्षे पुत्रिकारत्नं प्रासूत। तां मनूबाई इति नाम्ना आह्वयन्। भागीरथी तदनन्तरं वर्षत्रयाभ्यन्तर एव दिवमगात्। तदनन्तरं पिता एव तां परिपालयन् आसीत्। केषुचिद्वर्षेषु व्यतीतेषु अप्पासाहेबोऽपि अम्रियत। तदा मोरोपन्तोऽपि बाजीराव् सकाश-मागतः। तत्पुत्रैस्सह स्वसुतां राजयोग्याः विद्याः अभ्यासयामास। मनूबाई धनुर्विद्यायां अश्वारोहणे च अतीवप्रावीण्यं लब्ध्वा सर्वेषामानन्दमाश्चर्यं च जनयामास। तदा झान्सी नगरे गङ्गाधरराव् नामा राज्यं परिपालयन्नासीत्। तेन सह मनूबाई-विवाहोऽभूत्। विवाह समये इमां लक्ष्मीबाई इति नाम्ना आह्वयामासुः। अस्याः पितरं सेनानायकस्थाने गङ्गाधरराव् नियोजयामास। महाराष्ट्रभाषायां "बाई" इत्यस्य पदस्य माता इत्यर्थः।

इत्थं कंचित्काले गते सति लक्ष्मीबाई उद्याने शस्त्रविद्याध्ययनार्थं शालां निर्माय सीतानाम्नीं स्वसखीं अध्यापयितुं नियोजयामास। अनेन बह्व्यः स्त्रियः

युद्धनैपुण्यमलभन्त । इत्थं सुखेन काले गच्छति लक्ष्मीबाई गर्भमधत्त । सन्तुष्टो राजा यथोचितानि मङ्गलकर्माणि निर्वर्तयामास । लक्ष्मीबाई पुत्रं प्रासूत । किं ब्रूमो दैवगतिं ? अयं बालकः मासत्रयाभ्यन्तरे दिवं ययौ । चिन्ताज्वरेण–पीडितो राजा रुग्णो बभूव । स्वीयायुषि संदिहानः स्वभ्रातुः नेवाल्करस्य पुत्रं यथा-विधि स्वीकृत्य तदा अगताय डाल्हौसी नाम्ने आंग्ल-राज्यप्रतिनिधये एतद्वृत्तान्तं विज्ञाप्य दिवं जगाम । लक्ष्मीबाई पतिपुत्रवियोगेन दुःखमनुभवन्त्यपि राज्य–परिपालने अत्युत्सुका अभूत् ।

एतद्राज्यस्य स्वायत्तीकरणे कालावकाशं निरीक्षन् डाल्हौसी एवमाह " ईस्ट इन्डिया कम्पेनी शासनानुसारेण पुत्रस्वीकारः नाङ्गीकृतः । झान्सी–राज्यस्याधिकारः स्वायत्तीकर्तव्य " इत्याज्ञां ददौ । राज्ञै तावत्प्रतिमासं पञ्च–सहस्ररूप्यकाणि भरणाय दातव्यमिति च । आज्ञामिमां परिपालयितुं एलिस् नामा आंग्लाधिकारी महिषीं द्रष्टुमागतः आज्ञां श्रावयामास । तदा महिषी उवाच 'भारतीयाः स्वातन्त्र्येच्छवः कदापि पराधीनतां नाङ्गीकुर्वन्ति । मामपि स्वातन्त्र्यरक्षणे धृतासिकां विद्धि, एतद्राज्यं परायत्तं न भविष्यतीति'। इत्थमाज्ञा-मुल्लंघ्य तिरस्कृतः एलिस् परेद्युरेव सेनामन्तः प्रवेश्य आयुधागारं अश्वशालां च स्वायत्तीकृतवान् । अस्मिन् समये किमपि कर्तुमशक्ता महिषी बहिर्निर्गत्य नगरान्तरं ययौ । तदा इत्थं स्वराज्य विप्लवेन दुःखिता महिषी नानाराव् नामानं द्रष्टुं ब्रह्मावर्तं गता । तस्मै सर्वमपि वृत्तान्तं निवेदयामास । एतत् श्रुत्वा कुपितोऽयं उवाच यथा कथंचिदपि द्वीपान्तरात् वाणिज्यहेतुनास्मद्देशमागत्य राज्याक्रमणाय प्रवृत्तानेतान् विद्रावयितुं प्रयत्नः कर्तव्य इति विचिन्त्य भारतीय-जनहृदयेषु स्वातन्त्र्याभिलाषां उत्पाद्य जनान् संघटयामास । तथापि केचन भारतीयाः धनाशया आंग्लानां दासतामवलम्ब्य तेषां मार्गदर्शका अभवन् ।

आंग्लशासकैस्सह वैमनस्यं द्विधा महिष्यै क्लेशावहमभूत् । छद्मचारिणः राजकीय रहस्यं तेषां निवेदयामासुः । गौराङ्गाः पुनः राज्याक्रमणे बद्धश्रद्धाः प्रयत्नशीलाश्च बभूवुः । अस्मिन्नन्तरे केचन राज्यमस्याः आक्रमितुं प्रायतन्त ।

महिषी चमत्कारेण पौरुषेण च तान्विजित्य निस्सारयत्। अनेन युद्धसमारंभेन अस्तव्यस्तभूतायां व्यवस्थायां आंग्लसेनानीः अनेकसहस्रैर्योधैस्सह झान्सी मरुन्धत्। व्यवस्थायै अवकाशमलभमाना महिषी विद्यमान–सहोद्योगिनां सहायेन योद्धुं दृढप्रतिज्ञां चकार। केचन श्रद्धालवः साहाय्यमाचरितुमुद्युक्ता अपि सकालं न प्रपेदिरे। अन्ये रन्ध्रान्वेषिणः शत्रून् दुर्गे प्रवेशयामासुः। एतस्मिन्विषमसमये क्षात्रधर्ममेव शरणं निश्चित्य आप्तैस्सह निर्गत्य यावच्छक्ति शत्रूनच्छिनत्। ततः दूरदेशं गन्तुं मतिं चकार। तथापि स्वपक्षीयानामभि-द्रोहेण गौराङ्गाणां कूटयुद्धेन अग्निगोलकाभिघातैश्च अन्ततः वीरस्वर्गमगात्। वीररमणी लक्ष्मीबाई पराक्रमेणाभिमन्युं स्मारयति। यावज्जीवं देशस्य स्वातन्त्र्यं रक्षणीयमिति चरमकालपर्यन्तं अव्यभिचरितं विक्रम्य देशभक्तानां कर्तव्यपरायणानां च स्फूर्तिदायिनी महाशक्तिरिव स्वचारित्र्येण इदानीमपि लोकानुद्बोधयति।

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड्योगयुक्तश्च रणेचाभिमुखो हतः॥

दयानन्द सरस्वती

(के. वेङ्कटदास शर्मा)

अनादिकालात् प्रवृत्तस्य आर्यविज्ञानस्य ह्रासः क्रमशः परदेशीयानामाक्रमणेन समपद्यत। देशविपदः व्यक्तीनाक्रम्य अन्धीचक्रुः। विद्याभ्यासः देश-भाषासु प्रवर्तमानोऽपि संस्कृतभाषामवलम्ब्यैव, विशेषेण संस्कृतभाषायामेव उच्चतरं ज्ञानं लोकाः प्रपेदिरे। ग्रामेषु वर्तमानानां देशविदेशविषयकज्ञानं ह्रासमगात्। प्रवासेषु स्थैर्याभावात् जिगमिषा पण्डितानां प्रायशः तिरोहितोऽभूत्। एवं अनेकैःकारणैः विशालभावनया वञ्चिताः श्रद्धालवः केचित् एकैकं शास्त्रमेव अधीयानाः शास्त्रं संप्रदायञ्च ररक्षुः। परन्तु विशाल दृष्टेरभावात् प्रयोग प्राचुर्याभावाच्च शास्त्रज्ञानं वन्ध्यात्वमवाप। कतिपय समयेषु विवादाय च व्यजृम्भत।

अस्मिन् विषमसमये श्रीकृष्णस्य अवतारेण पवित्रीकृते घूर्जरदेशे दयानन्द सरस्वती क्रिस्तशक १८२४ तमे वर्षे सारस्वत ब्राह्मणस्य कर्षणलाल इति नाम्नः पुत्रः समजनि। बाल्ये सामान्य बालका इव देशभाषां संस्कृतभाषां वेदांश्च-अधीयानः आसीत्। तत्वजिज्ञासुः ब्रह्मचारी मधुरायां ब्रह्मज्ञानसंपन्नं व्याकरण पण्डितं विरजानन्दं जात्यन्धं शिश्रिये। तस्य उपदेशेन लोकज्ञानं शास्त्रज्ञानं च करबदरसमानं अधिगच्छत्। भारतीयानां प्राचीनवैभवं समाकलयामास। स्वदेशीयानां विषमावस्थां विभाव्य भृशं विषीदत्। इमे भारतीयाः केनापराधेन सीदन्ति ? हेतुश्च कः ? निवारणोपायश्च कः ? कथं वा ऋषीणां अन्ववाये संजातानां वैक्लब्यं, अज्ञानं, जाड्यं, अनैकमत्यं च

समजनीति निभृतं चिन्तयामास । मनन शीलस्याऽस्य वेदज्ञानविमुखतैव विषमपरिस्थितेः हेतुरिति प्रत्यभात् ।

पुराणेषु प्रक्षिप्तान् विषयान् श्रद्दधानान् अन्वकम्पत । वेदानां अध्ययने शक्तानां सर्वेषां अधिकारः वर्तत इति जुघोष । मूर्तिपूजा एव निश्श्रेयस हेतुरिति मन्यमानान् पण्डितंमन्यान् युक्तिभिः प्रमाणैश्च निरास्थत् । जन्मना जाति–मभ्युपगच्छतः सिद्धान्तं वादविवादेषु शिथली चकार । वेदवाङ्मयेषु संहिता–भागस्य अपौरुषेयतां संस्थापयामास । कल्पितोत्प्रेक्षितकथानकैरनुरञ्जितान् पौराणिक–प्रबन्धान् प्रमाण पदव्या निस्सारयत् । सर्वेषां वेदाधिकार प्रदानेन वैदिकसंस्काराणां अनुसरणेन च समाजे ऐक्यं प्रतिष्ठापयामास । "इमां कल्याणीं वाचमावदानि जनेभ्यः" इति वैदिकीं सूक्तिमाम्रेडयत् । अस्योप–देशेन प्रभाविताः परश्शताः पण्डिताः सामान्याश्च जनाः समाजस्य पुनरुद्धरणे बद्धश्रद्धा बभूवुः । विदेशीयराज्यभारे व्यक्तिस्वातन्त्र्यं न कदापि सेत्स्यतीति जनानुद्बोधयामास । जीवात्मपरमात्मनोः ऐक्यं, विश्वमशेषमविद्याविलसितमिति प्रावादुकानां आशयं निराचकार येन बहवः अकर्मण्यतामुपजग्मुः । तथैव नित्यसुखानुभवेन पुनरावृत्तिरहितं मोक्षमास्थितवतां पक्षं श्रुति प्रमाणेन तदर्थ विवरणेन च अन्यथा व्याख्यास्यत् ।

सर्वलोकहितैषिणां दृष्टिरनन्यादृशी विलक्षणा स्फुरति । समाजसंस्करण-द्वारा ऐकमत्यं आर्थिक–राजकीयादि स्वातन्त्र्यं च संपादयेयुरिति कार्यक्रमं व्यवस्थानुरोधेन परिकल्पयत् । बौद्धानां संघारामाणां उद्देशः यथा कतिपय शतकेषु भग्नः, तथैव मठानां मन्दिराणामुद्देशोपि । अथवा अलसानां स्वेच्छा–चारिणां च केन्द्रभूताः अभूवन्निति पर्यशीलयत् । ततः विदेशीय राज्यभारग्रस्ते देशे प्रजासु राष्ट्रीयभावना प्रचोदनार्थं विद्याशालाः प्रतिष्ठापयितुं जनान् प्रेरयामास । एतदर्थं स्थापितस्य संघस्य "आर्यसमाजः" इत्यभिख्यां अकरोत् । विशाल भावनावन्तः विभिन्न संप्रदायानुयायिनश्च अस्मिन् समाजे समनुययुः । न कोपि संप्रदायः संघोवा स्वातन्त्र्येण सर्वात्मना जीवितुमलम् । मानव समाज-

मशेषं एकं शरीरम् । अतः सार्वजनिक प्रयतनानि सर्वहितानुयायिभिः भवितव्यानीति निश्चिनोत् ।

राज्ञां राज्यशासनप्रणाल्याः चरमकालमनुसन्धाय प्रजासु स्वातन्त्र्येच्छां राष्ट्रीयभावनां च उत्पादयितुं अभिवर्धयितुं राष्ट्रीयविद्याप्रचाराय बद्धकंकणो प्रावर्तत । श्रद्धानन्दादयः बहवः शिष्याः अस्मिन् मार्गे प्राचलन् । येषां परिश्रमेण इदानीं षष्ठिसंख्याकाः गुरुकुलानि २५० संख्याकाः उच्चशालाः प्रौढशालाश्च द्विसहस्रसंख्याकाः पाठशालाः द्विशतचिकित्सालयाः द्विशत गोशालाः अनाथालयाश्च वनिताश्रमाश्च प्रजासेवां वितन्वन्ति । द्विसहस्र-संख्याका उपदेशकाः अनवरतं प्रजाः उपदेशैः बोधयन्ति । पञ्चशतसंख्याक व्यायामशालाः अतिथिभवनानि च विलसन्ति । मुद्रायन्त्राणि-पुस्तकालयाः वाचनालयाश्च अविश्रान्तं ज्ञानं प्रसारयन्ति । बरोडानगरे विद्यमान कन्या-गुरुकुले अश्वारोहणं इत्यादि योधशिक्षणमपि कन्याभ्यः दीयते । शिष्टासु शालासु सर्वासु आधुनिक विज्ञान विषयाः तैस्सह संस्कृतभाषां वेदांश्च यथोचित रीत्या बोधयन्ति । आर्यसमाज विद्याशालासु अधीतविद्याः नियमेन देशभक्ताः वीरव्रतिनश्च भवन्ति । मठैः मन्दिरैश्च यत्कार्यं साधितव्यमासीत् तत्कार्यं आर्यसमाजीय श्रद्धालुभिः नेतृभिः कर्मचारिभिश्च अनुष्ठीयते । एवं समष्टि-दृष्टिमालंब्य स्वामी दयानन्द सरस्वती अधिकारानुरोधेन सर्वेभ्यः त्रिवर्ग साधनानि अबोधयत् । मोक्षार्थिनां लोकानुग्रहरूप कर्माचरणमुखेन मोक्षलाभ-मचीकथत् । स्वयं ब्रह्मचारी स्वार्थरहितः, विश्वमेव ईश्वररूपं संभाव्य देश-सेवामेव ईशसेवां विदधे । ये मठाधिकारिणः मन्दिराधिपतयश्च तेषां कर्तव्य-वैमुख्यं च स्वदृष्टान्तेन लोकेभ्यः दर्शयामास । एवं "कृण्वन्तो विश्वमार्यमिति" सर्वानपि आर्यान् विधातुं महान्तं प्रयत्नमाततान । राजकीय—सामाजिकादि क्षेत्रेषु कर्तव्यनिष्ठान् अनेकान् नेतॄन् उत्पाद्य इहलोकयात्रायाः १८८३ तमे वर्षे परमां शान्तिमवाप ।

लो क मा न्या :

(एस्. नरसिम्हदीक्षितः)

वेदेषु भूगोलस्वरूपाभिवर्णनं व्यवस्थानुरोधेन नोपलभ्यते। पुराणवाङ्मये तु सप्तधा भूगोलं विभज्यानुवर्णितम्। कार्तान्तिकाः द्वादशधा भूगोलं राशीनां विभागानुरोधेन विभजन्ति। भारतभूमिः जम्बूद्वीपान्तर्भूता इति चिरन्तनैः रगणि। तथा चतुःषष्टि राज्यविभागैः शासितेति पुराणैरवगच्छामः। व्यवस्थित-निरूपणानामभावात् परश्शतेभ्यो वर्षेभ्यो विदेशीय साहसिकानां आक्रमण-विषयीकृतत्वात् भारतभूमेः अनुगतरूपेण इतिहासभूगोलयोःस्वरूपं सुविशदं अधिगन्तुमशक्यम्।

सत्येवं तदा तदा महोदयाः अस्तव्यस्तं वाङ्मयकाननमपि स्वीयज्ञान-ज्योतिषा प्रकाशयन्ति आप्लावयन्ति च। कदाचिदतिप्राचीनस्य ज्ञानप्रपञ्चस्य मूर्तीभूता इव लोकेभ्यः परिदृश्यमानाः प्रभावयन्ति। ईदृशानां पङ्क्तौ श्रद्धा-विश्वासनिष्ठागरिष्ठानां चित्पावनद्विजानामन्वये महाराष्ट्रदेशे रत्नगिरौ गङ्गाधर-दम्पत्योः क्रि. श. १८५६ तमे वर्षे बालगङ्गाधरतिलक् महोदयो जज्ञे। पञ्चदश वर्षेष्वेव विधिना मातापितृभ्यां वञ्चितोऽभूत्। आंग्लविद्याभ्यासप्रणाल्या क्रि. श. १८७६ तमे B.A., १८७९ तमे L.L.B. परीक्षासु प्रथमश्रेण्यां पदं लेभे। विद्याभ्यासानन्तरं अर्थार्जनोपाय भूतान् राजकीयाधिकारविशेषान् अनादृत्य देशसेवायाः प्रथम प्रतीकं विद्यापीठं प्रतिष्ठापयामास; १८८० तमे वर्षे, "नवीनांग्ल पाठशाले"ति नाम्ना आरभ्य लोकान् देशभक्तौ तत्वज्ञाने च प्राबोधयत्। व्यवहारमर्यादानुरोधेन महाराष्ट्रभाषायां "केसरी", आंग्ल-भाषायां "महाराष्ट्र"ति नामभ्यां द्वे पत्रिके संस्थाप्य तद्द्वारा स्वीयतीक्ष्ण

प्रतिभान्वितानि लेखनानि स्वराज्यमन्त्रविशिष्टानि भरतखण्डस्याद्यन्तं प्रचारयामास । तदानींतन शासन विरुद्धलेखनप्रकटनं – देशविद्रोहापादकमिति व्याजेन शासकैर्वितरितं कारागारवासमनुबभूव । १८९० तमे वर्षे राष्ट्रीय महासभां (Indian National Congress) प्रविवेश । तत्रापि "आप्नोति स्वाराज्य" मिति मन्त्रं विद्युद्वेगेन समस्तेभ्यः जनेभ्यः उपदिदेश । स्वराज्यशब्दमात्रोच्चारणेऽपि भीतिरासीत् तदा हूणराज्यावसरे ।

पुनश्च शासकानां वक्रदृष्टिविषयीकृतः कारागारं विवेश । अस्य देदीप्यमान पाण्डित्यस्य प्रभावेण आश्चर्यचकिताः आंग्लमित्राणि म्याक्समुल्लर प्रभृतयः (MaxMuller) एनं कारागृहादमोचयन् । कारागारेऽप्ययं महानुभावः "आर्याणामुत्तरध्रुवनिवासः", "मृगशीर्षानक्षत्रगवेषणम्", "गीतारहस्य" मित्यादिकान् उद्ग्रन्थान् अरीरचत् । कारागारमपि कर्मागारं अस्य नित्यप्रबुद्धस्य सिद्धपुरुषस्य । भरतदेशकारागारं वा द्वीपान्तरकारागारं वा न विशेषमुपलक्षितमनेन । राजकीय विभागेष्वयं क्रान्तिवादीति प्रथितः आसीत् । राष्ट्रीयविद्याभ्यासः, विदेशपदार्थानां बहिष्कारः, स्वदेशीयप्रचारः, समाजसेवा इत्यादयः समष्टिरूपेण व्यष्टिरूपेण च लोकेषूदघोषयत्; आंग्लशासकानामप्रधृष्यो प्रतिवादी बभूव । अस्य सततप्रयत्नेन शासनप्रणाल्यां बहूनि परिवर्तनान्यभूवन् । विश्वविख्यातयशाः महात्मा गान्धीमहोदयः इमं राजकीयाचार्यममन्यत ।

पाण्डित्यं, सौजन्यं, दूरदर्शित्वं, परदुःखनिवारणेच्छा, निर्भीकता, सत्यनिष्ठा, धर्मश्रद्धा, वेदेषु असामान्यपाण्डित्यं, एकहेलयैव नेतृणामाविष्करणंचास्य गुणगणेषु प्राधान्येन गणनामर्हन्ति । वेदानां ज्ञान भाण्डागारेण भूषितः,

तत्वशास्त्रेषु निष्ठामवाप्य द्वन्द्वातीतः, कर्मयोगी, प्रभावेण छत्रपतिं लोकेभ्यः स्मारयामास ।

राजकीयसिद्धान्ते अस्य पन्थाः विलक्षण आसीत् । आदान–पूर्वक–सहयोगः (Responsive Co-operation) इति तस्य संज्ञा आसीत् । शनैः शनैः भिक्षुपादप्रसरणन्यायेन जनानां शासकानां च अनैकमत्येन विगळितं स्वातन्त्र्यं साधयेयुः इति तस्य तात्पर्यम् । नवीन भारतनिर्माणशिल्पिषु असमानोऽयं उत्तमश्लोकः वेदमूर्ती बालगङ्गाधरतिलकः अमरो विराजते ।

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्टं
सत्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
दंभासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयाळुं
स्वालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ।

राष्ट्रपिता

(एन्. लक्ष्मीनारायण श्रौती)

भारतभूम्यां घूर्जरदेशः बहुभिर्महापुरुषैः प्रथितो वर्तते। अस्मिन् प्रान्ते श्रीकृष्णः अवततार। सामाजिक—राजकीयविषयेषु धर्ममेव पुरस्कृत्य स्वकालिक परिस्थितिमनुरुध्य लोकानां कर्तव्यनिष्ठां विधिपूर्वकं उपदिदेश। अस्मिन् देशे बहवो भक्ताः, साधवः, पण्डिताश्च देदीप्यमानं ज्ञानदीपं अविश्रान्तं ररक्षुः। अतीतेषु पञ्चसहस्रवर्षेषु विप्लवाश्चाभूवन् सर्वेषु क्षेत्रेषु। म्लेच्छैः घूर्जरराज्यस्याक्रमणेन चिरन्तनो ज्ञानदीपः अकम्पत। सामान्यैः तस्य पुनःस्थिरीकरणं असंभवमिवासीत्। तस्मिन्नवसरे का. बा. गान्धी नाम्नः वैष्णवस्य चतुर्थभार्यायां (पुतलीबाई) क्रि. श. २ अक्टोबर १८६९ तमे वर्षे (पोरबन्दर्) सुधामपुर्यां मोहनदास् करमचन्द गान्धी जज्ञे।

आंग्लसाम्राज्ये राजकीय शालासु यो विद्याभ्यास आसीत्, बाल्ये तमेवान्ववर्तत। पश्चिमदेशे अधीयानः प्राड्विवाक पदवीं प्राप। स्वदेशं प्रतिनिवृत्तः समीचीनां जीविकामलभमानः आफ्रिकादेशं प्राड्विवाकवृत्या संपादयितुं ययौ। तत्र वर्णद्वेषदहनदंदह्यमानान् भारतीयानेकीकृत्य स्वातन्त्र्य–संग्राममारेभे। विदेशीयानां दूरदर्शिनः टाल्स्टाय् प्रभृतीनां विवेचना धोरिणी अनेन निपुणतरमध्यगायि। गुणाः सर्वतो आवर्जनीयाः खलु। भारतदेशमागत्य गौराङ्गराज्यभारभरेण सीदन्तं जनपदमुद्दिधीर्षुः महान्तं स्वातन्त्र्यसंग्रामं वितेने। श्रीकृष्णेन गीतां 'भगवद्गीतां' सर्वास्ववस्थासु आत्मनः द्वितीयां मातरमविन्दत। तेन विश्वकुटुम्बितां सर्वभूतहिते रतिं चात्मसाच्चकार। भारतदेशस्य संस्कृतिं मनन-निदिध्यासनैः स्वान्तरङ्गे सुविशदं ददर्श। श्रीकृष्णोपज्ञं शास्त्रशस्त्र–

संमेलनतत्वं धर्मसंस्थापनाय, देशस्य स्वातन्त्र्यावाप्त्यै च भावयाम्बभूव। अकिञ्चनाः, असंघटिताः, परस्परविद्वेषिणः, राजभिः श्रीमद्भिः, द्रोहिभिः, छद्मवादिभिश्च परिवृते जनसमुदये कीदृशं शस्त्रमाददीय इति भृशं चिन्तापङ्के ममज्ज। आत्मगुणानां विकासात् लोकहितैकपरायणस्य सत्याग्रहं नाम अस्त्रं तस्मिन् समयेऽपि अस्फुरत्।

अशेषशास्त्रसंग्रहात्मकं सत्यं, अहिंसां च शास्त्रतत्वमाददे। एतैः साध्यं परमं तत्वं शान्तिमेव संभावयामास, यस्मात् सर्वशास्त्रज्ञतासिद्धिः बभूव। सर्वदा सर्वथा लोकहितमेव धर्मं निश्चिकाय। —

शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः।
स एव सर्व शास्त्रज्ञः यस्य शान्तं मनस्सदा॥
एतावज्जन्मसाफल्यं प्राणिनां जीवतामिह।
प्राणैरर्थैर्धिया वाचा श्रेय आचरणं सदा॥

इतीमं व्यासोपदेशं अक्षरशः स्वजीवने परिपालयामास। ऋक् संहितामारभ्यै-तावत्पर्यन्तं महात्मभिः धर्मरक्षणे आदृतानुपायान् दिध्यासत्। कालानुसारेण आहितान् दोषान् पर्यहरत्। अशेषान् गुणान् समग्रहीत्, प्रह्लाद–विश्वामित्र–भरतादीनां चरितेन सत्याग्रहतत्वं अशिक्षि अनेन। महाशूराणां पृथ्विराज-प्रभृति–झान्सी लक्ष्मीबाई पर्यन्तं प्रथितानां प्रयतनानि देशस्य स्वातन्त्र्य साधने अनुसृतानि सुविशदमनुसन्दधौ। तत्र क्वचिदेकदेशभावनामपश्यत्। इमां परमां न्यूनतां अधिजगाम यतः तेषां वीराणां यतनेषु व्यक्तिविषयो वा स्वीय-कुटुम्बविषयो वा राज्यविषयो वा प्राधान्येन अन्विताः सामान्येन आसन्। विभिन्नेषु राजसु ऐकमत्याभावात् विशालभावना अन्तर्दधे। इमां न्यूनतां

परिजिहीर्षुः सर्वेषु विषयेषु अशेषोद्यमेषु समष्टिदृष्टिपीठबन्धं वितेने। भारत-देशस्य अशेषस्य स्वातन्त्र्यमेव परमं साध्यं असंकल्पयत्। चाणक्यादयो दूरदर्शिनः यान् विषयान् संचिक्षिपुः तान् यथासमयं विस्तारयामास। अशेषाणां धर्माणां अखण्डतात्पर्यं सत्याहिंसयोः अन्तर्भूतं निरणैषीत्।

भीष्मस्य सत्यनिष्ठां बहु मेने। श्रीकृष्णस्य जीवने सर्वेषां धर्माणां समावेशं परिपूर्णतांच ददर्श। कौटिल्यस्य कर्तव्यनिष्ठां सुविशदं अधिजगाम। गत्यन्तराभावात् प्रभुशक्तेरभावाच्च सत्याग्रहमेव शस्त्रं प्रयोगार्हं अजीगणत्। सत्यं, अहिंसां च शास्त्रं, सत्याग्रहं शस्त्रं च यथाकालं प्रायुङ्क्त। "नह्येकस्मात् गुरोर्ज्ञानमुत्थितं स्यात्सुपुष्कल"मित्यार्यवचनमनुस्मरन् ज्ञानसंग्रहणे माधुकरीं वृत्तिं प्रपेदे। स्वसंतोषपरायणत्वं मुनीनामपि दुस्त्यजमित्यभिसन्धाय सर्वलोक-हिताचरणं महाव्रतमातिष्ठत्। राजकीय स्वातन्त्र्यमन्तरा देशाभिवृद्धिः मनागपि न भवेदिति निश्चित्य रूढमूलान् विदेशीयान् विना रक्तपातं व्यद्रावयत्। गौतमबुद्ध इव दयामूर्तिरास। "जन्मना जातिवादं" निराचकार, भक्त-वृन्दमिव रामभक्तो बभूव। आमरणं प्रतिदिनं दैवप्रार्थनां न व्यस्मरत्।

अग्निगोलकविद्धोऽपि रामनाममुच्चरन्नेव प्राणान् विजहौ। आंग्लविज्ञानीव समयनिष्ठां पर्यपालयत्। मुनय इव तत्वार्थानचिन्तयत्। भीष्म इव कर्तव्य-धर्मपरायणः आसीत्। कौटिल्य इव सन्निकृष्टेषु विप्रकृष्टेषु च विषयेषु अप्रमत्तः अजागरत्। विश्वामित्र इव सत्याग्रहं प्रतिजग्राह। शास्त्रपण्डितेषु परम्परागतान् दोषान् आकलय्य खिन्नः तान् पर्यहरत्। तर्क–वेदान्तादीनि शास्त्राणि प्रत्येकं एकदेशभूतानीति विवृणोत्। समष्टिज्ञानं बहुमन्यमानः एकदेशदर्शिनां पाण्डित्यं तिरश्चकार। समष्टिज्ञानं विषयाणां स्वयं सात्मीचकार।

विज्ञानिनः नास्तिकांश्च विषयप्रबोधनेन सत्पथमनयत्—सर्वेभ्यः सन्मतिं देहीति भगवन्तं सदा प्रार्थयन्नासीत् ।

श्रीकृष्ण इव शस्त्रशास्त्रसंमेलनं प्रयोगविषयं व्यदधात् । मूढानपि कर्तव्यपरायणान् विदधे । शरीरेण दुर्बलः, भावनया योगी, मनने मुनिः, कर्तव्येषु कठोरः, स्मर्तव्येषु सिद्धपुरुषः, उपदेशेषु सजीवदृष्टान्तभूतः, परहितैकपरायणः, गुणग्राही, स्वमतश्रद्धावानपि परमतसहिष्णुः, शान्त्या धनी, सर्वभूतहिताचरणेन विश्वात्मतां च संमानयन् मोहनदास करमचन्द गान्धी यशः शरीरेण जेजीयते ।

अभ्यावर्तध्वमुपमेतसाकमयगं ।
शास्ताऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनुसगॅ्रभध्वम् ।
इमं पश्चादनुजीवाथ सर्वे ॥

संस्कृत विद्याभ्यासः

(जि. वासुदेवाचार्यः)

संस्कृत भाषाध्ययनं ऋक्संहिताकालादेव यं कञ्चित् क्रममाश्रित्य प्रवृत्तमिति प्रतिभाति। यथेदानीं उपलभ्यमान-वेदवाङ्मये वयं विप्रकीर्णतया विद्या-भ्यासविषयप्रतिपादकानि वचनान्युपलभामहे, तदनुसारेण गुरुकुलेषु संस्कृत-भाषाध्ययनं अध्यापनं च अनुभवप्राधान्येन प्रयोगप्राधान्येन च प्रावर्ततेति विमर्शकै र्विभाव्यते। गुरुकुलं, पितृकुलं, इति कुल शब्दः सामान्येन गेहमुप-लक्षयति। विशिष्टानां प्रतिगेहं गुरुकुलमिवासीत् इति चिन्तयितुं शक्यते। विभिन्नविषयान् अधीत्य पण्डिताः अध्यापनाय, 'आमायन्तु ब्रह्मचारिणः स्वाहा, यशो जने सानि स्वाहा' इति लोकान्वय भावनावतः लोकहितैषिणश्च आसन्। अस्मिन्ननुबन्धे अस्तु पुराणवचनम् —

"मुनीनां दशसाहस्रं योऽन्नदानादि पोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥"—इति।

दशसहस्र विद्यार्थिनां एकत्राध्ययनं, अवस्थानञ्च इदानींतन विश्व-विद्यालयानाक्षिपति दृष्टान्तेन। प्रायः एतादृशव्यवस्था मध्यकालिक परिस्थिति-मनुवर्णयति इति अधिगच्छामहे। वेदसंहितावाङ्मये एतादृश गुरुकुलाभिवर्णनं मृग्यमिव। अन्यच्चाभ्यूहः प्रवर्तते। प्रभाकरमतानुसारेण अध्ययनविधिः नियोगप्रणाल्या वेदस्य अर्थावगतिपर्यन्तं अर्थं सूचयति। भट्टकुमारिलमतानुसारेण भावनाक्रमेण अक्षर राशिग्रहणमात्र पर्यवसायी च। अनेन भट्टकुमारिल समये वेदानां केवलं कण्ठपाठमात्रेण अध्ययनस्य परिपूर्णता महाजनानां सम्मतिं

अवापेति दृश्यते येन ह्रासः ज्ञानस्य विस्पष्टमुपलक्ष्यते। प्रभाकर–कुमारिलौ प्राचीन–नवीन मतान्यावेदयतः।

पुराणेषु गुरुकुल विद्यार्थिनां चर्या — भोजनाय भिक्षाटनं, इन्द्रिय-निग्रहः, विलासवर्जनं, गुरुसेवा, सब्रह्मचारिसहवासश्च दैनन्दिन जीवन प्रकारा इति चिरन्तनैः आख्यायि। लोकोक्तिश्च 'कुतो विद्यार्थिनः सुख'मिति। एतेन गुरुकुले विद्यार्जनं श्रमसाध्यमिति परिभावयामः।

गुरुकुल विद्याभ्यासोऽपि समष्टिदृष्टिं तत्कालानुसारेण भेजे। गुरुकुल विद्यार्थी गाश्चारयामास, इन्धनान्यानयत्, गुरूणां गृहकृत्यं सर्वं अभिमान–वर्जं निर्वर्तयामास। अवरान् शिष्यान् पाठयामास, अतिथिसेवां विदधे, अध्यात्मविषयान् अश्रौषीत्, ध्यानधारणादि साधनाभ्यासेन आत्मनात्मा–नमपश्यत्। एवं रीत्या संक्षेपेण तस्य वृत्तं जानीमहे। उपनिषत्कथाः इमं अर्थं दृढयन्ति। आयुर्वेद—धनुर्वेद—गान्धर्ववेदाध्येतारश्च अध्ययनं प्रयोगञ्च समं विदधिरे। तेन तेषां नवीन विषयाणां अधिगमः, तदनन्तरं विमर्शनं, ततः प्रयोगः, प्रयोगात्स्वानुभवः, ततः साक्षात्कारश्च क्रमेण वा व्युत्क्रमेण वा अभूदिति निश्चिनुमहे।

गच्छता कालेन गुरुकुलविद्याभ्यासस्थितेः प्रकृति व्याकोपाद्वा राजकीय-सामाजिकादि विप्लवाद्वा विच्छेदः भ्रंशश्च समजनि। तदनन्तरं जन्मना जातिः, केषाञ्चिदेव अध्ययनाधिकार इत्यादि संप्रदायाः प्रादुरभूवन्। इमां विषम–परिस्थितिं समीकर्तुमिव केचन दूरदर्शिनो विद्वांसः प्रायतन्त।

भगवतो बुद्धस्य अवतारानन्तरं तत्पथानुयायिनः बहवो बौद्धभिक्षवः भिक्षुण्यश्च समाजसेवार्थं बद्धपरिकराः बभूवुः। तेषां प्रभावातिशयेन प्रायः सहस्रवर्षपर्यन्तं तक्षशिला—नलन्दाप्रभृतयः तदानींतन जनानां ज्ञानज्योतिः अनेकसंघारामेषु बौद्धविश्वविद्यालयेषु च समाराधितं रेजे। पाठप्रणाल्यां

समष्टिदृष्टि रासीत् इति शासनैः बौद्धग्रन्थैः, ऐतिहासिक निरूपणैश्च विज्ञायते। बौद्ध भिक्षवः सेवापरायणाः गृहस्थान् अविशेषेण भेजिरे। सामान्य विद्यार्थिनां गुरुकुले बौद्धभिक्षोरुपासने पण्डितापक्षेया सौकर्यं सौलभ्यञ्चावर्तत। अनेन हेतुना प्रायशो गुरुकुलपद्धत्या मानवानां भावना विहारपद्धतिं अशिश्रयत्।

यवनाक्रमणवशात् सहस्रवर्षेभ्यः प्राक् तक्षशिला ननाश, तदनु नलन्दा च। राजकीय घर्षणया पण्डिताः जीविकामलभमानाः क्रमशो दरिद्राः बभूविरे। दारिद्र्य दोषेण कदाचिदधर्मरतयश्च। सीदन्तः पण्डिताः अबुद्धि-पूर्वकमेव समष्टिदृष्टिं पर्यहरन्। अस्मिन् समये केचन आचार्याः अन्ये च भक्ताः ये धर्मस्थापनार्थं प्रायतन्त तेऽपि समष्टिदृष्टिं परिहाय व्यष्टिदृष्टिमेव अनुसृत्य लोकान् शिक्षयितुं प्रारभन्त, येन वैयन्तशास्त्रमेकमेवानेकशः प्राचारयन्। न राजकीयक्षेत्रे समाजस्य ऐकमत्यसंपादने वा निदधुः।

प्रवासेषु प्राणभयात् विद्यमानस्य एकदेशाध्ययनमार्गेण शास्त्ररक्षणमेव जन्मसाफल्यहेतुरिति मन्वानाः केवलं शास्त्रसंप्रदायं कृच्छ्रेण केचन ररक्षुः। ग्रामीणानां कालक्रमेण एकदेशदर्शि अध्ययनं संकुचितभावनां पण्डितेषु अभिवर्धयामास। जीवनक्रमस्य अध्ययनस्य च संबन्ध एव नासीत्, अनुभवस्य न सुतरां। "पठकाः पाठकाश्चैव येचान्ये शास्त्रचिंतकाः सर्वे व्यसनिनो मूर्खाः यः क्रियावान् स पण्डितः।" (म. भा.) शास्त्रभारभराक्रान्ताः खण्डन-मण्डनेषु वैदग्ध्यसंपादनं जन्मसाफल्यं च अधिजग्मुः। "यशो जने सानि स्वाहा" इति श्रुति चोदनां व्यस्मरन्। जठरपूर्त्यै धर्मविरुद्धाचारं, नीचं, श्रीमन्तं, राजानं वा परमं दैवं संभाव्य आनर्चुः। "नहि सर्वे भोजाः, न वा सर्वे विक्रमाः, अपवादरूपाः खल्वेते। तेन पण्डितानां सामान्य जनैः सह संबन्धः सुदूरमपससार। नट-विट-गायकाः वेश्याश्च कदाचित् सामान्यजनानां मनो विनोदनाय कल्पन्ते।

एकदेशाध्ययनवतां पण्डितानां पाण्डित्यं व्यवहारदक्षाणां राजकीय विदग्धानां, तथा राज्ञाञ्च अकिञ्चित्करं अनवश्यकञ्च भवति सामान्यजनानां पुनः तिलमात्रमपि नान्वेति। एवमुभयतो अनभिनन्दिताः पण्डिताः अध्ययन–जीवन–मनोभावनासु ऐक्याभावात् क्रमशः श्रीमतां राज्ञाञ्च दयाधीन जीवनाः बभूवुः, ये पुनः साक्षात्कारमेवात्मनः परमं फलमैच्छन् ते पण्डितानां वलया–द्बहिर्भूताः हिमालयगिरि कन्दरेषु निवसन्ति साधवः। पण्डितानां संसर्गः तेषां अकिञ्चित्करम् अथवा न रोचते कदाचित् प्रतिबन्धकतां इयात्। इयं दुर्गतिः सर्वेषां संस्कृतपण्डितानां समानापि विशेषेण शास्त्रपण्डितानां अरुन्तुदम्। केचन कवयस्तु इन्द्रियारामान् राज्ञः श्रीमन्तश्च संतर्प्य गो–भू–हिरण्यादिकं लेभिरे। इदं अन्यद्विषादस्थानं तत्त्वज्ञानिनः पण्डितस्य। आर्थिक–पारिश्रमिक–सामाजिक–वैज्ञानिकादि विषयेषु अयं नियमेन अनन्वित आसीत्। आस्ते च।

अनेकशतवर्षपर्यन्तं एतादृशी अवस्था विद्यावतां गौरवं ह्रसिष्यत्, बुद्धि-शक्ति रम्लायत, विश्वमशेषमेभ्यो न रोचते स्म। अद्यत्वे पुनः समाजस्य ''संस्कृतपण्डिताः भारभूताः। इति प्रावादुकैः निन्द्यन्ते च। यवन-शासन-काले प्रधर्षितास्समकुचन्। आंग्लविद्याभ्यास प्रचारानन्तरमपि पण्डिताः न कदाचित् प्रत्यबुध्यन्। परश्शताः संस्कृतपाठशालाः देवालयेषु संस्थापिताः आसन्। श्रीमद्भिः राजभिश्च प्रतिष्ठिताः वर्धिताः पोषिताश्च असंख्याकाः पाठशालाः विद्योतन्त। आसु शालासु संस्कृतभाषायां आंग्लशालास्विव लोकानां जीवनोप-योग विषयान् यदि अबोधयिष्यन्, स्वभावेन श्रद्धावन्तः गतशतकजन्मानः विद्यार्थिनः संस्कृतभाषां सम्यक् समधिगमिष्यन्त। संस्कृत पण्डिताः अनूचान संप्रदायसिद्धं, निरीक्षण–परीक्षण बहिर्भूतं, खण्डन–मण्डन पर्यवसितम्, गौरव–लाघव समालोचनैकानन्दस्वरूपं पाण्डित्यं समाराधयन्। समष्टिदृष्टि विरहितं एषां तेजः समष्टिदृष्टिं पुरस्कृत्य प्रवर्तितस्य आंग्लभाषाध्ययन सूर्यस्य पुरतः खद्योतायते स्म। आंग्लाधिकारिणः पण्डितानां सांप्रदायिकं वैक्लव्यं सुविशदमुपलक्ष्य यत्र क्वचिदिमां मर्यादां एव रक्षितुं प्रदर्शनार्थं च पाठशालाः व्यवस्थापयन्। अनेन समष्टिदृष्टिविहीनाः पण्डिताः आनन्दतुन्दिलाः कदाचित्

स्वार्थमपि साधयामासुः। तत्रापि अध्यक्षस्थाने प्रथमं गौराङ्गः, तदनु आंग्ल-भाषापण्डितः आरोपितः शशास। एकदेशदर्शिनः स्वार्थसाधनमेव परमं फलम्। प्रायेण संस्कृतभाषापदानि भारतीयानां सर्वासु भाषासु समन्वितानि। तथापि संस्कृतविद्यार्थिनां विदुषाञ्च लोकज्ञानं जन्मान्तरकल्पं बभूव। व्यासः कौटिल्यश्च लोकज्ञानरहितं निन्दतः। शास्त्रज्ञोऽप्यलोकज्ञो मूर्खतुल्य इति।

अद्यत्वे संस्कृतपण्डितानां प्रभूतं वेतनं देयम्, विद्यार्थिवेतनं, भोजन-सौकर्यं चेत्यादय एकदेशाभिप्रायाः पुनः न समष्टिफलं वितरेयुः। मतिकर्दम-मपहाय इदानीमपि संस्कृतपण्डिताः संस्कृतानुरागिणश्च संस्कृतभाषायाः पुरोभि-वृध्द्यै तस्याः सांसिद्धिक गौरवस्य च पुनरुज्जीवनं यदि कांक्षेयुः तदा संस्कृत-पण्डिताः परः शतवर्षेभ्यः अभ्यस्तं एकदेशाध्ययनमपहाय समष्टिदृष्टिं संमान-येयुः। "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।" इति किल व्यासस्या-घोषः, तमेव पुनरुद्घुष्येरन्। आर्थिक-पारिश्रमिकादि विषयेषु तलस्पर्शिज्ञानं सम्पाद्य अभिज्ञाः संस्कृतभाषायां वितरेयुः विद्यार्थिभ्यः। तथा राजनीतिषु धर्मादि विषयेषु च चिरन्तनानां भावनाः आकलय्य काल-देश-दशानुरोधेन व्याख्येयुः। येन विश्वेषां अधुनातन नीति धुनी निमग्नानां अपि आलम्बनं आधुनिक परिहारश्च समस्यानां प्रतिभासेत्। निर्जीवपुस्तकेषु तात्त्विकं ज्ञानं निलीयते। यदिदानीमपि न प्रबुध्येरन् तदा निश्शेषं लीयेतापि। मनुः मानवेभ्यः विशेषेण संस्कृतपण्डितेभ्यः, "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व मानवाः॥" इति ज्ञापकं वचनं उदाजहार।

इदानीं वैज्ञानिके युगे अन्तरराष्ट्रीय घर्षणावसरे पर्वकाले पातञ्जलदर्शनस्य अष्टाङ्गेषु अन्यतमानां यमानां "अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य, अपरिग्रह रूपाणां,' प्रतिकृति रूपाः पञ्चशीलानि इति भगवता बुद्धेन निरूपितान्यासन्। तस्य छायां अन्तरराष्ट्रीय राजकीय प्रवक्तारः भूगोले अर्धसंख्याधिक मानव समाजं प्रतिनिधीकुर्वन्तो जगतः शाश्वतशान्त्यै एकमेवोपायं दधिरे, प्रचार-यन्तश्च वर्तन्ते।

मनुः इममेवार्थं चिरन्तने काले दिदेश ।

" यमान् सेवेत सततं न नित्यं नियमान् द्विजः ।
यमान् पतत्यकुर्वाणः नियमान् केवलान् भजन् " ॥

इति स्थूणानिखनन न्यायेन यमानभ्यर्हितान् व्याख्यास्यत् नियमाः पुनः शौच–सन्तोष–तपः–स्वाध्याय ईश्वर प्रणिधानरूपाः विलसन्ति । एतेषां अनुपालनेन अध्यात्मविकासः संजायते । व्यक्तेः श्रेयः लोकश्रेयसं प्रथम माकांक्षति । लोकश्रेयः एव गरीयान् । अतः संस्कृताभ्यासस्य पुनरुद्धारः तस्य वाङ्मयस्य स्फूर्तिमनुपास्य कदाचिदपि नैव स्थिरीभवति परिवर्धते च । तस्मात् समष्टिदृष्टिमालम्ब्य संस्कृतवाङ्मयस्य सार्वभौमत्वं प्रतिष्ठापनीयम् । एकदेशा–ध्ययनेन संस्कृतविद्यार्थिनः क्रमेण मूढग्राहिणः भवन्ति इति दूरदर्शिनः रक्षकाः स्वापत्यानि नैव प्रेषयन्ति ।

संस्कृताध्ययनं अध्येतारं यावज्जीवनं याचकं विदधते इति केषाञ्चन निश्चयोऽपि वर्तते । इतिहास पर्यालोचनायां अयं विषयः नातीव विप्रकृष्टः सत्यात् । यदि मनुः विश्वेषां एतद्देशप्रसूतः आदर्शभूतः तेन, तस्मात् स्वं स्वं चरित्रं पृथिव्यां सर्वमानवाः शिक्षेरन् इति । त आशिषः इदानीमपि आयुष्मत्य एव । समष्टिदृष्टि मङ्गीकृतवतां एतद्देशीय नेतॄणां महात्मनामुपदेशं विश्वमेव निरीक्षते । ते आंग्लभाषापण्डिताः अपि भारतीय संस्कृतिं आवेदयन्ति । एकदेशदर्शिनः संस्कृतपण्डिताः सर्वेषु क्षेत्रेषु अवधीरिताः । तस्मात् परश्शत–वर्षेभ्यः कारणबहुत्वात् अभिवृद्धं वैक्लव्यं अपहाय " उत्तिष्ठन्तु, जाग्रन्तु प्राप्यवरान्निबोधन्तु । "

शंकरभगवत्पादाः

(बि. यस्. वेंकटकृष्ण शर्मा)

केचन महान्तः आजन्मसिद्धाभिरतिमानुषशक्तिभिः इहलोके प्रसिद्धा अभवन्। तेषां जीवनक्रमः उपदेशवैखरी च सर्वदा जिज्ञासूनां प्रचोदकः सामान्यानां प्रबोधकश्च भविष्यति । एतादृशः महापुरुषान् अवतारपुरुषा इत्यायत्यां संमानयन्ते जनाः । ईदृग्विधेषु श्री शंकरभगवत्पादाः पदं लभन्ते । अन्येषामिव आचार्याणां जीवनचरित्रं अनाशंकितप्रामाण्यं अस्य नैवोपलभ्यते । परन्तु माधवाचार्यः, आनन्दगिरिः, चिद्विलासः, सदानन्दश्च शंकरदिग्विजय–प्रबन्धान् लिलिखुः । एतेष्वपि ऐकमत्यं नास्ति कतिपयविषयेषु । कतिपय–विषयेषु एकवाक्यता दृश्यतेऽपि ।

केरलदेशे कालटीनामाग्रहारो वर्तते । तेषु नम्बूद्रिब्राह्मणकुटुम्बेषु विद्याधिराजो नाम पण्डितः आसीत्, तस्य पुत्र शिवगुरुः । शिवगुरुदम्पती अनपत्यतया दूयमानौ शिवं भेजाते। शिवानुग्रहेण श्रीशंकराचार्यं सुतं लेभाते। अनेकाः किंवदन्तीः अस्य जन्मविषये रूढमूला जनजनिताः आचार्यस्य प्रभाव–मुपचाययन्ति । आधुनिकानां बहवो इमे विषयाः न रोचन्ते। केचन चिदंबरमस्य जन्मस्थलं इच्छन्ति । तथैव कालनिर्णयेपि केचन क्रि. श. षष्ठशतमानं अन्ये अष्टमं च विश्वसन्ति । बहुमतं पुनः A. D. 788 बर्षमालम्बते । आंग्ल–विमर्शकाश्च इमं विषयं अनुमोदन्ते ।

आचार्यः बाल्ये कृतसंस्कारः अक्षरानध्येतुं प्रारेभे तथा वेदाध्ययनं च । अनतिदूरे विद्यमानस्य गुरोः गृहे शास्त्राण्यपि पपाठ । तीक्ष्णमतिः, मेधावी,

महापुरुषलक्षणोपेतश्च सर्वजनमनोहरः आसीत्। बाल्य एव पिता परलोक-मगात्। माता पुनः कृतविद्याभ्यासं पुत्रं गृहस्थमियेष। तथापि तुरीयाश्रमं स्वीकर्तुं अन्तरङ्गे कृतनिश्चयः आचार्यः आसीत्। मातापि स्वं तुरीयाश्रमं स्वीकृत्य "मां निर्गतिकां मा विधेहि" इति पुत्रं बहुधा अनुनयत्। एकदा नद्यां स्नानार्थं मातापुत्रौ ययतुः। जले निमग्नः आचार्यः अहं नक्रेण आकृष्य-माणोस्मि, इदानीमेव म्रिये मह्यं सन्यासं स्वीकर्तुमाज्ञां देहि, येन मम शान्त्या मरणं भवेत्" इति मातरं चुक्रोश। गत्यन्तराभावात् माता आज्ञां ददौ। अयमापत्सन्यासः आचार्येण तदा स्वीकृतः। ततः योग्यं गुरुं गवेषमाणो नर्मदा-तीरमाजगाम। यत्र गौडपादशिष्याः गोविन्दभगवत्पादा आसन्, तत्र यथा शास्त्रं सन्यासदीक्षां जग्राह। तदनन्तरं उत्तरां दिशं प्रति प्रस्थितः वाराणसी मगात्। अस्य तेजोविशेषेण बहवः शिष्याः अभ्युपेयुः। तेषु द्राविडदेशीय पद्मपादः प्रसिद्धः आचार्यं अनन्यया भक्त्या सिषेवे। अनन्तरं शिष्यैः सह अध्यापन प्रवचनादिभिः अद्वैतसिद्धान्तं प्रचारयन् सुप्रसिद्धं विष्णुसहस्रनाम भाष्यं रचयामास।

ततः प्रयागक्षेत्रं प्रतस्थे। तस्मिन्नेव समये कुमारिलभट्टाचार्यः तुषानलं प्रविविक्षुरासीत् आचार्यः तद्देशं गत्वा किमेतदिति कुमारिलं पर्यपृच्छत्। कुमारिलः उवाचः — "अहं मम बौद्धगुरुं अमारयम्। कर्मकाण्डस्य प्रामाण्यं प्रतिष्ठापयन् ईश्वरं निराकरवम्। एतत्पापजिहीर्षया अहं तुषानलं प्राविशम्।" इति अर्धदग्धः प्रत्युवाच। स्वीयं श्यालं मण्डनमिश्रं पश्येति तेनैवादिष्टः तं प्रतिययौ। मध्येमार्गं वादे कापालिकान् अजयत्। मण्डनमिश्रः धनीमानी पण्डितश्च विचक्षणसमूहे बभौ। परश्शताः विद्यार्थिनः अस्य गेहे वेदाम् शास्त्राणि च अधीयन्त। तस्य गेहस्थाश्शुकाः अपि "स्वतः प्रमाणं, परतः प्रमाण"मिति रटन्तः श्रवणमधुरां वाणीं आगन्तुकेभ्यः अश्रावयन्। तस्य भार्या नाम्ना भारती विद्याधिदेवता सरस्वतीव आस। सकल शास्त्रविचक्षणा इयं शङ्करमण्डनयोः वादे माध्यस्थ्यमावहत्। अन्ततः मण्डनमिश्रः पराजितः आचार्येण। उभयोरङ्गीकृत समयानुरोधेन पराजितः। आचार्यसकाशात् सन्यासं

समग्रहीत् । भारती अपि वाक्यार्थं आतनोदिति उपवर्णितम् । अनन्तरं मण्डन-मिश्रः सुरेश्वराचार्य इति प्रसिद्धो बभूव । एवं तुरीयाश्रमं स्वीकृत्य मण्डनमिश्रः आचार्यमन्वगच्छत् । साध्वी भारती अपि आचार्यं अनुययौ । आचार्यः शृङ्गेरी-क्षेत्रमागत्य भारतीनाम्ना शारदाप्रतिष्ठां विदधुरिति प्रथा वर्तते ।

एतस्मिन्नन्तरे कालटीग्रामे माता रुग्णा क्लिश्नातीति वार्तामधिगम्य आचार्यः कालटीं प्रतस्थे । अवसानकाले मातरमभजत् । सापि पुत्रस्यमहिमान मुपश्रुत्य ननन्द । मातुः चरमकाले आचार्यः विष्णुं तुष्टाव । "श्रिया श्लिष्टो विष्णुः" मातापि आचार्येण स्तोत्रमुपश्रृण्वन्ती शान्त्या विष्णुलोकं जगाम । मातुः उत्तरक्रियानिर्वर्तने बान्धवाः असहकारमाचरन्निति केचन वदन्ति । शृङ्गेरीं गत्वा पुनः उत्तरभारतयात्रायै मतिं चकार । द्वारकायां मठं प्रतिष्ठापयामास । तथैव बदरीकाश्रमे आलयनिर्माणं च अकारयत् । कामरूपदेशं जिगमिषुः प्रस्थितः मज्जन् महानदीषु सज्जनानुपदिशन् वादिनः निराकुर्वन् कामरूपदेशं जगाम । तत्र प्रथितयशसं अभिनवगुप्तं शाक्तपण्डितं विजिग्ये । अन्ततः केदार–नाथक्षेत्र मागत्य A. D. 828 तमे वर्षे नश्वरं भौतिकदेहं तत्याज । तदानीं द्वात्रिंशद्वर्षीयः आचार्य इति केचन, अन्ये पुनः षट्त्रिंशत् वर्ष देशीय इति च अभिप्रयन्ति ।

शङ्कराचार्यः भारतदेशस्य चतुर्ष्वपि कोणेषु द्वारका–पूरी–काञ्ची–शृङ्गेरी इत्येतेषु सिद्धान्तप्रचारणाय मठान् प्रतिष्ठापयामास । प्रत्येकं मठस्य कार्य-निर्वर्तनाय एकैकं संन्यासिनं अध्यक्षपदे न्ययुङ्क्त । एते संन्यासिनः तत्तदधिकार-सूचकपदैः दशभिः अभिलप्यन्ते । सरस्वती, भारती, पुरी, गिरिः, तीर्थ, आश्रम, वन, अरण्य, पर्वत तथा सागर इति परमहंसपदवी सर्वानप्यतिशेते । इदानीमपि शृङ्गेर्याः मठाधिपतयः स्वनाम भारतीपदेन अलंकुर्वन्ति । "चन्द्रशेखरभारती" इत्यादि । एवमेव अन्यानि पदशिरस्कानि नामानि बहुलं दृश्यन्ते लोके, यथा तपोवनं, शुद्धानन्दः, शान्तिसागर इत्यादयः । शैव–वैष्णव–शाक्त–सौर–गाणपत्य–पाशुपताख्येषु षट्सु मतेषु तस्मिन् काले

अवस्थितान् दोषान् दूरीकृत्य मताचरणं अनुसन्धानं च यथाशास्त्रं जनेषु बोधयामास। अत एव षण्मतस्थापनाचार्य इति गौरवमस्य महापुरुषस्य। अशेषं भारतदेशं पर्यटन् वाक्यार्थैः उपदेशेन स्वप्रभावेण च अनेकान् शिष्यान् अद्वैतसिद्धान्तसंप्रदायानुयायिनः प्रचारकांश्च विदधे। अनेके ग्रन्थाः आचार्यै रारचिताः इदानीमपि गौरवमावहन्ति संस्कृतवाङ्मयस्य।

ब्रह्मसूत्र भाष्यम्, त्रयोदशोपनिषद्भाष्याणि, भगवद्गीता भाष्यम्, विष्णुसहस्रनामादयः भाष्यग्रन्थाः, तथैव अनेकानि स्तोत्राणि, सौन्दर्य–लहरी प्रभृतयः तान्त्रिक साधनाभ्यासादि सूक्ष्मविषयावलंबिनः लघुप्रबन्धाः संभूय एकोनविंशत्युत्तरशतग्रन्थाः इति केचत संजगदिरे। परन्तु अन्ये आदि–शङ्कराचार्यैक कर्तुकत्वे अशेषाणां प्रबन्धानां संशेरते। कुतः ? मठाधिपतयः संप्रदायेन शङ्कराचार्या इति बहूक्रियन्ते। "शङ्कराचार्यस्य कृतिषु इति संबन्ध वाक्यं" विनिगमनाविरहमनुभवति। तथापि बहवो ग्रन्थाः आचार्येणारचिता इति निश्चप्रचम्।

प्रस्थानत्रयभाष्यकृता आचार्येण ब्रह्म एकमेव तत्वमिति निरणायि। यद्यपि ब्रह्म एकमेव पदार्थः परमार्थ सत्, तच्च निर्गुणं निष्क्रियं च चिन्मात्र–त्वात्। गुणोपबृंहणं ब्रह्मणः युक्तिभिः प्रमाणैश्च न घटते, अनुभवैकसमधि–गम्यत्वात्। अनुभवस्यानुभूतिरूपत्वाच्च। नित्य प्राप्तं ब्रह्म स्वरूपज्ञानमात्रं, स्वात्मनि क्रियाविरोधात् अभिन्नं ब्रह्म न कदापि वित्ति कर्मतां अश्नुते। वेदाः अखिलानि शास्त्राणि च प्रमाणज्ञानरूपाणि ततः सीमितानि। तेषां विधि–वाक्यान्यपि न कदापि ब्रह्म बोधयितुं प्रभवन्ति। किन्तु साध्यावस्थायां ज्ञापयितुं उपयुज्यन्ते।

जडाजडरूपेण बोभूयामानं विश्वं, भेदरूपेण पोप्लूयमानं अज्ञानं, भ्रान्त्या कर्मवासनया अहं ममेत्यभिमानेन च पेपीयमानं सुखदुःखात्मकं कर्मफलं च चिन्मात्रे ब्रह्मणि कल्पितानि। कल्पितं, आरोपितं, अध्यस्तं, विवर्तं, अतद्वति

तत्प्रकारकानुभवः मिथ्या इत्यादीनि पदानि प्रकरणानुरोधेन पर्यायतामापन्नानि एकमेवार्थ मावेदयन्ति । सर्वेषु व्यवहारेषु सच्चिदानन्द एव विषयो भवति । अविद्या नाम काचन अनादिः ब्रह्मस्वरूपाधिगति बाध्या भावरूपा कश्चन पदार्थः । यां अनुमानेन आगमेन अनुभवेन च साधयन्ति पण्डिताः । सद्रूपेण वा असद्रूपेण वा निर्वक्तुमशक्या इयमविद्या । सत्त्वेन्न बाध्येत असत्त्वेन्न प्रतीयेत इति आपत्तेः दुर्वारत्वात् प्रतीयते बाध्यते च । तस्मात् सदसद्भ्यां अनिर्वाच्या अविद्येति अनिर्वचनीयख्यातिं अङ्गीचक्रुः । सच्चिदानन्दांश—त्रयेषु सदंशः, चिदंशः, आनन्दांशश्च तत्वसाक्षात्कारवद्भिः परिपूर्णतया अनुभूयते । मध्यमावस्थायां सदंशचिदंशौ, सामान्यानां पुनः सदंशमात्रमिति विवेकः । ज्ञानस्यापूर्णतया अहं मम इति चिन्मात्रस्यापि ब्रह्मणः तत्तदन्तः करणावच्छेद भेद–महिम्ना भेदरूपं विश्वमनुभूयते । अत एव ब्रह्म बुद्धिग्राह्यं अतीन्द्रियं इत्य–वोचाम, न तु बुद्धि बोध्यम् " यो बुद्धेः परतस्तु सः " इति स्मृतेश्च । अतः परिपूर्णं ब्रह्म मनन–निधिध्यासनादिभिः अधिगन्तुमशक्यं, स्वरूपज्ञानमात्र–गोचरं इत्यभाणि अभिज्ञैः । तत्वमसीत्यादि श्रुतिवाक्यानि च अत्र प्रमाणम् ।

आरुरुक्षूणां सगुणोपासनं, कर्मयोगश्च विधीयते । आरूढानां तु सगुणोपासनस्य आवश्यकता नास्ति । निर्गुणं ब्रह्म पुनः परिपूर्णं सत् उपास्योपासक भेदं न सहते । अत एव वस्तुतन्त्रमिति अभिज्ञैः उदपादि । "यन्नियोगशतेनापि कारयितुं प्रतिषेधशतेनापि वारयितुमशक्यं तद्वस्तु तन्त्रम् । "

प्राकृतैरिन्द्रियैः मनसा बुध्या च लोकव्यवहारं सर्वे अनुभवन्ति । आत्मैक्यज्ञानमपि इन्द्रियद्वारा वाचा सामान्यजनाः व्युत्पादयन्ति । अत्र अविद्यया कल्पिते विश्वे सत्तात्रैविद्याभ्युपगमात् व्यवहाराणां उपपत्तिः उप–पन्नतरा भवति । पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता चेति सत्तात्रैविध्यं अभ्युपगतम्; कालत्रयाबाध्यं तत्पारमार्थिकसत् । ग्राह्यग्राहक–भावापन्नाः सर्वा भावनाः पदार्थाश्च व्यावहारिक सत्तावन्तः व्यवहारकाले अबाध्यमानत्वात् । रज्जौ–सर्पः, शुक्तौ रजतं, मृगमरीचिकायां जलमित्यादयः

प्रातिभासिक सत्तावन्तः । एवं इन्द्रियदोषैः संस्कारदोषैश्चानुभूयमानः प्रातिभासिकः मनोबुध्यहंकारविशिष्टैः अनुभवारूढः व्यावहारिकः यत्र आत्मनैवात्मानमनुपश्यति इत्याम्रेडितमनेकधा ; तत् पारमार्थिक सत्ताभूमिः, जीवब्रह्मैक्य साक्षात्कारः धरमाणानामपि संपद्यते । ते समाध्यवस्थायां स्वरूपज्ञानं अनुपश्येयुः । व्युत्थाने पुनः समाध्यवस्थानुभूतानन्दानुभवघूर्णमानमानसाः "सर्व भूतस्थ मात्मानं सर्वभूतानि चात्मनि पश्यन्ति" । अनेन प्रकारेण ये साधकाः परिपूर्णं अभिन्नं ब्रह्मतत्वं अनुसन्दधते, विश्वमशेषं तस्मिन् चिन्मात्रे ब्रह्मणि अध्यस्तमित्याकलयन्ति, सगुणोपासनारहस्यं च विजानन्ति । आनन्दादि गुणोपलक्षितं निर्गुणोपासन प्रकारं च सुविशदं विदां कुर्वन्ति, सत्तात्रैविध्य चमत्कारं च विवेचयन्ति ते भेद–अभेद–भेदाभेद व्यवहारेषु नेङ्गन्ते, ते पुनः एतादृश विभिन्न भावनासु अविरोधं ऐक्यं चानुपश्यन्ति । अत एवाचार्यः स्वीयश्लोकेषु भक्तिं बहुधा वर्णयाञ्चक्रे । सत्तात्रैविध्याभ्युपगमेन भेद वादाश्च यथाधिकारमङ्गीकृताः । मन्दाधिकारिभ्यः कर्मयोगो व्युत्पादितः । उत्तमाधिकारिणां ज्ञानयोगः श्रेयान् । सर्वैरपि कर्म–ज्ञान–उपासनादिभिः पर्वभेदैः साधनाभ्यासैः सोपानारोहणक्रमेण क्रमशः अध्यात्मविकासमधिगच्छन्ति अन्ततः अद्वैते ब्रह्मणि पर्यवस्यन्तीति सर्वं समञ्जसम् ।

एतेषां ज्ञानिनां परमार्थ दृष्टया पुनः परिदृश्यमानं अनुभूयमानं द्वैतभावनाया अधिगम्यमानमभ्यूह्यमानं च सर्वमिदं विश्वं बाह्यमान्तरं च कल्पित त्वादसत्यं मिथ्या च । बन्धमोक्षादि व्यवस्था च काल्पनिक वागुरानिपतितं न कदापि विशेषमावहति अतः तत्वतः बन्धोपि नास्ति, मोक्षोपि नास्ति । मुमुक्षुरपि नापि, मुक्तोपि, अथवा यो वा को वा आयत्यां मुच्येत । तदुक्तं गौडपादाचार्यैः परमगुरुभिराचार्यस्य ।

न निरोधो न चोत्पत्ति र्न बद्धो न च साधकः ।
न मुमुक्षु र्न वै मुक्तः इत्येषा परमार्थता ॥

अप्पय्य दीक्षितेन्द्रः

(ए. वि. सोमनाथन्)

महामुनेरगस्त्यस्यपदपङ्कजविन्यासधन्यस्य द्रविडजनपदस्य महिमा पुराणकालेभ्योऽपि पुरातनः विद्योतते। द्रविडभाषा भारतीयानां भाषासु नैकैव संस्कृतपदानि विशेषतः स्वशरीरे आत्मसाच्चकार। वैष्णवाः "आल्वार" इति प्रथिताः शैवसाधवश्च अनेके द्रविडभाषां स्वीयरचनाभिः परिपुष्टां रमणीयां गानानुयायिनीं च गीतप्रबन्धैः वितेनुः। संप्रदायागतजातिकुलवृत्तीः अनुसरन्तो जनाः अनेक संप्रदायान् अनुसरन्तोऽपि परस्परं भावयन्त एव चिरकालमासन्। तेषां मतभेदः मतिभेदश्च अतीन्द्रियविषयेषु सीमितः यथा कैलासो वा वैकुण्ठो वा मोक्षपदं, गरुडो वा वृषभो वा विष्णुशिवयोः वाहने इति ईदृशेषु शैव–वैष्णवयोः भावनाविशेषाः समुल्लसन्तिस्म। एवं द्रविडदेशीयानां मनोहराणि दिनानि व्यतीयुः।

इदानींतन उत्तर आर्काट् मण्डले अडैपलं नाम श्रोत्रियग्रामः वर्तते। तस्मिन् अनेके श्रोत्रियाः धर्माचारपरायणाः सकलशास्त्र मुष्टिन्धयाः आसन्। तेषु दीक्षितोपपदवाच्यानां कुटुम्बानि पाण्डित्यस्य भक्तेः ज्ञानस्य च आधारभूता इव आसन्। आचार्य दीक्षितो नाम कश्चनश्रोत्रियप्रवरः आसीत्। तस्य द्वितीया भार्या वैष्णवी। सा प्रथमं रंगराजदीक्षितं अजीजनत्। रंगराजदीक्षितः सर्वतोमुखं पाण्डित्यमवाप। सर्वस्वदक्षिणं विश्वजिद्यागमेजे। सः स्वातन्त्र्यप्रियः न कमपि राजानं शिश्रिये। तस्य ज्येष्टपुत्रः सुगृहीत नामधेयः अप्पय्यदीक्षितः माकिम् क्रि. श. १५२० तमे वर्षे जनिमवाप। बालसुब्रह्मण्य इति अस्य नामकरणम्। परन्तु सर्वैरपि 'अप्पय्य' इति आहूतस्सन् बाल्ये, अप्पय्य दीक्षित इति प्रसिद्धिर्बभूव।

पितुः सकाशादेव सर्वशास्त्रार्थाण्यधीत्य प्रखरपण्डितो बभूव। साम-शाखाध्यायी भारद्वाजगोत्रोत्पन्नः द्राह्यायणसूत्रानुयायी अनितरसाधारणेन यशसा द्रविडजनपदमध्युवास। तत्वेन अद्वैतसिद्धान्तं यथासंप्रदायं अनुससार। तर्के-व्याकरणे-मीमांसायां-वेदवाङ्मये च कोविदः प्रतिवादि-भयंकरः सहृदयः रसिकः पण्डितमण्डलमण्डनायमानः शास्त्रपाण्डित्येन ज्ञानविकासेन च देदीप्यमानः आसीत्।

राजराज कुलोत्तुङ्गस्य काले शैवमतस्य प्राधान्यमवर्तत। तेषां प्राबल्येन श्रीरामानुजाचार्याः द्रविडदेशं परित्यज्य कर्णाटदेशं शरणमगच्छन्। प्रायः पञ्चाशत्वत्सरपर्यन्तं कर्णाटकदेशे स्थित्वा कुलोत्तुङ्ग मरणानन्तरं द्राविड जनपदं जगामेति ऐतिहासिकाः अभिप्रयन्ति। ततः परं विजयनगरसाम्राज्यस्य प्राबल्यमासीत्। राजानः वैष्णवाः आसन्। तेन वैष्णवमतस्य आश्रयः स्वाभाविकः मतप्रचारणेपि सहायकोऽभवत्। ताताचार्यो नाम विजयनगरे राजगुरुरवर्तत। सः पञ्चमतभञ्जनं नाम प्रबन्धं प्रणिनाय।

अन्ये च वैष्णवपण्डिताः बहुमुखेन मतप्रचाराय प्रायतन्त। शैवमत न्विखण्डयिषया प्रवृत्तानि भीषणानि भाषणानि मण्डयांबभूवुः। तथा प्रबन्धांश्च अरीरचन्। विजयनगरसाम्राज्य पतनानन्तरं तत्तत्प्रान्तीयमण्डलेश्वराः राजानो बभूवुः। तेष्वन्यतमः वेलूरुमण्डलेश्वरः चिन्नबोम्मः आस्तिकः आसीत्। अप्पय्य दीक्षितः अस्य मण्डलेश्वरस्य आश्रयेण शैवमतं मण्डयन् वैष्णवमतं निराकर्तुं च आरेभे। अनेके प्रबन्धाः शैवमतमधिकृत्यानेन विरचिताः। परश्शताः शिष्याः शैवागमसंप्रदायानुरोधेन अध्यापिताः शैवमतप्रचाराय आयोजिताश्च बभूवुः। तस्य पाण्डित्यं सर्वतोमुखं येन संकल्पमात्रेणैवविभिन्न-विषयान् अधिकृत्य प्रबन्ध रचनं तस्य लीलायितमिव आसीत्। गच्छताकालेन सः विष्णुभक्तोपि आसीदिति तस्य प्रबन्धैर्विज्ञायते। विशिष्टाद्वैतखण्डनमन्तरा शैवमतं लब्धपदं न भवेदिति तस्मिन् प्रायतत। केवलं क्षुद्रोपद्रवनिवारणार्थं मया वैष्णवमतनिराकरणाय प्रयतितं न त्वहं विष्णुद्वेषीति कण्ठरवेण उदघोषयत्।

'विष्णुर्वाशंकरो वा श्रुतिशिखरगिरामस्तु तात्पर्यभूमिः
नास्माकं तत्रवादः प्रसरति किमपि स्पष्टमद्वैत भाजाम् ।
किंत्वीशद्वेषगाढानलकलितहृदां दुर्मतीनां दुरुक्तीः
भङ्क्तुं यत्नोममायं नहि भवतु ततो विष्णुविद्वेषशङ्का ॥ "

तेन विरचितानां प्रबन्धानां संख्या चत्वार्युत्तरैकशतमिति विज्ञायते । तेषु वादग्रन्थाः परमतमनूद्यचिखण्डयिषया प्रवृत्ताः । शिवार्कमणिदीपिका परिमलः न्यायरक्षामणि प्रभृतयः, तथा बहवः व्याख्यान ग्रन्थाः यादवाभ्युदय व्याख्या-दयः । चित्रमीमांसादयः अलंकारग्रन्थाः, सिद्धान्तलेशसंग्रहादिप्रबन्धाः, तथैव मीमांसाशास्त्रमधिकृत्य रचिताः ग्रन्थाः, अन्यानि स्तोत्राणि, च आहत्य षण्णवति ग्रन्थाः उपलभ्यन्तेति श्रूयते । अपरे प्रबन्धाः तालपत्रेषु निद्रान्ति ।

वैष्णवमतं निराचिकीर्षितं तेन । तथापि स्वभावतोगुणपक्षपातिनस्तस्य निदर्शनमिव वेंकटनाथस्य विषये अतीव गौरवमाकलयत् , सः यादवाभ्युदय-काव्यस्य व्याख्यामरीरचत् । अन्ये च अस्य समकालिकाः पण्डितराज जगन्नाथादयः उत्तरभारते, वेंकटाध्वरिः विजयेन्द्रभिक्षुः वादिराजः, गोविन्द-दीक्षितादयः दक्षिणभारते प्रथिता आसन् । स्वप्रभावेन नैकदा राजभिः कनकाभिषेकादि सम्मानैः सभाजितो व्यराजत । सुप्रसिद्धकविर्नीलकण्ठदीक्षितः अप्पय्यदीक्षितस्य भ्रातुः पौत्रः । अप्पय्यदीक्षितेन्द्रः स्वभावेन समदर्शी परिस्थितिमनुरुध्य वादविवादेषु प्रववृते । न केवलं अद्वैतसिद्धान्ते पण्डितः किन्तु अनुभवे च ।

चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं
सुताश्चविनयोज्वलाः सुकृतयश्चकाश्चित्कृताः ।
वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा
न किंचिदपि चिन्तये शिवपदं दिदृक्षे परम् ॥

चरमे वयसि चिदम्बर क्षेत्रे चिदम्बरेश्वरं–नटराजं सेवयन् कालं अनायत् । त्रयस्सप्ततितमे वर्षे नश्वरं भौतिकदेहं त्यक्त्वा शाश्वतं ब्रह्म भेजे ।

एवं अप्पय्यदीक्षितेन्द्रः जन्मना ओजस्वी, पाण्डित्येन यशस्वी, कर्तव्यनिष्ठया मनस्वी, वादविवादेषु तरस्वी च शिष्येभ्यो वत्सलः गुरुभ्यो महद्भयो विधेयः अद्वैतानुभवेन समदर्शी च भूत्वा धर्मकर्मणोः मूर्तीभूतः स्वजीवनमितरेषां दृष्टान्ती चकार । प्रथित यशसां भट्टोजीदीक्षितप्रभृतीनां गुरुः स्वग्रामे ज्वरकण्ठेश्वर देवालयस्य जीर्णोद्धारमकरोत् । पाण्डित्यं, कवित्वं, आचार्यत्वं, ज्ञानं, अनुभवश्च अमुमालम्ब्य खेलन्तिस्म । गीर्वाणसरस्वत्याः आराधने शाश्वतोऽयं प्रतीकः गीर्वाणवाणीसेवकान् प्रेरयतु ।

वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न क्वापि क्वचिदपि भवन्तं प्रणतवान् ॥
नमन्मुक्तस्सं प्रत्यतनुरग्रे प्यनतिमान्
इतीदं क्षन्तव्यं तदिदमपराध द्वयमपि ॥

शैवमतम्

(डि. बि. शान्तकुमारस्वामिनः)

मानवः केवलमाहारेण वस्त्रेण च न परितुष्यति । तस्य मानसिकतृप्तिः निश्चितरूपं भावनावलयमपेक्षते । बाह्यपदार्थानां संग्रहणेन कतिपयविषयाः मनोविनोदाय प्रभवेरन् । ऐश्वर्यं, वैदुष्यं, अधिकारः, समाजे गौरवं, अभिज्ञसम्माननं च परिपूर्णतया मनश्शान्तिं नावहेयुः । अत एव श्रद्धैकसमधिगम्यं मतं जीवनस्य नितरां शान्तिं तृप्तिं चापादयति । मतिभेदाच्च मतभेदा जायन्ते । मतं तत्वसाक्षात्कारं अधिगतिं वा नापेक्षते । किन्तु श्रद्धां विश्वासं-चाकांक्षते । श्रद्धामात्रप्राणं हि मतम् । यदनादिकालादनेकरूपेण मानवसमाज-मन्वपद्यत । गीतायामपि —

" अन्येत्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ "

इति साक्षात्काररहितं श्रद्धामात्रानुसरणैकरूपं मतस्वरूपं वर्णयाञ्चक्रे श्रीकृष्णः । अतीन्द्रियविषयेषु परिपाकरहितानां साक्षात्कारः न कदापि शक्यशङ्कः । तस्मात् सुदूरमपि गत्वा श्रद्धामेव शरणं वरणीयम् । एतेन मतानुसरणं सामान्यानां परीक्षकाणां च अविशिष्टमिति दूरदर्शिभिरभ्यधायि ।

अस्मिन् विश्वे सर्वे मानवव्यापाराः गुणान् दोषांश्च बिभ्रति । मतान्यपि बहुविधानि अनुसरन्तो जनाः कदाचित् परस्परं द्विषन्ति । स्वभावोऽयं मानवकुलस्य । पाश्चिमात्य देशचरितं मतकलहैः कलुषितं अभिवर्णयन्ति ।

न केवलं भिन्नमतानुयायिनामेव कलहाः प्रवर्तन्ते, अपितु, एकमतीयेष्वपि दुराराध्येषु प्रबलतरं वैरमभिवर्धते। अस्मिन् देशेऽपि विदेशीयानां आक्रमणावसरे निरपराधिनां प्रजानां सामूहिको विनाशः समजनि इति इतिहासेषु वर्णितः। परस्सहस्राणां निरपराधिनां मारणहेतुभूतं मतं को वा अभिनन्देत्। कामक्रोधैरुद्वेजितस्य कर्तव्याकर्तव्यविवेचना शून्यस्य कर्माणि मतस्य शिरसि आरोपणमसांप्रतं कस्यापि। राजकीयदृष्टिं पुरस्कृत्य प्रवृत्तानां श्रद्धाविजृम्भितं मानवसमाजस्य अभिद्रोहः। यथा देशविभजनसमये विना कारणं परस्सहस्रा मानवा घातिताः। लोभः, क्रोधश्चात्र कारणे भवतः, न तु मतं कदापि। समस्यायाः इदं समीक्षणं राजकीय विप्लवं पुरस्कृत्य विमर्शनीयम्।

प्रावादुकाः मतानां वादविवादेषु प्राबल्यदौर्बल्याश्रयणेन विवदमाना आसन्निति श्रृणुमः। क्वचित् वाङ्मात्रपर्यवसायी अयं कलहः सीमितोऽ वर्तत। कदाचित् मुष्टामुष्टिपर्यन्तमनुधावति स्म। कलहस्य कारणं रागः, द्वेषश्च सुप्रसिद्धौ भवतः। भारतदेशस्य स्वातन्त्र्य हानिः आन्तरीय कलहैरेवाजनि। प्रजासु राष्ट्रीयभावनाया अभावः विदेशीयाक्रमणे निदानं बभूव। अस्य विषमानुभवस्य मतानां प्राबल्यं दौर्बल्यं च न हेतुतां भजेते। राष्ट्रीयभावना अन्या वर्तते। देशभक्तिः विलक्षणा भाति। श्रद्धा तु एतदुभयापेक्षया विशिष्टा व्यक्तीनामान्तर्य भावनासु पोप्लूयमाना भ्राजते। वर्तमानकाले मतमेव जातिमभिमन्यन्ते केचन। जातिं च मतमिति यथा सौकर्यं निरूपयन्ति अन्ये। अन्ततो जातिमेव पुरस्कृत्य व्यवहारेषु यथासमयं–स्वार्थसाधनमीहन्ते। एवं मतानां अनुसरणं प्रयोजनं प्रभावश्च विभिन्नैः रूपैः कदर्थीकृतः। अत्र सुधियः प्रमाणम् "त एव गौरवं लाघवं च विभावयन्तु। यस्य दोषः, येनापकर्षः प्रजानां स्थैर्यस्य संजातः, यस्माच्च शिथिलाभिमानाः संवृत्ताः।" इति।

मतानि बहूनि सन्ति। शैवमतं, शाक्तमतं, वैष्णवमतंचेति प्राधान्येन भारतदेशे श्रवणगोचराणि भवन्ति। तेषु शैवमतं अनादिरिति ऐतिहासिकाः अभिप्रयन्ति। न केवलं भारतदेशे, विदेशेषु च शैवमत सिद्धान्तसत्ताभि–

व्यञ्जकानि लक्षणानि शासनेषु, शिल्पेषु, कलासु, संस्कृत्यां च अधिगत्य विमर्शकाः उपन्यस्यन्ति । यद्यपि वर्तमानकाले विदेशेषु प्रत्यक्षेण शैवमत–संप्रदायानुसरणं जनेषु मृग्यमेव । भारतदेशे पुनः शैवमतं चतुर्धा विभक्तं सत् महाजनैराद्रियते । उत्तरभारते काश्मीर शैवसंप्रदायः, कामरूप–वङ्गयोः तान्त्रिकशैवमतं, द्रविडदेशे आगमिकः वैदिकश्च शैवसिद्धान्तः, कर्णाटकदेशे तु वीरशैवसंप्रदायश्च लक्षोपलक्षजनानभिव्याप्य विलसति । एतेषां चतुर्धा विभक्तानां प्रायशः कामिकादिवातुलान्ताः अष्टाविंशति संख्याकाः आगमाः प्रमाणतया स्वीकृता वर्तन्ते । दैनन्दिन पूजासु तथा विवाहादि संस्कारेषु च वेदमन्त्रान् विशेषेण केचन आददते, केचन अपरे देशभाषा ग्रथितान् श्रद्धया भावयन्ति । तत्तत्संप्रदायानुयायिनः स्वीयं स्वीयं संप्रदायमेव स्वतन्त्रं–अनादिं चातिष्ठन्ते । नात्र विवादस्यावकाशः । ऋषयश्च भिन्नाः ग्रन्थाश्चानेके । परन्तु शिवस्य परत्वं आगमानां प्रामाण्यं च सर्वेषामविशिष्टम् । एवं प्रवर्तमानाः शैवा इति प्रथिता लोके ।

शैवाः पुनः आदिशैवाः, शुद्धशैवाः, मिश्रशैवाः, वीरशैवा इत्यादि भेदेनाभिज्ञैः गण्यन्ते ।

"वी शब्देनोच्यते विद्या शिवजीवैक्य बोधिनी ।
तस्यां रमन्ते ये शैवाः वीरशैवास्तु ते मताः ॥"

वीरशैवसंप्रदायस्य मूलपुरुषाः पञ्च–आचार्याः — रेणुकाचार्य प्रभृतयः । बसवेश्वरादयः कालप्रवाहे व्याख्यातारः शैवमतं विवर्धयामासुः । बहवो भक्ताः अनेका योगिन्यश्च देशभाषासु तत्वबोधकाः कृतीः रचयामासुः । मरितोण्टदार्य प्रभृतयः पण्डिताः उद्ग्रन्थानरीरचन् ।

वीरशैवसंप्रदायः भेदाभेदवादं पुष्णाति । अतः जगत् सत्यम् । अस्मिन् विषये विवर्तवादस्य साक्षात् प्रतिपक्षभूतोऽयं सिद्धान्तः । अत्र जीवात्मानः

परस्परं भिन्नाः । अयं भेदः आमोक्षमनुवर्तते । मोक्षे पुनः स्वयं शिवाभिन्नश्शिव एव भविष्यति । मोक्षार्थिनां अधिकारभेदेन साधनाभ्यासभेदो भविष्यति । यद्यपि शिवाभिन्नमिदं जगत् जडचेतनात्मकं, तथापि सिसृक्षया शिवः स्वशक्ति-प्रसरेण जडा–जडरूपं विश्वमिदमभिव्यक्ती करोति । विश्वमिदं षट्त्रिंशत्तत्वा-त्मकम् । तत्वानि शुद्ध–अशुद्धमिश्र भेदेन त्रिधा भिन्नानि वर्तन्ते । परशिवस्तु तत्वातीतः निर्लिप्तः नित्यं भासते ।

शिव, शक्ति, सदाशिव, ईश्वर, शुद्धविद्या भेदेन शुद्ध विद्यातत्वानि पञ्च । मायातत्वमेकं अशुद्ध सृष्टेर्मूलं वर्तते । कला—विद्या, रागः, कालः, नियतिरिति पञ्च कञ्चुकाः । एतानि षडशुद्धतत्वानि । कञ्चुकावृतः जीवात्मा । जीवात्मा = पुरुषः । प्रकृति–महदहङ्कार–एकादशेन्द्रियाणि, पञ्चभूतानि, पञ्च तन्मात्राणि च आहत्य षट्त्रिंशत्तत्वानि सामान्येन सर्वैः शैवैः अङ्गीकृतानि ।

तथैव साधकस्य अध्यात्मविकासस्य सोपानानि आन्तरीय विकासेन अधिगम्यमानानि एकोत्तरशतस्थलानीति सांप्रदायिका गणयन्ति । अष्टावरण–पञ्चाचाराः अस्मिन् संप्रदाये अनितरसाधारण्येन निरूपिताः । स्थलं नाम —

“ स्थकारः स्थानवाची स्यात् लकारो लयवाचकः ।
तयोः कारणभूतं यत् तदेव स्थलमुच्यते ॥
अधिष्ठानं समस्तस्य स्थावरस्य चरस्य च ।
जगतो यद्भवेत्तत्वं तद्धि वै स्थलमुच्यते ॥

(अ. सु. २—५, ६)

स्थल शब्दवाच्यं ब्रह्म, इदमेव लिङ्गं इति अङ्गमिति च द्विधा भिद्यते । लिङ्गं नाम सच्चिदानन्दरूपी शिवः, अङ्गं नाम जीवात्मा । यथाकाशः घटाकाशः महाकाशश्चेति व्यवहारेण भिद्यते तथैकोऽपि शिवः जीवेश्वरभावेन पूज्य–पूजकात्मना च विराजते । शिवस्याविनाभावसंबन्धेन सहधर्मिणी शक्तिः अनन्त-

प्रसरा चकास्ति । जीवात्मनि सैव भक्तिरूपेणावतिष्ठते । प्रवृत्त्युन्मुखी शक्तिः सर्गव्यापारमातनोति । निवृत्तिक्रममाश्रयन्ती भक्तिः पुनः अङ्गं लिङ्गेन सङ्गमयति । भक्तेः पर्वभेदेन अङ्गस्थलानि षोढा विभक्तानि । भक्त–महेश–प्रसादी–प्राणलिङ्गि–शरण–ऐक्यस्थलंचेत्युपासकरूपाणि । एषां उपास्यलिङ्ग–रूपाणि —आचारलिङ्ग–गुरुलिङ्ग–शिवलिङ्ग–जङ्गमलिङ्ग–प्रसादलिङ्ग–महालिङ्ग-रूपेण बोभूयन्ते । प्रक्रिया गणनायां अङ्गस्थलानि चतुःचत्वारिंशत्, लिङ्ग–स्थलानि सप्तपंचाशच्च, आहत्य एकोत्तरशतस्थलानि भविष्यन्ति ।

अत्रेदमवधेयम्—भक्तिः ऐक्यस्थले समरसाकारा, शरणस्थले आनन्दा-कारा, प्राणलिङ्गस्थले अनुभवाकारा, प्रसादिस्थले अवधानात्मिका, महेशस्थले नैष्ठिकी, भक्तस्थले श्रद्धा–सद्भक्तिरिति च गीयते । षट्स्थलानां सुविशदमधि–गतिः मननंचास्मिन् संप्रदाये अनुसन्धेयतया सूरिभिरुपबृम्हितम् । स्वरूपेण शिवाभिन्नोऽपि जीवात्मा, शिवस्य शक्तेः संकोचरूपेण निष्पादितानां आणव–मायीय–कार्ममलानां प्रभावेण सीमितो भवति । आणवमलं स्वरूपभेदमावहति, मायीयमलं शरीरेन्द्रियाणां कामक्रोधलोभानां च संबन्धं विधत्ते । कार्ममलं शुभाशुभ–कर्मफलदायकं उत्तरोत्तरमभिवर्धते । अस्य निवारणे ईश्वरानुग्रहः अतिमुख्यः चकास्ति । इममेव शक्तिपातमभिदधुः । भक्तानां परिपाकभेदेन बहुधा अस्य भेदाः न्यरूपि । भक्तेरुत्कर्षात् योग्यतानुरोधेन अध्यात्मविकासे प्राप्ते अन्ततः शिवाभिन्नः शिव एव भवतीति वीरशैवानां प्रक्रिया–सिद्धान्तः । अयं सिद्धान्तः शक्तिविशिष्टाद्वैत सिद्धान्त इति प्रथितो लोके ।

“ अवाच्यात्म स्वरूपाय शिवभावप्रदायिने ।
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥ ”

श्री रा मा नु जा चा र्यः

(वै. आर्. नारायण भट्टाचार्यः)

श्रीशैलेश दयापात्रं धीभक्त्यादि गुणार्णवम् ।
यतीन्द्र प्रवणं वंदे रम्यजामातरं मुनिम् ॥

मानवानां नागरिकतायाः विशिष्टं लक्षणं दार्शनिकतत्वानामवगतिः, तदनुरोधेन भावनाप्रपञ्चस्य परिष्करणं च । एतस्याः मनोभावनायाः निष्पादितं जीवनमनुसरन्तः मानवाः इतरविलक्षणाः परहितैक परायणाश्च भविष्यन्ति । एतादृशं परिष्कृतं जीवनं धर्मजीवनम् । धर्मं मतं च अभेदेन सामान्यजनाः व्यवहरन्ति । मतानां भेदेपि जीवनानुबन्धिनः सामान्या नीतयः सर्वैरप्यनु-स्त्रियन्ते । भारतदेशे शैववैष्णवशाक्त भेदेन मतानि त्रिधा विभक्तानि विराजन्ते । वैष्णवमते अवान्तर भेदाश्च विलसन्ति ।

दक्षिणभारते रामानुजाचार्य-आनन्दतीर्थयोः उत्कले वङ्गे च चैतन्य-स्वामिनः उत्तरभारते रामानन्दस्य विष्णुस्वामिनश्च वैष्णवसंप्रदायाः विद्यन्ते । तथैव घूर्जरे महाराष्ट्रे च वल्लभाचार्यस्य, अन्येषां भक्तानां च प्रचारेण लक्षोप-लक्ष जनानभिव्याप्य मतमिदं जेजीयते । तत्वचिन्तनविषये संस्कारेषु दीक्षायां च एतेषु क्वचिद्व्यत्यासः दृश्यते । तथापि विष्णुः परदैवं, भक्तिः मुक्तेरुपायः, जीवाः परस्परं भिन्नाः परमात्मना च इत्यादिषु प्रधानविषयेषु ऐकमत्यं विद्योतते ।

चिरन्तनैः प्रवर्तितेषु ज्ञानकर्मभक्ति प्रपत्तिमार्गेषु भक्तिमार्गमनुरुन्धानाः बहवो ऋषयः आचार्याश्च बभूवुः । तेषु क्रि. श. १०१७ वर्षे श्रीरामानुजाचार्यः

श्रीपेरम्बदूर्ग्रामे (इदानींतन मदरास समीपे) कान्तिमती केशवसूरिदंपत्योः जज्ञे। श्रोत्रियसंप्रदायेण संस्कृतः अद्वैतसिद्धान्ते प्रखरपण्डितस्य यादवप्रकाशस्य अन्तेवासी बभूव। अस्य धिषणायाः पटुत्वं सर्वानुरागितां च असहमानाः केचन इमं आचार्यं रहस्येण हन्तुमैच्छन्; तत्कृते तीर्थयात्रा व्याजेन काशीक्षेत्रं गुरुणा यादवप्रकाशेन सह प्रतस्थिरे। तत्र गङ्गायां अस्य चरमगीतं गातुं कृतनिश्चयाः आसन्। सतीर्थ्यैः सह गच्छन् दैवात् मार्गे वञ्चकानामभिप्रायमजानत्। ततः युक्त्या तान् विहाय प्रतिनिवृत्तः स्वस्थानं प्राप। तीर्थयात्र्या प्रतिनिवृत्तस्य गुरोरन्तिकैव पुनः शास्त्राणि अधीयानः आचारेण विनयेन पाण्डित्येन च समकालिकेषु वैशिष्ट्यं लेभे। अद्वैतसंप्रदायानुयायिना गुरुणा यादवप्रकाशेन वर्णितं "कप्यासं पुण्डरीकं" इति श्रुतेः अर्थं अन्यथा व्याचख्यौ। तथैव "सत्यं ज्ञानं अनन्तं" इत्यादीनां पदानां अर्थान्तरं विवृणोत्। एतादृशैरनेकैः कारणैः अस्य वैमनस्यं गुरुभिस्सह अभ्यवर्धत।

श्रीरङ्गे यामुनाचार्यः श्रीरङ्गनाथदेवालयस्य तथा विशिष्टाद्वैतसिद्धान्तस्य च नेतृत्वमलंचकार। रामानुजाचार्यस्य माता अस्य शिष्यस्य तिरुमलै नम्बि महाशयस्य पुत्री आसीत्। अस्य वृत्तान्तं श्रुत्वा यामुनाचार्यः एनं दिदृक्षुः भगवतः स्तोत्रमेकं प्रणीय पण्डितमुखेन प्रेषयामास। रामानुजाचार्यः स्तोत्रं श्रुत्वा श्रीरङ्गं जिगमिषुः प्रतस्थे। परन्तु यावदुभयोः समागमः सम्भावितः तावदन्तरे यामुनाचार्यः परन्धाममगात्। चिरकांक्षितस्य गुरोः अलाभात् कांचीपूर्णगोष्ठीपूर्णमहापूर्णादिभिः श्रद्धयारहस्यार्थान् अधिजगाम। जातवैराग्यः तुरीयाश्रममगृह्णात्। एतस्मिन्नन्तरे शैवमतानुयायिनां राज्ञां प्रभावेण आचार्यस्य स्थितिः विषमांदशामवाप। शिवस्य परत्वं उच्चैरुद्घुष्टमासीत् राजनिर्बन्धेन। तत्र रामानुजाचार्योऽपि आहूतः। अस्मिन्राजाह्वाने संभावित—विपदं सम्य-गभ्यूह्य अस्य शिष्यः कूरेशः काषायं परिधाय अहमेव रामानुजाचार्य इति राजसभां महापूर्णेन सह ययौ। शैवानां निदेशानुसारेण शिवस्य परत्वं नाभ्युप-गच्छत्। महापूर्णेन सह प्रभुशक्ति सहकृताः प्रतिवादिनः अनेन कारणेन कूरेशस्य नेत्रे उत्पाटयन्। महापूर्णस्तु तत्रैव ममार। ततः मित्रैः प्रेरितः

आचार्यः द्रविडभूमिं परिहाय कर्णाटकदेशं अभिजगाम । इदानींतन मैसूर्–मण्डले सालिग्रामाख्ये ग्रामे द्वादशवर्षाण्युवास । प्रवचनेन उपदेशेन च शिष्यानुद्बोधयत् । तेषु कर्णाटकजनपदस्य राजा बिट्टिदेवः वैष्णवमतमङ्गीकृत्य विष्णुवर्धन इति प्रथितो अभवत् । तोण्डनूरु ग्रामे तटाकं निर्मापयत् । यादवाद्रौ संपत्कुमारदेवालयं समुज्जीवयत् । हरिजनानां सहयोगं अङ्गीकृत्य देवालयं निर्ममे । प्रतिवर्षं दिनत्रयपर्यन्तं देवालये तेषां प्रवेशं अन्वगृण्हात् । तिरुपतिक्षेत्रे वेङ्कटाद्रौ शैवक्षेत्रं वा वैष्णवक्षेत्रं वा इति विवादे संजाते वैष्णव–क्षेत्रमित्येव निर्धारयत् । वेङ्कटाद्रिः वैष्णवक्षेत्रमिति प्राचीन पण्डितैरारचितेषु शिलप्पाधिकार प्रभृतिषु द्रविडप्रबन्धेषु उपवर्णनं दुराराध्यानपि सम्यक् प्रह्वीकरोति सहृदयान् स्मारयति च । गोविन्दराज प्रतिष्ठां च अकारयत् ।

यामुनाचार्यस्य उद्देशत्रयं विष्णुसहस्रनाम भाष्य निर्माणं, ब्रह्मसूत्र भाष्य प्रणयनं, द्राविडप्रबन्धानां व्याख्यारचनं च । तेषु ब्रह्मसूत्रभाष्यं स्वयं प्रणिनाय । प्रथमं स्वशिष्यद्वारा पराशरभट्टेन पर्यपूरयत् । तृतीयं च शिष्य–मुखेनैव साधयामास । एवं उद्देशत्रयं परिपूर्णतया सम्मानयत् । कुलोत्तुङ्ग मरणानन्तरं द्रविडदेशं जगाम । प्रायशः पञ्चाशद्वर्षाणि कर्णाटकजनपदे उवास ।

श्रीरामानुजाचार्येण रचिताः प्रबन्धाः नव — श्रीभाष्यं, गीताभाष्यं, वेदार्थसंग्रहः, वेदान्तदीपः, वेदान्तसारः, शरणागतिगद्यम्, श्रीवैकुण्ठगद्यम्, श्रीरङ्गगद्यम्, नित्यग्रन्थः इति । प्राचां ग्रन्थानधीत्य उपनिषत्सु भेद–अभेद–भेदाभेदात्मक–अर्थसूचकानि वाक्यानि समाकलय्य मध्यस्थमार्गं प्रदर्शयामास । बोधायनवृत्तिमनुसरन् भाष्यं रचयामास । भक्तिं प्रपत्तिं च मोक्षोपायान् उपबृम्हयत् । सदा वैष्णवधर्मानुपालने सौलभ्यं–सौकर्यं च विवृणोत् । उत्तर–देशादागतान् रामानन्दादीन् उपदेशेन अनुजिगृक्षत् । स्वजीवितानन्तरं चतुस्सप्तति पण्डितान् धर्मप्रचारणाय न्ययुञ्जत् । ज्योतिश्शास्त्रानुरोधेन नव–ग्रहाणां दशाः सम्भूयविंशत्युत्तरएकशतवर्षाणि भवन्ति । आचार्यः विंशत्युत्तर–एकशतवर्षाणि आयुः यापयित्वा शाश्वतं विष्णोः पदमारुरोह ।

मानवानां अनुभवः शास्त्रार्थानतिशेते । चक्षुषा रूपाणि पश्यामः, श्रोत्रेण शब्दं शृणुमः, जिह्वया रसमास्वादयामः, घ्राणेन गन्धं जिघ्रामः, त्वचा स्पर्शमनुभवामः, एवमेव पञ्चैरपि कर्मेन्द्रियैस्तत्तत्कार्यं निर्वर्तामहे । भोग्य-भूताः सर्वे पदार्थास्सर्वदा पञ्चभूतात्मका एव समुपलभ्यन्ते । रूप-रस-गन्धादीन् प्रत्येकं पदार्थनिष्ठान् तत्तदिन्द्रियैः अनुभवामः । अनेन रूपादिभिः अनेकगुणैः विशिष्टं पदार्थं विषयीकुर्वन् मानवः क्वचिदपि निर्विशेषं पदार्थं नाधिगच्छति । न केवलमयं नियमः बाह्यपदार्थेषु विश्राम्यति ।

आन्तरीयेष्वपि व्यक्तिः, स्थूलं पाञ्चभौतिकशरीरं परःसहस्रभेदविशिष्ट-मनुसन्धत्ते, रक्तपरिचलनं, श्वासोच्छ्वासौ, अनिच्छन्नपि तत्तदवयव प्रेरणाक्रमश्च मननेन अधिगम्यन्ते । बाह्यैः पञ्चभूतैः संबन्धश्च आश्चर्यमावहति । इन्द्रियार्थेषु केषांचिद्व्यक्तीनां कतिपयेषु पदार्थेषु रक्तिश्च निदानमपेक्षते । अतीतानां स्मरणं भविष्यत्कालिकानामभ्यूहनं वर्तमानकालिकानामनुध्यानं च शरीरेन्द्रिय प्राणातिरिक्तं सर्वविषयग्राहकं मनः आवेदयति । मनोभावनासु आकारसहिताः आकाररहिताश्च बोभूयन्ते । लक्ष्योपलक्षभावनानां केन्द्रस्थानं अन्यत् अस्तीति सम्भाव्यते, इदं ज्ञानं निर्विकल्पकं सविकल्पकं चेति दार्शनिकैः अभाणि ।

परिस्थितिः सर्वेषां धर्माणां समानापि केषांचिदेव विशदप्रतिपत्तिः विषयाणां, तत्वानां च विशेषप्रतिपत्तिः दृश्यते । अतः अन्यदपि उपकरणान्तरं सर्वविषय प्रकाशन समर्थं त्रिकालाबाधितं अस्तीति विज्ञायते । सर्वासु प्रति–पत्तिषु अहं जानामि अहमनुभवामीति अहं पदार्थप्रतीतेरनुवर्तमानत्वात् तदेव सर्वेषां व्यापाराणां अधिकरणं "आत्मा" इत्यभ्युपेयुः । ततश्च संग्रहेण आत्मनां अनुभवानां संस्काराणां च विलक्षणत्वात् आत्मानः परस्परं भिन्ना इति अध्यगच्छन् । रागद्वेषमोहादि भावनानां विरहे सति स्वरूपानुसन्धाने आनन्दस्यानुभवैक समधिगम्यत्वात् आत्मा स्वतः सुखीति च निरणैषुः । तस्मात् संग्रहः व्यक्तिस्वरूपस्य इत्थमगादि ।

" देहेन्द्रिय मनः प्राण धीभ्योऽन्योऽनन्य साधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥

अनेन परिशीलनेन व्यक्तिः लक्षोपलक्ष भौतिकांशैः तथेन्द्रिय प्राण-मानसशेमुष्यादि सूक्ष्मशक्तीनां संपुटस्वरूपः विशिष्ट एवेति निश्चीयते ।

व्यक्तिषु तथा पदार्थेषु च गुणाः संभूय गुणिनं आश्रयन्ते । यथा रामः, श्यामः पराक्रमी सत्यसन्धः धन्वीत्यादयः । तथैवेदं फलं सुवर्णवर्णं मधुरं सुगन्धं, अङ्कुरजननसमर्थं बीजमिति च बहुलं दृष्टं लोके । अत्रैकस्मिन्नधिकरणे भिन्न-प्रवृत्ति निमित्तकैः पदैः निर्वाच्यमानाः गुणाः प्रत्येकं भिन्ना अपि संभूयाविरोधेन वर्तन्ते सामानाधिकरण्य संबन्धेन । शरीर-शरीरभाव संबन्धोऽपि एतादृशैव । शरीर-शरीरिणोः साजात्यं नास्ति । " अतः यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम्, तच्छेषतैकस्वरूपं च तत्तस्य शरीरम् । " अनेन शरीरलक्षणेन जीवानां अचित्स्वरूपस्य विश्वस्य च परमात्मशरीरत्वं सिध्यति । तथा च सर्वे शब्दाः प्रथमं शरीरं तदनु शरीरिणं च नियमेन अभिदधति । एतेन वक्तुः विवक्षानुरोधेन शरीरं वा शरीरीवा अभिधातुं शक्यते पदैः । सर्वस्य ब्रह्मात्मकत्वात् साधकः सर्वत्र परमात्मानं अनुसंदध्यात्; अस्य भगवद्दृष्टेः सर्वाणि पदानि प्रयुक्तानि परमात्मानमेव अन्ततो अभिदधति । इयमपर्यवसानवृत्तिरिति आभाषि भाष्ये । जडाजडयोः तस्य शरीरत्वात् सर्वं तन्मयं साधकस्य बोभवीति । यतः बाह्ये सौन्दर्यं अन्ततः आनन्दश्च अनुभूयते ।

जीवानामेव विश्वव्यापारनिर्वहणासंभवात् परमात्मा सर्वशक्तः, सर्वव्यापी नित्यः एकः अनुमानेन प्रमाणैश्च सिध्यति । तस्य विश्वमिदमशेषं दीपज्वालायाः प्रभेव परमात्मनः स्वरूपाद्भिन्नं तथापि अपृथक्सिद्धं च वर्तते । तस्मादत्र चित्स्वरूपा जीवात्मानः, अचित्स्वरूपं जगत् ईश्वरश्चेति तत्वत्रयं पर्यगणयन् । ईश्वरोपासनमेव अशेषबन्धनिरसने परमोपायः । तच्च " महनीयविषये प्रीतिः भक्तिः " । तस्याः काष्ठाभेदेन भक्तिः, परभक्तिः, परमभक्तिश्चेति भेदं

भजते । सर्वाण्युपासनानि भक्तिरूपाण्येव, प्रपत्तिरपि साधनभूता मोक्षस्य । अत्र साधकः —

" चराचराणि भूतानि सर्वाणि भगवद्वपुः । अतस्तदानुकूल्यं
मे कर्तव्यमिति निश्चयः । आनुकूल्यस्य संकल्पः "

इत्यादिना सर्वभूतहितैषित्वं भगवति महाविश्वासश्च अङ्गभावेन उपवर्णितौ । सोऽयं प्रपन्नः आर्तः दृप्त इति द्विधा । आर्तः उत्तरक्षणे मुच्यते दृप्तस्तु यथा-समयमिति । सर्वं ज्ञानं यथार्थम् । भ्रान्तिज्ञानमपि भ्रान्तिरूपेण यथार्थमेव । असत्यात् सत्यप्रतिपत्तिर्नास्ति, सत्यादेव सत्यप्रतिपत्तिः । पापपुण्ये भगवतः निग्रहानुग्रहरूपे भवतः । पापं प्रज्ञां संकोचयति । पुण्यं विकासयति । सर्वेषां कर्मसंस्काराणामपाये जीवात्मनः सांसिद्धिकाः गुणाः अपहतपाप्मत्वादयः अष्टौ अभिव्यज्यन्ते । गुणाष्टकाविर्भावे जीवात्मा परमात्मसायुज्य माप्नोति । सायुज्यं नाम सयुग्भावः, जगद्व्यापारवर्जं लक्ष्मीपतित्वं च विनाऽयं जीवः परमात्मना सह निरतिशयानन्दमनुभवति । इयं नित्यविभूतिरिति परिभाष्यते । जीवानां सुख-दुःखभोगाश्रया लीलाविभूतिरिति आख्यायते । लीलाविभूतिः त्रिगुण-विशिष्टा । नित्यविभूतौ कालस्य प्रभावो नास्ति, अतः अनादिः अनन्ता शुद्धसत्वमयी च । तस्मात् मुक्तः जीवात्मा शाश्वतमानन्दमनुभवति ।

रामानुजार्य दिव्याज्ञा वर्धतामभिवर्धताम् ।
दिगन्तव्यापिनी भूयात्साहि लोकहितैषणी ॥

श्रीमद्वेङ्कटनाथः

(एन्. एस्. अनन्तरङ्गाचार्यः)

अस्मिन् भारतदेशे अनेके ज्ञानिनः महात्मानश्च अवतीर्य 'उत्तिष्ठत, जाग्रत, प्राप्यवरान्निबोधत' इत्युपदिदिशुः । भक्ताः, ज्ञानिनः, योगिनः, कवयश्च स्वीयोपदेशै र्जनान् प्रभावयामासुः । एषु श्रीमद्वेङ्कटनाथः अन्यतमः । अयं महापुरुषः अनुपमप्रतिभाशाली, सर्वतन्त्रस्वतन्त्र इति विख्यातः, कविसार्वभौमः, तार्किकपञ्चाननः, ज्ञानवैराग्यसंपन्नश्च सर्वगुणानामाकर इव आसीत् ।

श्रीमद् वेंकटनाथस्य पिता अभिनन्द्यमानवैभवः अनन्तसूरिः । माता तोताद्यम्बा । प्रपितामहः पुण्डरीकाक्षसूरिः । अयं क्रि. श. १२६८ तमे विभवनामसंवत्सरे भा. शु. दशम्यां श्रवणनक्षत्रे अवततार । पितरौ आनन्दातिशयेन शिशोर्जातकर्मादिकं कृत्वा वेंकटनाथः इति नाम चक्रुः । बाल्यएवायं प्रतिभावान् बालकः स्वमातुलगृहे अवर्धत । एकदा स्वमातुलेन सह श्रीवात्स्यवरदाचार्यस्य प्रवचनगोष्ठीमागतः । तदा उपन्यासविच्छेदे जाते सति उपन्यासकेन श्रोतृभिश्च विस्मृतप्राये स तेभ्य, तत्प्रकरणं स्मारयामास । सन्तुष्टेन वरदगुरुणा "स्यादसाविति" परया दयया "प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः । भूयास्त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम्" इत्याशिषः प्रायुङ्क्त । वरदगुरोराशंसानुसारं अस्यमातुलः रामानुजाचार्यः तं सकलाः कलाः अशिक्षयत् । एवं साङ्गवेद–नाटका–लङ्कार–श्रीभाष्यादि ग्रन्थान् मातुलादधीतवान् ।

कृतसमावर्तनः श्रीमद् वेंकटनाथः गृहस्थाश्रममास्थाय पाञ्चकालिकवर्त्मना भगवन्तं नारायणं आराधयन् आचार्योपासनतत्परोऽवर्तत । एतस्मिन्नन्तरे गुरोः

सकाशात् गरुडमन्त्रोपदेशं प्राप्य तदुपासनार्थं अहीन्द्रपुरमागत्य भगवन्तं सेवमानः मन्त्रानुसन्धान मकरोत् । अत्रैव गुरुणा हयग्रीवमन्त्रः उपदिष्टः येन हयग्रीव प्रसादोऽपि लब्ध इति प्रतीतिः वर्तते । पण्डिताः पामराश्च अस्य प्रवचन-गोष्ठीमागत्य उपदेशवाङ्मधुमासेव्य धन्या बभूवुः । न केवलमयं आचार्यः पण्डितः उपदेशकश्च, परन्तु "मन्त्रश्रुत्यं चरामसि" इति श्रुतिमनुसरन् ज्ञानानुसारमनुष्ठानतत्परश्चासीत् । भारतभूम्यां तत्र तत्र क्षेत्रेषु विविधरूपेण अर्चारूपेण अवस्थितं भगवन्तं सिषेवयिषया तीर्थयात्रां प्रतस्थे । काञ्चीपुरीतः प्रस्थितः उत्तरभारतं ययौ । मध्येमार्गं वेंकटाद्रौ श्रीनिवासं दयाशतकेन तुष्टाव । उत्तरभारते वृन्दावने मथुरायां तथैव काशीप्रभृतिषु दिव्यक्षेत्रेषु विराजमानाः भगवन्मूर्तीः अभजत् । प्रतिनिवर्तमानः अहोबलादिक्षेत्रेषु भगवन्तं संसेव्य काञ्चीमाजगाम । अनन्तरं बहून् संस्कृतभाषायां द्राविडभाषायां च प्रबन्धान रीरचत् । अयमाचार्यः द्रव्यसंग्रहे सदाविमुखः आस । उञ्छवृत्या स्वदेहं पुपोष । सर्वेषां अस्य वैराग्यं आश्चर्यावहमासीत् । अस्य समकालिकः विद्यारण्यः मित्रं चेति किंवदन्ती श्रूयते । सहृदयत्वेन विद्यारण्यः आचार्यं राजाश्रयमङ्गी–कुर्विति आह्वयत् । ख्यातिलाभपूजासु विमुखः वैराग्य–पञ्चकमिति प्रथितं पञ्च-श्लोकात्मकं प्रबन्धं लिखित्वा प्रेषयामासेति कथा जनजनिता वर्तते ।

"न मे पित्रार्जितं किंचित् न मया किंचिदार्जितम् ।
अस्ति मे हस्ति शैलाग्रे वस्तु पैतामहं धनम् ॥"

श्रीरङ्गे विशिष्टाद्वैतसिद्धान्तस्य पीठमलंकृत्य प्रवचनतत्परः कालं निनाय । अस्मिन्नन्तरे केचन असूयालवः पण्डिताः वादाहवाय आह्वयन् । तत्रस्था सुदर्शनभट्टादयः ज्ञानवृद्धापि वयोवृद्धाः वादाय आचार्यं न्ययोजयन् । आचार्यः सादरमङ्गीकृत्य जवेन प्रतिवादिनः युक्तिभिः प्रमाणैश्च अभ्यभवत् । अस्मिन्ननु–बन्धे प्रचलितानां वाद—प्रतिवादानां लेखनं तत्साक्षिभिरादृतम् । तदेवेदानीं शतदूषणीति नाम्ना विराजते । अस्मिन् मायावादं बौद्धमतं च निराचिकीर्षया एकशतवादाः व्युत्पादिताः । इदानींपुनः चतुःषष्ठि वादा एवोपलभ्यन्ते ।

एतदन्तरे पुनः विद्यारण्याक्षोभ्यतीर्थयोः वाक्यार्थः प्राचलत् । उभावप्याचार्यस्य माध्यस्थ्यपदमैच्छताम् । कथमप्याचार्यः विजयनगरगमनं निराचकार । तथापि द्वावपि स्वीय वादक्रमान् पत्रमारोप्य प्रेषयामासतुः । तत्रायं विषयः आश्चर्य मावहति । अद्वैतिनस्तु "अक्षोभ्यं क्षोभयामास विद्यारण्यो महामुनि"रिति स्वीयाभिप्रायं लिलेख इति वदन्ति । द्वैतिनस्तु "असिना तत्वमसिना परजीव प्रभेदिना । विद्यारण्यमहारण्यमक्षोभ्य मुनिरच्छिनत्"। इत्याचार्याभिप्रायं उपहारीकुर्वन्ति यथा तथा वा भवतु । तस्मिन् काले आचार्याः गौरवपात्रं उभयोरासीदिति निःसंशयमधिगच्छामः ।

वाक्यार्थलालसाः प्रायशः पण्डिताः स्पर्धालवः आसन् । डिण्डिमोनाम कविः स्वप्रशंसा पद्यानि आचार्याय प्राहिणोत् । आचार्योपि श्लोकद्वयं प्रत्युत्तरं प्रैषयत् । गुणपक्षपाती डिण्डिमः आचार्यस्य यादवाभ्युदयकाव्यं पठित्वा तुतोष । आचार्यं अनेन प्रशंसापद्येन —

"घोटी धाटी कठोर स्फुटविकट कथाटोपवाचाट कोटी,
कोटीराघाटपेटी पुटघटितमणी संघ संघट्टितांघ्रिः ।
खर्वीकुर्वन् सगर्वं जयति कवितते: सर्वतन्त्रस्वतन्त्रः ।
वेदान्ताचार्यवर्यो विघटित जडधीसंकटो वेंकटेशः ॥"

इत्युपश्लोकयामासेति शुश्रुम । स्पर्धालूनां अहंकारनिरसनाय एकस्यामेव यामिन्यां पादुकासहस्रं नाम सहस्रश्लोकात्मकं प्रबन्धं श्रीरङ्गनाथ पादुके अधिकृत्य अरीरचत् । यस्य व्याख्यानं अप्पय्यदीक्षितेन व्यरचि । आचार्यस्य कीर्तिमसहमानाः अनेकमुखैः एनं उपदुद्रुवुः । तस्मिन् काले आचार्यः क्षुद्रोपद्रवकारिणः दोषान् अनुद्घाटयन्नेव इदानींतन मैसूरप्रान्ते विद्यमानं "सत्याकालग्रामं" आजगाम । कियत्कालं तत्रोषित्वा परश्शतेभ्यः शिष्येभ्यः प्रवचनेन तत्वमुपदिदेश । पुनः श्रीरङ्गक्षेत्रमियाय । तत्र कंचित् कालमतिवाहयन् श्रीरङ्गनाथमभजत् । एतदनन्तरं A. D. 1336 तमे संवत्सरे "मल्लिक् काफर्" नामा

तुरुष्कसेनानी श्रीरङ्गक्षेत्रं ससैन्यः न्यरुन्धत् । बहून् वैष्णवानमारयत् । देवालयेषु गृहेषु च धनकनक वस्तु वाहनादीन्यपाहरत् । अस्यां विपदि दूर-दर्शिनः श्रीरङ्गनाथस्य मूर्तिं निगूह्य कृतकविग्रहमन्यं प्रकाशं निक्षिप्य संघशः पूजयन्नासन् । श्रीसुदर्शनाचार्याः आचार्यमाहूय स्वीयौ द्वौ कुमारौ स्वेनैव रचितां श्रीभाष्यव्याख्यां श्रुतप्रकाशिकां च समर्प्य श्रीरङ्गनाथसेवायां प्राणा-नर्पयन् । आचार्यः पुत्रौ श्रुतप्रकाशिकां च सबहुमानमादाय सत्याकाल ग्राम-मागतः । अनन्तरं यादवाद्रिं प्राप । तत्र ग्रन्थानारचयन् शिष्यानध्यापयन् कंचित्कालमतिवाहयत् । सतीत्थं गोप्पणार्यो नाम विजयनगरसाम्राज्य-सेनापतिः आचार्यनिदेशेन श्रीरङ्गक्षेत्रात् तुरुष्कान् निरवासयत् । भक्तजनाः श्रीरङ्गनाथमानीय यथापूर्वं प्रतिष्ठापयामासुः । एतत्सर्वं श्रुत्वा संतुष्टः आचार्यः श्रीरङ्गक्षेत्रं जगाम । प्रायशः तत्रैव संकल्पसूर्योदयं नाम नाटकं प्रणिनाय यस्मिन् —

" विंशत्यब्दे विश्रुत नानाविधविद्यः, त्रिंशद्वारं श्रावित शारीरकभाष्यः ।
श्रेयः श्रीमान् वेंकटनाथः श्रुतिपथ्यं नाथप्रीत्यै नाटकमर्थ्यं व्यधितैतत् ॥ "

चरमकालेऽपि भगवतो दयामुदीक्षमाणः प्रशान्तमनाः आसन्निति तेषां वचनेनैव ज्ञायते ।

" निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनम्
निर्धूतेतर पारतन्त्र्य निरयाः नीताः सुखं वासराः ।
अङ्गीकृत्य सतां प्रसक्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे ॥ "

यावज्जीवं सर्वेषु प्रयत्नेषु यावच्छक्ति विशिष्टाद्वैत सिद्धान्तस्य दुर्धर्षतां प्रसाधयामास । भाष्यकारेण संक्षेपेणोदीरितान् विषयान् तत्त्वटीका, न्यायपरिशुद्धिः, न्यायसिद्धाञ्जनम्, तत्वमुक्ताकलापादिसंग्रहैः विवृणोत् । विद्यार्थिनां भाष्यस्य धारणार्थं अधिकरण सारावलीं स्रग्धरामालिनीं जग्रन्थ ।

तत्र तत्र दिव्यक्षेत्रेषु अर्चारूपिणं भगवन्तं संसेवयन् बहूनि स्तोत्राणि आतनोत्। स्तोत्रेषु अच्युतशतकं प्राकृतमयं वर्तते। साक्षात्कृततत्त्वैः प्राज्ञैः आल्वार्पद–वाच्यैः द्राविडभाषायां रचिताः चतुस्सहस्राधिकगाथाः अधीत्य संस्कृतभाषायां द्रमिडोपनिषत्तात्पर्यरत्नावलिं रचयामास। दार्शनिकविचारान् यथा संप्रदायं ग्राहयितुं देशभाषायां परमतभङ्गं नाम प्रबन्धं प्रणिनाय। पञ्चाशत् संख्यामप्य-तिशेते अनेन प्रणीतायाः छन्दोबद्धायाः द्राविडगाथायाः संख्या — याः देशिक प्रबन्धः इति प्रसिध्या जनैरधीयन्ते। द्रविडभाषायां सिद्धान्त विवरणात्मकाः लघुप्रबन्धाः प्रायः सप्तति संख्यामपि अतिवर्तन्ते। एवमाचार्येण प्रणीताः प्रबन्धाः व्याख्यानरूपाः स्वतन्त्रप्रबन्धाः, स्तोत्राणि, गद्यप्रबन्धाः काव्य–नाटकादयः द्रविडभाषायां गद्यपद्यात्मकाश्च संभूय षड्विंशत्युत्तरैकशतसंख्याका इति विमर्शकैर्निरणैष्यत।

आचार्यः कविः शास्त्रज्ञः लोकपरिस्थितिं परीक्ष्य क्वचित् निर्विण्णश्च बभूव; यतः स्यवमेवाह "कलि प्रणिधिलक्षणैः कलितशाक्यलोकायतैः तुरुष्क-यवनादिभिः जगति जृम्भमाणं भयं। प्रसह्य निजशक्तिभिः प्रसभमायुधैः पञ्चभिः क्षितित्रिदशरक्षकैः क्षपय रंगनाथ क्षणादिति"। तथैव निर्भीकः वाक्प्रावसरेषु प्रतिवादिनः तृणानीवागणयत्।

"काव्येषु कोमलधियो वयमेवनान्ये
तर्केषु कर्कशधियो वयमेवनान्ये।
वादेषु निश्चितधियो वयमेव नान्ये
कृष्णे निवेशितधियो वयमेव नान्ये॥"

इति च। वैराग्यं पाण्डित्यं कर्मठत्वं गार्हस्थ्यं च अमुमालम्ब्य खेलन्ति स्म।

रामानुजदयापात्रं ज्ञान वैराग्यभूषणम्।
श्रीमद्वेंकटनाथार्यं वन्दे वेदान्तदेशिकम्।

श्री म ध्वा चा र्याः

(टि. रामाचार्यः)

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथ प्रतिमप्रभाय ।
नारायणायाखिल कारणाय श्रीप्राणनाथाय नमस्करोमि ॥

प्रकृति सौन्दर्यस्यावासभूते दक्षिणकर्णाटक जनपदे समुद्रतीरे अनादिकालतः बहवः सिद्धपुरुषाः न्यवसन् । तत्र पाजकक्षेत्रमिति प्रसिद्धे प्रदेशे "बेळे" नाम ग्रामः अवर्तत । अयं ग्रामः इदानींतन उडुपि (रजतपीठपुर) क्षेत्रात् क्रोशत्रयाभ्यन्तरे वर्तते । तस्मिन् मध्यगेहो नाम कश्चन श्रोत्रियप्रवरः उवास । सः अतिमनोहरीं वेदवतीं नाम कन्यां पर्यणयत् । पाण्डित्य महिम्ना "भट्ट" इति गौरवं च लेभे । मध्यगेहभट्टदम्पत्योः द्वे पुत्रौ द्वे कन्ये च जज्ञिरे । पुत्रौ बाल्य एव लोकान्तरमगमताम् । कन्ये इति केचन कन्या इति च अन्ये वदन्ति । अस्मिन्नवसरे दम्पती पुत्रमाकांक्षमाणावास्ताम् । तदा अतीतेषु कलि-वर्षेषु ४८००=क्रि. श. ११९९ तमे वर्षे आश्वयुज शुक्ल दशम्यां श्रीमध्वाचार्यः अवातरत् । अयं जन्मदिवसः आचार्येण स्वीय भारततात्पर्यनिर्णये समसूचि । इदानीमुपलब्धानां शासनानां संवादोऽप्यस्य दृश्यते । मध्यगेहभट्टः इमं वासुदेव इति नामकरण संस्कारेण संस्करोत् ।

बाल्ये कृताक्षराभ्यास संस्कारः वैदिकगुरोः सन्निधौ विद्याभ्यासं प्रारेभे । वेदाध्ययने शास्त्राभ्यासे व्यायामे च अतीवासक्तः अचिरेणैव निपुणश्च बभूव । तर्के, व्याकरणे तथा वाद–विवादेषु च असमान कौशल्यं प्रकटीचकार । प्रादुर्भूतयौवनः तुरीयाश्रमस्वीकारे मतिं चक्रे । मातापितरौ अस्य मतिं

तुरीयाश्रमस्वीकारात् प्रतिनिवर्तयितुं प्रायतेताम् । तदा आचार्यः अन्यः कनिष्ठ-भ्राता जायत इति मातापितृभ्यां न्यवेदयत् । तथैव पुत्रो जज्ञे, यः विष्णुतीर्थ इति पश्चात् प्रथितोऽभवत् । प्रायः पञ्चविंशति तमे वर्षे अच्युतप्रेक्षाचार्यात् तुरीयाश्रम मगृह्णात् । अनन्तरं पूर्णप्रज्ञः, आनन्दतीर्थ इति च ख्यातो बभूव । चिरं शास्त्राभ्यासे ध्याने परतत्वध्याने च निमग्नः अध्यात्मविकासं लेभे ।

आचार्यस्तदनन्तरं दक्षिणदेशं यात्रार्थी प्रतस्थे । आसमुद्रं पर्यटन् अनेकान् वादिनः वादे विजिग्ये । विष्णोः सहस्रनाम्नां व्याख्यायन् एकैकस्यापि नाम्नः अनेकानर्थान् विवृण्वन् वादिनः कान्दिशीकतामनयत् । दिग्विजयात् प्रति-निवृत्तः उत्तरभारतं ययौ । यथा पूर्वं उपदेशेन सहृदयानानन्दयत् । वादेन दुराराध्यान् प्रशामयत् । क्वचिदाततायिनः स्वप्रभावेणादमयत् । यस्य प्रभावेण प्रभाविता भक्ताः आचार्यं अपरं भीमं मेनिरे । शिष्येभ्यः पञ्चसंस्कारान् विदधे । यज्ञेषु पशुबलिं निराचकार । सूत्रभाष्यं तथान्यानपि ग्रन्थान् प्रणिनाय ।

पुनः रजतपीठपुरं प्रतिनिवृत्तः उपदेशेन प्रवचनेन च कालं निन्ये । अनतिदूरे शृङ्गेर्यां अद्वैत संप्रदायस्य मठाधिपतयः आसन् । ते तेषां संप्रदाय-प्रचाराय तत्र तत्र स्वप्रतिनिधीन् प्राहिण्वन् । आचार्यस्य प्रभावेण बहवः अद्वैतिनः द्वैतसिद्धान्तमङ्गीचक्रुः येषु पद्मनाभतीर्थः, अक्षोभ्यतीर्थ माधव-तीर्थादयः प्रसिद्धाः चकाशिरे । राजानः पण्डिताश्च आचार्यस्य सच्छास्त्रव्याख्यां परमादरेण अशृण्वन् । एतदन्तरे पूर्वाश्रम मातापितरौ परलोकं जग्मतुः । कनिष्ठभ्राता तयोरपरक्रियां निर्वर्तयामास । अस्य प्रभावमसहमानैः कुदृष्टिभिः आचार्यस्य पुस्तकभाण्डागारमपहर्तुं तदा मभिद्रोहः आचरित आसीत् । अन्ततः आचार्यस्य प्रभावेण राज्ञः सहायेन च तेषामभिद्रोहः विफलोऽभवत् । यावज्जीवं धर्मं प्रचारयन् शिष्यानुद्बोधयन् सर्वेभ्यः गौरवमवाप । ऐतिहासिकाः आचार्यः स्वीय एकोनाशीतितमे वर्षे अनित्यं भौतिकदेहं विजहौ इत्यभिप्रयन्ति । सांप्रदायिकास्तु "रजतपीठपुरे एतरेयमुपनिषदं व्याचक्षाण एव सुरकृत-पुष्पवृष्टि मध्ये निलीन" इति इममैतिह्यमाद्रियन्ते ।

भारतीयैः त्रयस्त्रिंशत्कोटिसंख्याका देवताः अभ्युपगताः । वेदवाङ्मये त्रयस्त्रिंशत् संख्याकानां देवतानां प्राधान्येनोल्लेखो दृश्यते । वैष्णवाः विष्णोः परत्वमिच्छन्ति । शैवाः पुनः शिवस्य, शाक्ताः शक्तेः परत्वमिच्छन्ति । 'विषु' व्याप्तौ इति धातोः निष्पन्नं विष्णुरिति पदम् । इदं पदं परमात्मनः एकस्यैव सर्वव्यापकत्वं सर्वनियन्तृत्वं सर्वेश्वरत्वं च बोधयति 'स विष्णुपदवाच्यः' इति अभियुक्तप्रयोगाश्च विद्यन्ते । यद्यपि देवतानां प्राधान्यं तरतमभावश्च सर्वैरप्यङ्गी क्रियते । सामान्यदृष्टिस्तु " सृष्टि—स्थिति—प्रलय कर्तॄन् " त्रिमूर्तीन् विहाय शिष्टाः सर्वा देवताः अवरा एवेति अनुमनुते । त्रिमूर्त्यैक्यं केचन अभिदधुः । केचन त्रिमूर्तिभ्यः उत्तीर्णं अन्यं दैवं विश्वनियन्तारमिच्छन्ति । अन्ये पुनः पर्यायेण त्रिमूर्तीनां विश्वनियन्तृत्वमभिलषन्ति । तादृशानशेषान् वादान्निराकृत्य विष्णोः परत्वमत्र सिद्धान्तीकृतम् ।

भेदः तात्विकः । अतश्च सुखदुःखानुभवः प्राणिनां प्रतिव्यक्ति भिद्यते । सर्वप्रमाणसिद्धोऽयं विषयः । ईदृशानुभवस्य कारणजिज्ञासायां कर्म कारणं भविष्यति । तथापि भेदः सिद्ध एव भुक्तेः प्रत्यात्मं भिद्यमानत्वात् । तस्मात् जीवाः परस्परं भिन्नाः । जड–पदार्थाश्च अर्थक्रियाकारित्वात् रस–वीर्य–विपाक भेदाच्च परस्परं भिन्ना एवानुभूयन्ते । सम्भूय वा एकैकशो वा एते पदार्थाः प्राणिनां भोगाय भवन्ति । ईश्वरः सर्व नियन्ता सर्वशक्तः, सर्वव्यापी च योगिना-मनुभवगम्यः, अस्मदादीनां प्रमाणगम्यः, समाध्यवस्थायां साक्षात्करणीयश्च । तस्मात् सर्वेश्वरः जड–जीव तत्वाभ्यां भिन्नः । एवं जीवेश्वरयोर्भेदः, जड–तत्वस्य ईश्वरस्य च भेदः, परस्परं जीवानां भेदः, जड–जीवयो र्भेदः, मिथः जडपदार्थानां भेदश्च सर्वैः प्रमाणैरधिगम्यते । तदुक्तम् —

" जीवेश्वरभिदाचैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीव–भिदा तथा ॥
मिथश्च जडभेदो यः प्रपञ्चो भेद पञ्चकः ।
सोऽयं सत्योऽप्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।
न च नाशं प्रयात्येषः नचासौ भ्रान्ति कल्पितः ॥ "

वेदवाङ्मयं संहितारण्यकब्राह्मणोपनिषद्भेदेन चतुर्धा विभक्तम् । श्रीमदाचार्यः सर्वेभ्योऽपि विभागेभ्यः सारमाददे । दर्शनानां पुराणानां तत्वं च सुविशदं जगृहे । पाञ्चरात्ररहस्यमाचकलयत् । एवं सर्वसंग्रहात्मकं स्वसिद्धान्तं प्रत्यक्षानुमानागम प्रमाणैरधिगतं स्वानुभवसिद्धं शिष्येभ्यो दिदेश । पुण्यकर्माणि बहूनि भवन्ति । तेषां फलानि च बहुधा जीवात्मनां बहिरन्तश्च विकासमावहन्ति । जीवात्मानः अनन्ताः वर्तन्ते । एते स्त्रीपुंभेदेन भिन्नाश्च, नपुंसको जीवः नास्ति । स्त्रीजीवः न कदापि पुरुषदेहं प्राप्नुयात् । एते जीवात्मानः नित्याः सावयवाश्च न तु अवयवारब्धस्वरूपाः जडपदार्था इव ।

भक्तिशब्दः 'भज–सेवायाम्' इति धातोर्निष्पन्नः । मानवस्य रागः सर्वेषु पदार्थेषु तेषां उपयोगानुसारेण प्रथते । गृहारामक्षेत्रादिषु दारपुत्रादिषु च अयं मानवः अनेकरूपेण अभिव्यज्यमानेन रागेण रज्यते । अत एव वात्सल्यं प्रेमेत्यादिपदैः रागः अभिधीयते । समानेषु मैत्री अवरेषु वात्सल्यं प्रवरेषु गौरवमिति लोकमर्यादा सर्वानन्वेति । ईश्वरविषयिणी भक्तिः तस्य स्वरूप–स्वभाव—माहात्म्यादि परिज्ञानमपेक्षते तत्वतः । परमात्मा सर्वतः जडाजडेभ्यः सर्वेभ्योऽपि पदार्थेभ्योऽधिकः नित्यश्च । तस्मात् सर्वेश्वरत्व सर्वव्यापकत्व आनन्दादि अनन्तकल्याणगुणविशिष्टे भगवति यः तैलधारावदविच्छिन्नस्मृति सन्ततिरूपः स्नेहः प्रवर्तते सा भक्तिरिति गीयते । ज्ञानं विना भक्तिर्नास्ति तथा भक्तिं विना ज्ञानमपि नास्ति, यथा —

> "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः ।
> स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्नचान्यथा ।"

भावना विशेषेण भक्तिः बहुमुखी भगवत्प्राप्तौ साधनं भवति । यथाहाचार्यः —

> "गोप्यः कामयुता भक्ताः कंसाविष्टः स्वयं भृगुः ।
> ज्ञेयो भययुतो भक्तः चैद्यादिस्थाजयादयः ॥
> विद्वेषसंयुता भक्ताः वृष्णयो बन्धुसंयुताः ।"

तथैवान्यत्र स्तोत्रे —

"अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः स्मृतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥"

इत्यादिना अर्चन स्मरणध्यान कीर्तनादयश्च भक्तेः प्रकारविशेषा इति समसूचयत् । एवमधिकारभेदेन भक्तेः प्रकारभेदान् विशिंषन्ति सन्तः । अयमेव परमोपायो मुक्तेः । इयं प्रवराणामवराणां च सदा सुलभत्वात् अप्रमादत्वात् साधकाः भक्तिमेवोपजीवन्ति । वैष्णवास्तु विशेषेणास्मिन् पथि प्रसिद्धाः ।

यद्यपि प्राधान्येन ज्ञेयं परब्रह्मैव । तथापि सर्वे दार्शनिकाः स्वसिद्धान्तस्य व्याचिख्यासयिषया विश्वमशेषं द्रव्यरूपेण पदार्थरूपेण च विभजन्ते । एनं नियममनुसरन्नत्रापि द्रव्य–गुण–कर्म–सामान्य–विशेष–विशिष्ट–अंशी–शक्ति सादृश्य–अभावरूपेण पदार्थाः दश अङ्गीकृताः, परमात्मादयः द्रव्याणि विंशतिः, रूपादयो गुणाः चत्वारिंशत् । कर्म त्रिविधं, सामान्यं द्विविधं, विशेषा अनन्ताः, विशिष्टं–अंशीति द्वौ पदार्थौ अबाधित प्रामाणिकव्यवहारेणाङ्गीकृतौ । शक्ति–सादृश्याभावाः सामान्येन इतरैरिवात्रापि अङ्गीकृताः ।

तत्र परमात्मा सर्वज्ञः सर्वशक्तः निरतिशयज्ञानानन्दादिकल्याणगुण परिपूर्णश्च काल–देश–वस्तु परिच्छेद रहितः सन् सृष्टि–स्थिति–संहार–नियमन –ज्ञानाज्ञान–संसार–मोक्षरूपैरष्टकृत्यैः जगत्कर्ता, सर्व शब्दवाच्यश्च । सर्वे सचेतनाः परमात्मनः प्रतिबिम्बभूताः "तद्भिन्नत्वे सति तत्प्रतिबिम्बत्वम् ।" जडपदार्थस्तु न तथा, सादृश्याभावात् । लक्ष्मीः पुनः सकलकल्याणगुणपूर्णा परमात्माधीना चेतनरूपिणी ब्रह्मादिभ्योऽपि प्रकृष्टा वर्तते । परमात्मा सर्वेषां चेतनानां पितृस्थानीयः, लक्ष्मी मातृस्थानीया इत्यनयो वैशिष्ट्यम् । तस्मादियं लक्ष्मीः जीवकोटौ ईश्वरकोटौ च गण्यते । उपास्यो विष्णुः, उपासकाः सर्वे जीवाः । तेऽपि संक्षेपेण त्रिधा भिन्नाः मुक्तियोग्याः नित्यसंसारिणः, तमो–

योग्याश्चेति । एते पुनरधिकारभेदेन–संस्कारभेदेन च बहुधा भिद्यन्ते । सर्वेषामुपासनानुगुण्येन अपरोक्षज्ञानसिद्धिः । अनेन अपरोक्षज्ञानेन भगवत्प्रसाद-रूपो मोक्षः ज्ञानानन्दस्वरूपसाक्षात्कारात्मकः प्राप्यते । मोक्षश्च सालोक्य–सामीप्य–सारूप्य–सायुज्य भेदेन भिद्यते । मुक्तानां जीवात्मनां स्वस्वयोग्यता-नुसारं स्वरूपानुभवः विद्यते । तस्मादानन्दतारतम्यं मुक्तानाम् । परमात्मनस्तु जीव–भोग्यानन्दानुभवः वरीवर्ति ।

आचार्यः शिष्यानुजिघृक्षया तत्वप्रकाशनाय च सप्तत्रिंशत् प्रबन्धान् अन्वगृण्हात् । तेषु दशोपनिषद्भाष्याणि, गीताभाष्यम्, ब्रह्मसूत्रभाष्यम्, तात्पर्यबोधकं अनुव्याख्यानम्, भागवत––भारत––गीता तात्पर्यनिर्णयाः, श्रीकृष्णामृतमहार्णवादि स्तोत्राणि च नितरां प्रसिद्धाः वर्तन्ते । एवं ग्रन्थमुखेन प्रवचनेन च आचार्यः भक्तिं प्राधान्येन मोक्षोपायमुररीचकार । युक्तिभिः प्रमाणैश्च द्वैतसिद्धान्तस्यासाधारण्यं स्थिरीचकार । सर्वेषां अनुभवारूढं भेदज्ञानं पञ्चसु पर्वेषु संजग्राह । प्रतिवादिनः वादाहवेषु विजिग्ये । क्षुद्रोपद्रवमर्दनाय प्रबन्धाना रचयत् । सिद्धान्त प्रचाराय अष्टौ मठान् प्रतिष्ठापयां बभूव । बालसंन्यासिनः मठानामाधिपत्यमलंकुर्युरित्यादिदेश । इदानीमपि रजतपीठपुरे बालसंन्यासिभिः अलंकृताः अष्टमठाः विराजन्ते ।

"श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्वतो
भेदो जीवगणाः हरेरनुचरा नीचोच्चभावंगताः ।
मुक्तिर्नैज सुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥"

म न्त्रा ल य:

(टि. गङ्गाधरय्य)

अनेके महापुरुषाः सामाजिक—धार्मिक—राजकीयादिविषयाणां परिष्करणेन लोकानां हितमन्विच्छन्तः तदा तदा अवतरन्ति । इमे अज्ञानिनां ज्ञान–मुपदिशन्ति, धर्माविरुद्धानाचारान् प्रवर्तयन्ति, सन्मार्गं प्रदर्शयन्ति च । एतादृशः बहवो महानुभावा स्वजन्मना प्रभावेण च इमं देशमलञ्चक्रुः । तेषां प्रभावः, कार्याणि कीर्तिश्च जिज्ञासूनां मार्गदर्शकानि अनुदिनं स्मरणमर्हन्ति । एतानाचार्यानाचक्षते जनाः यथाहुः —

" आचिनोति हि शास्त्राणि आचारे स्थापयत्यपि ।
स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते । "

गान्धर्वविद्यायाः आश्रयस्थानं चोलमण्डलमिति प्रसिद्धिरासीत् । यत्रानेके पण्डिताः वेद–वेदाङ्गेषु च कृतभूरिपरिश्रमा आसन् । तेषु गौतमगोत्रजः द्वैत-मतानुयायी कश्चन पण्डितः कृष्णभट्ट इति नाम्ना प्रथितः कुम्भकोणक्षेत्रमुवास । यः स्ववैदुष्यप्रभावेण विजयनगरसाम्राज्ये आस्थानपण्डितपदं लेभे । तदा विजयनगरसाम्राज्यं सर्वतोमुखाभिवृध्या इन्द्रलोकमिव देदीप्यते स्म । कृष्ण-भट्टस्य कनकभट्ट इति पुत्रोऽजायत । तस्य सूनुः तिम्मणभट्टाख्यः कालेन जज्ञे । एतौ सदाचारेण, पाण्डित्येन, निष्ठया, विनयादिगुणैः च पितरमेवान्वसरताम् । अनेकैः कारणैरतीतेषु कतिपयवर्षेषु विजयनगरसाम्राज्यं शिथिली बभूव । स्वभावेन चञ्चला हि राज्यश्रीः ! ततः आश्रयाभावात् पण्डितः व्यषीदत् । तिम्मणभट्टः अनपत्यतया दूयमानमानसः स्वभार्यया गोपाम्बाख्यया सह

वेङ्कटाद्रिं जगाम । तत्र भगवन्तं श्रीनिवासं अनन्यभक्त्या असेवत । भगवदनुग्रहेण गुरुराजेति कंचित् पुत्रं काञ्चनपुत्रीं च अलभत । अचिरादेवान्यश्शिशुः संलग्नेऽजनि । वेङ्कटभट्टेति नाम्ना तमाह्वयामासुः । शुक्लपक्षचन्द्र इव प्रतिदिनमभिवर्धमानः बाल्य एव क्रीडास्वरतिः सतां पन्थानमन्वगात् ।

तिम्मणभट्टः गर्भाष्टमे पुत्रमुपनीय गुरुकुलं प्रैषीत् । स तत्र वेदान् शास्त्राणि चाधीयानः गहनतरानपि विषयान् लीलया व्याख्यायन् जनानामाश्चर्यं ततान । लोकमर्यादामनुसरन् सरस्वतीं नाम कन्यां पर्यणैषीत् । पित्रा साकं एकदा सभां प्रस्थितः श्रीसुधीन्द्रयतिवर्याणां नयनविषयो बभूव, येऽनन्तरं तमध्यापयामासुः । अध्ययनकाले गुरुभिरुदीरितानां विवरणानां संग्रहणेन परिमल–प्रबन्धं लोकोपकारायोपहारीकृतवान् । नातिचिरेण पुत्रं उपनीय तुरीयाश्रमं स्वीकर्तुमियेष । एतस्मिन्नन्तरे यात्रायै प्रस्थितान् स्वामिपादानन्वगच्छत् । मध्येमार्गं बहुसंख्यकान् वादिनः विजित्य "भट्टाचार्य" पदवीं प्राप । नारायणदीक्षितः पराजितोऽनेन स्वसमयानुसारं मध्वमतमङ्गीचकार । शा. श. १६२३ तमे रुधिरोद्गारि वत्सरे फा. शु. द्वितीयायां श्रीसुधीन्द्रैः 'श्रीराघवेन्द्रयति'रित्यभिधानेन अभिषिक्तः । ततस्तीर्थयात्रां प्रतस्थे । शिष्यानध्यापयन् पूजाविधानैर्भगवन्तमर्चयन् पम्पाक्षेत्रमुपागमत् । तत्र विरूपाक्षं सभाजयत् । ततः मधुरा—श्रीरङ्गम्—रामसेतु इत्यादि क्षेत्रेषु उपदेशभाषणैर्धर्मं प्रचारयन् रौप्यपीठं आजगाम । तत्र पूर्णबोधैः प्रतिष्ठितं श्रीकृष्णं विविधैः प्रकारैः पूजयामास । श्रीराघवेन्द्रस्वामिभिः अनुगृहीताः प्रबन्धाः चतुश्चत्वारिंशत् संख्याका इति प्रसिद्धिः । किन्तु तेषु केचन नोऽपलभ्यन्ते । १) परिमलम् २) चन्द्रिकाप्रकाशः ३) तत्वमञ्जरी ४) गीताविवृतिः ५) गीतार्थमञ्जरी ६) भावदीपिका [दश] १७) दशप्रकरणटिप्पणी २६) दशोपनिषदां खण्डार्थः २७) न्यायमुक्तावली २८) तन्त्रदीपिका २९) अणुभाष्यटीका ३०) ईशावास्यविवृतिः ३१) अथर्वविवृतिः ३२) भेदबोधिनी ३३) वादावलीटिप्पणी ३४) प्रातः संकल्पगद्यम् ३५) पुरुषसूक्तव्याख्या ३६) तर्कताण्डवटिप्पणी ३७) आम्भ्रणीसूक्तविवृतिः ३८) हिरण्यगर्भसूक्तव्याख्या ३९) रामकृष्णचरितमञ्जरी

४०) भावसंग्रहः ४१) [२–३] भट्टसंग्रहमीमांसा ४४) त्रिवेदभाष्यं च स्वामिपादाः काशी, गया, बदरी प्रभृतिषु क्षेत्रेषु तीर्थयात्रां धर्मप्रचारं च सम्मानयन्तः तत्र तत्र प्रतिवादिनः वादान्निरस्यन् तुङ्गभद्रातीरे मन्त्रालयक्षेत्र माजगाम ।

मन्त्रालयमधिवसन् शिष्यानध्यापयन् मूलरामं नित्यं अर्हयाञ्चक्रिरे । प्रियशिष्याय वेङ्कण्णाय तुरीयाश्रमं वितीर्य भक्तानामभयमनुगृह्णन् भगवन्नाम-स्मरणपूर्वकं बृन्दावनं प्रविश्य श्वासं निरुध्य महासमाधिमापेदिरे ।

" पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ "

अनेके भक्ताः इदानीमपि मन्त्रालये शताधिकैः स्तोत्रैः संस्तुवन् विविधैः प्रकारैश्च समर्चयन् स्वाभीष्टं प्राप्नुवन्तीति प्रस्तूयते । " यादृशी भावना यत्र सिद्धिर्भवति तादृशी " । एवं श्रीराघवेन्द्रः भक्तानामिष्टार्थान् प्रदास्यन् मन्त्रालये योगमहिम्ना राराजते ।

दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे ।
श्रीराघवेन्द्रगुरवे नमः कारुण्यसिन्धवे ।

व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पादलब्धाङ्कुरश्रीः
प्रश्नैरीषत्प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीशव्यासराजादुदित–किसलयः पुष्पितोऽयं जयीन्द्रात्
अद्य श्रीराघवेन्द्राद्विलसति फलितो मध्वसिद्धान्तशाखी ॥

वेङ्कटाद्रिं जगाम । तत्र भगवन्तं श्रीनिवासं अनन्यभक्त्या असेवत । भगवदनुग्रहेण गुरुराजेति कंचित् पुत्रं काञ्चनपुत्रीं च अलभत । अचिरादेवान्यश्शिशुः संलग्नेऽजनि । वेङ्कटभट्टेति नाम्ना तमाह्वयामासुः । शुक्लपक्षचन्द्र इव प्रतिदिनमभिवर्धमानः बाल्य एव क्रीडास्वरतिः सतां पन्थानमन्वगात् ।

तिम्मणभट्टः गर्भाष्टमे पुत्रमुपनीय गुरुकुलं प्रैषीत् । स तत्र वेदान् शास्त्राणि चाधीयानः गहनतरानपि विषयान् लीलया व्याख्यायन् जनानामाश्चर्यं ततान । लोकमर्यादामनुसरन् सरस्वतीं नाम कन्यां पर्यणैषीत् । पित्रा साकं एकदा सभां प्रस्थितः श्रीसुधीन्द्रयतिवर्याणां नयनविषयो बभूव, येऽनन्तरं तमध्यापयामासुः । अध्ययनकाले गुरुभिरुदीरितानां विवरणानां संग्रहणेन परिमलं–प्रबन्धं लोकोपकारायोपहारीकृतवान् । नातिचिरेण पुत्रं उपनीय तुरीयाश्रमं स्वीकर्तुमियेष । एतस्मिन्नन्तरे यात्रायै प्रस्थितान् स्वामिपादानन्वगच्छत् । मध्येमार्गं बहुसंख्यकान् वादिनः विजित्य "भट्टाचार्य" पदवीं प्राप । नारायणदीक्षितः पराजितोऽनेन स्वसमयानुसारं मध्वमतमङ्गीचकार । शा. श. १६२३ तमे रुधिरोद्गारि वत्सरे फा. शु. द्वितीयायां श्रीसुधीन्द्रैः 'श्रीराघवेन्द्रयति'रित्यभिधानेन अभिषिक्तः । ततस्तीर्थयात्रां प्रतस्थे । शिष्यानध्यापयन् पूजाविधानैर्भगवन्तमर्चयन् पम्पाक्षेत्रमुपागमत् । तत्र विरूपाक्षं सभाजयत् । ततः मधुरा—श्रीरङ्गम्—रामसेतु इत्यादि क्षेत्रेषु उपदेशभाषणैर्धर्मं प्रचारयन् रौप्यपीठं आजगाम । तत्र पूर्णबोधैः प्रतिष्ठितं श्रीकृष्णं विविधैः प्रकारैः पूजयामास । श्रीराघवेन्द्रस्वामिभिः अनुगृहीताः प्रबन्धाः चतुश्चत्वारिंशत् संख्याका इति प्रसिद्धिः । किन्तु तेषु केचन नोऽपलभ्यन्ते । १) परिमलम् २) चन्द्रिकाप्रकाशः ३) तत्वमञ्जरी ४) गीताविवृतिः ५) गीतार्थमञ्जरी ६) भावदीपिका [दश] १७) दशप्रकरणटिप्पणी २६) दशोपनिषदां खण्डार्थः २७) न्यायमुक्तावली २८) तन्त्रदीपिका २९) अणुभाष्यटीका ३०) ईशावास्यविवृतिः ३१) अथर्वविवृतिः ३२) भेदबोधिनी ३३) वादावलीटिप्पणी ३४) प्रातः संकल्पगद्यम् ३५) पुरुषसूक्तव्याख्या ३६) तर्कताण्डवटिप्पणी ३७) आम्भ्रणीसूक्तविवृतिः ३८) हिरण्यगर्भसूक्तव्याख्या ३९) रामकृष्णचरितमञ्जरी

४०) भावसंग्रहः ४१) [२–३] भट्टसंग्रहमीमांसा ४४) त्रिवेदभाष्यं च स्वामिपादाः काशी, गया, बदरी प्रभृतिषु क्षेत्रेषु तीर्थयात्रां धर्मप्रचारं च सम्मानयन्तः तत्र तत्र प्रतिवादिनः वादान्निरस्यन् तुङ्गभद्रातीरे मन्त्रालयक्षेत्र माजगाम ।

मन्त्रालयमधिवसन् शिष्यानध्यापयन् मूलरामं नित्यं अर्हयाञ्चक्रिरे । प्रियशिष्याय वेङ्कण्णाय तुरीयाश्रमं वितीर्य भक्तानामभयमनुगृह्णन् भगवन्नाम-स्मरणपूर्वकं बृन्दावनं प्रविश्य श्वासं निरुध्य महासमाधिमापेदिरे ।

" पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ "

अनेके भक्ताः इदानीमपि मन्त्रालये शताधिकैः स्तोत्रैः संस्तुवन् विविधैः प्रकारैश्च समर्चयन् स्वाभीष्टं प्राप्नुवन्तीति प्रस्तूयते । " यादृशी भावना यत्र सिद्धिर्भवति तादृशी " । एवं श्रीराघवेन्द्रः भक्तानामिष्टार्थान् प्रदास्यन् मन्त्रालये योगमहिम्ना राराजते ।

दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे ।
श्रीराघवेन्द्रगुरवे नमः कारुण्यसिन्धवे ।

व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पादलब्धाङ्कुरश्रीः
प्रश्नैरीषत्प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीशव्यासराजादुदित–किसलयः पुष्पितोऽयं जयीन्द्रात्
अद्य श्रीराघवेन्द्राद्विलसति फलितो मध्वसिद्धान्तशाखी ॥

स च्च रि त ता

(एम्. पि. चामराजय्य)

सचेतनेषु प्राणिषु मानवजातिः प्राधान्यमावहति। मानवः स्वजीवननिर्वृत्यै नितरां पराधीनोऽपि यैः प्राणिभिः तदितरैः जडपदार्थैश्च स्वजीवनं सदा निर्वर्तयति तानेव शासति, भोगाय उपयुङ्क्ते, रक्षति, परिवर्तयति, नाशयति च। आहाराय धान्यानि तथा सजीवान् प्राणिनश्च अपेक्षते अयं मानवः। व्यवसायादिकर्मसु पशून् यथामनीषं स्वार्थाय चालयति। तत्वतः विचार्यमाणे पश्वधीनोऽयं वराको मानवः। तथापि सचेतनान् अचेतनांश्च स्वार्थसिध्यै नियोजयन् मोमुद्यते। स्वभावेन अयं पराधीनतया जीवन् पशून् स्वभोगाय संचालयन् अवरान् स्वजातीयानेव स्वार्थसाधनाय व्यवसायादिवृत्तिषु युद्धेषु च प्रेरयति। तेषां परिश्रमेण त्यागेन च स्वार्थं साधयति। प्रसिद्धः खल्वयं नियमः, राजा, शासका वा अधिकारसूत्राणि गृह्णन्नास्ते, सेनापतिः सेनां चालयति, युद्धे सैनिकाः म्रियन्ते, राज्ञा युद्धे शत्रवः जिता इति अन्ते आघोषः श्रूयते। अनया रीत्या राजानः, श्रीमन्तः, पण्डिताः, ज्ञानिनः, संन्यासिनः, साधवश्च अनेकैः मिषैः स्वभोगाय इतरानुपयुञ्जते भुञ्जते च।

सत्येवं शास्त्रेषूपदिष्टं सर्वसाम्यं सर्वैः प्राणिभिस्सह अनुसर्तुं अवकाशः उपायाश्च वर्तन्ते। यद्यपि स्वार्थसाधने कामना, महती प्रेरणाशक्तिरस्ति। कामस्यासिद्धौ अथवा प्रतिबन्धकसमवधाने च क्रोधः आविर्भवति। प्राप्ताना-मर्थानां पुनः वियोगशंकया च बद्धमुष्टिना परिरक्षणं लोभः, येन मितव्ययः अन्यायेरतिः औदार्यराहित्यं च क्रमशः यथावसरं पदं दधति। ईदृश काम-क्रोध-लोभाभिभूतस्य मानवस्य सहृदयत्वं परदुःख निवारणेच्छा च क्वचित्

संभाव्यते, यत्रायं मानवः स्वचारित्र्यं परिशीलयेत्। चारित्र्यं नाम न कदापि एकस्मिन् अहनि निष्पाद्यं वस्तु अस्ति। किं पुनः वंशपरंपरागतानां सांप्रदायिकानां आचाराणां वलये नियन्त्रितम्। जन्मप्रभृति क्षणे-क्षणे व्यक्तेर्मस्तिष्के आपूर्यमाणानां देशविदेशीयानां भावनानां परिष्कृत रूपं सत् आर्थिक पारिश्रामिक राजकीयादि विषयज्ञानस्फूर्तिभिः अनुरञ्जितं—व्यक्तेः संस्काराणां जन्मान्तरीयाणां अभिव्यक्ति–भूमिश्च चारित्र्यमिति जगुः। अतश्च चारित्र्यं स्वजीवने सौन्दर्यं सर्वेषु व्यापारेषु, इतरेषामपि हितं च दधाति। मनसः शान्तिमुत्पादयति। परहितं अभिनन्दति, स्वहितं उपचाययति। न केवलं मनुष्येषु, प्राणिमात्रं प्रति दयामुत्पादयति। अन्ततः सर्वभूतहितेरतिं, जीवनस्य परमफलं आवेदयति। सर्वाणि शास्त्राणि चारित्र्यमेव विवृण्वन्ति यं धर्ममित्याचक्षते ज्ञानिनः। पवित्रं चारित्र्यं कल्मषाण्यपोहति। शत्रूनपि मित्राणि विधत्ते। काम–क्रोध–लोभानपि धर्माविरोधेन प्रेरयति। सर्वेषु विषयेषु स्व–परहितपरतां व्यवस्थापयति।

चारित्र्यस्य सर्वदुःखविलयरूपस्य मोक्षप्राप्तेः साधनत्वं सूरयः निजगदुः। सर्वाः उपासनाः, योगसाधनाभ्यासाश्च चारित्र्येण हीनस्य नोपकुर्वन्ति। सर्वे आश्रमधर्माः चारित्र्यमहावृक्षस्य शाखाभूताः वर्तन्ते। मानवः मानवत्वं चारित्र्यं विना नाधिगच्छति। पशूनां व्यापाराः स्वभावेन सीमिताः प्रचलन्ति। मनुष्याणां पराधीनतायाः दुर्वारत्वात् स्वार्थकामनायाः अव्याहतत्वाच्च मानवस्य प्रवृत्तेर्नियमने अन्यं शासनमपेक्षते। नियमरहित–जीवनमनुसरन्तः नीचाः, भ्रष्टाः, पातकिनः, समाजस्य कण्टकायन्ते। तैः शीलवतां शीलमपि विदीर्यते। शान्त्या वर्तमानानां शान्तिः भज्यते। एतादृशानां दमनाय खलु राज्यभारक्रमः पूर्वैः अङ्गयकारि। यत्र दण्डः शासने प्रजानां नित्यं प्रभवति। अल्पीयांसः खलु नीचाः दुर्मार्गानुयायिनश्च तेषां कृते महान् रक्षणाविभागः सर्वेषु राज्येषु प्रतिष्ठितमास्ते। अत्याशाग्रस्तैः असूयालुभिः प्रवर्तितेषु कलहेषु निरपराधिनोऽपि बलात् अनुयन्ति शासकवर्गस्य प्रभुशक्तेः अपर्यनुयोज्यत्वात्। यदि सर्वे चारित्र्यं रक्षयेयुः तदा दण्डाधिकारिणां अधिकारस्य विरामः संभवेत्। प्राञ्चः चारित्र्यं व्यक्तिसंस्करणफलं मेनिरे। अधुनातनरीतिस्तु राजकीयव्यवस्थानुसारेण

व्यक्तीनां सन्मार्गे प्रवर्तनमिति भिदा वर्तते यमाश्रित्य प्रजासाम्यवाद-सत्तावादादीनां उपसंहारः । नीतिनियमाः आरोग्यनियमाश्च चारित्र्यमेव पुष्यन्ति । राष्ट्रीयेषु अन्तरराष्ट्रीयेषु च व्यक्तेः चारित्र्यं अपरिहरणीयं सर्वेषां आदर्शभूतं च भविष्यति । किं बहुना ? चारित्र्येण विना मानवः पशूनामपेक्षया हैन्यं विन्देत् । तस्मात् चारित्र्यं स्वपरहितसाधकं चेति आघोषयन्ति सन्तः ।

चारित्र्यमधिकृत्य —

" चरणं पवित्रं विततं पुराणं येनपूतस्तरति दुष्कृतानि,
तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ।
लोकस्य द्वारं अर्चिमत्पवित्रं ज्योतिष्वभ्राजमानं महस्वत् अमृतस्य धारा,
बहुधा दोहमानं शरणन्नो लोके सुधितां दधातु ॥ "

" IF CHARACTER IS LOST EVERYTHING IS LOST."

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमः
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुः धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥

पा ञ्च रा त्रा ग मः

(वै. आर्. वासुदेव भट्टाचार्यः)

"जगत्सृष्टिस्थितिध्वंस महानन्दैक हेतवे ।
करामलकवद्विश्वं पश्यते विष्णवे नमः ॥

भारतभूम्यां उन्नतम ज्ञानं अधिजिगमिषुभिः वेदाः आगमाः तन्त्राणि च सुविशदमध्येतव्यानि अनुसन्धेयानि च भवन्ति । वेदाः पौरुषेया वा अपौरुषेया वा इति दार्शनिकेषु परस्परविरुद्धाभिप्रायाः अनादिकालात् विद्यन्ते । आगमानां विषये पुनः वक्ता श्रोता च कीर्तितौ दृश्येते — यथा पाञ्चरात्रागमः नारायणोपदिष्ट इति, शैवागमाः शिवेन भैरवेण उतान्यैर्वा उपदिष्टा इति जनाः विश्वसन्ति । तथैव शाक्तागमाश्च । विमर्शकास्तु आगमशाखां स्वतन्त्रां वेदेभ्यः विभिन्नामामनन्ति; यद्यपि वेद–प्रतिपादितार्थाः आगमेषु अनूदिताः लभेरन् । आगमानां वैशिष्ट्यं च अनितर–साधारणं सामान्येन क्रियायोगं अन्वेति । अयं क्रियायोगः आलयनिर्माणाय बिम्बप्रतिष्ठापने तस्य पूजादि कैंकर्यविभागान् आलम्बते । तत्कृते संबद्धाः विचाराः आगमेषु विपुलतरं प्रस्तूयन्ते । रामानुजपूर्णप्रज्ञौ कण्ठरवेण पाञ्चरात्रागमस्य प्रामाण्यमभ्युपगच्छताम् ।

आगमाः वैष्णवशैवशाक्त–भेदेन त्रिधा भिन्नाः विलसन्ति । अज्ञाः अभिज्ञाश्च देवतां समानतया आरिराधयिषन्ति । तेषां दिक् प्रदर्शका इमे आगमाः । वैष्णवानामागमाः पाञ्चरात्रवैखानस भेदेन द्विधा भिन्नाः । शैवागमाः वातुलागमाश्चेति शैवागमाः द्विधा भिन्नाः । शाक्तागमाः दक्षिणदेशे न प्रसिद्धाः । मूर्तिकल्पनं तस्यार्चनं उत्सवाचरणं अतीतानां महापुरुषाणां जन्मदिनं महता संभ्रमेण सम्माननं, बालानां इतरेषां च उत्साहाभिवृद्ध्यै तथा संस्कारोत्पाद-

नाय च देवालयगमनं तत्र प्रवर्तिष्यमाण नित्योत्सव–पक्षोत्सवादिषु अन्वयश्च प्रजानां जीवने आगमानां प्रभावमावेदयन्ति। अत एव भारतीय संस्कृतौ आगमानां भावनाः अनुस्यूताः विविच्य व्यवस्थापयितुं न शक्यन्ते। भक्तिः आगमानामुपदेशस्य फलभूता जनमनोभावनां आदत्ते। भक्तेः बाह्य प्रदर्शनमेव पूजाविधानम्। प्रजानां अभिरुचिमनुरुध्य आगमे देवालयादीनां निर्माणं, पूजोत्सवादीनां प्रकाराश्च निपुणतरं परिकल्पिताः।

आगमाः न केवलं देवपूजाविधानेन परिसमाप्यन्ते। प्राञ्चः कदापि एकदेशदर्शिनः नाभूवन्। मूर्तिपूजाविधानं स्वातन्त्र्येणैव फलं न ज्ञापयति। इष्टार्थसिद्धौ देवतावशीकरणमावश्यकं भवति। अर्घ्यपाद्यादिभिः पूजनमेको अंशः। उपासनमेव प्रधानम्। तच्च ध्यानरूपम्। ध्यानं पुनः तैलधारावद–विच्छिन्न स्मृतिसन्ततिरूपम्। तस्माद्देवतोपासनाय बहून् मन्त्रान् आगम–ग्रन्थेषु उद्धरन्। बीजाक्षर विन्यासैः मन्त्रसिध्यै आराधनाय च यन्त्राणि समुपवर्णयांचक्रिरे। यन्त्रं सुवर्ण रजत ताम्र भूर्जपत्रादिषु लिखितं–पूजितं कल्पोक्त प्रकारेण, मन्त्रसिद्धौ सहकारिकारणतां भजते। आलये अर्चकाः प्रतिष्ठापकाश्च आगमोक्तरीत्या मन्त्रजपं अनेकलक्षपरिमितं कुर्युः। न केवलं जपेन मन्त्रसिद्धिः हस्तापचेयस्स्यात्। जपसंख्यायाः दशांशो होमः, तस्य दशांशं तर्पणं तद्दशांशं ब्राह्मणभोजनमिति सांप्रदायिको नियमः अस्ति। अनेन प्रकारेण साङ्गोपाङ्गं मन्त्रजपेन सिद्धमन्त्रः परार्थे यजने–याजने च देवालये अर्हः भविष्यति।

मन्त्रसिध्या प्रभावितः अर्चकः स्वसन्निधानमात्रेण जनानाकर्षति। भूतग्रस्तानां भूतानुच्चाटयति। श्रद्धावतां मानसिकरोगान् निस्सारयति। तत्व-जिज्ञासुभ्यः आगमार्थान् विवेचयति। उत्तमाधिकारिभ्यः मन्त्रमुपदिशति च। अतएव पाञ्चरात्रे हठयोग, राजयोग, मन्त्रयोग, लययोगविषयाः तत्र तत्र विप्रकीर्णतया अनुवर्णिताः दृश्यन्ते। "आचार हीनं न पुनन्ति वेदाः" तथैव आगमाश्च, तस्मात् धर्मसूक्ष्मविषयाश्च तत्र तत्र व्याख्याताः। एवं च अर्चकः

अधीतवेदः आगमोक्त प्रकारेण निर्वर्तित मन्त्रजपः योगाङ्गेषु ध्यानधारणासु कृतभूरिपरिश्रमः, शान्तः, दान्तः, अनीश्वरान् गुणान् काम–क्रोधादीन् यथासमयं निग्रहे समर्थश्च स्यात्। इममर्थमनुसन्धाय "अर्चकस्तुहरिः साक्षादिति" अभियुक्ताः अर्चकं प्रशशंसुः।

अर्चकस्य च माहात्म्यात् पूज्यबिम्बस्य सौष्ठवात्।
पूजोपकरणाच्चैव त्रिभिः सान्निध्यमुच्यते॥

विष्णुतिलकसंहितायां पराशरसंहितायां च पराक्रान्तोऽयं विषयः विस्तारेण।

एवं अनेकक्रमैः संसिद्धानां वंशपारंपर्यागतो 'दीक्षित' इति सांप्रदायिको बहुमानः। इदानीं पुनः दीक्षितकुटुम्बानि इति प्रथा समस्ति, न तु मन्त्र-सिध्या अधिगतः योग्यतानिबन्धनो बहुमानः। सिद्धपुरुषैरधिष्ठितानि पवित्र-क्षेत्राणि पूर्वमासन्। तानि इदानीमपि विशेषेण जनानाकर्षयन्ति। ऐहिका–मुष्मिकविषयेषु तेषामाश्रयस्थलानीव विराजन्ते। अर्चकाः अस्मिन् विषये स्वगौरवं एतस्य ग्लानेश्च कारणानि कामं विमर्शनं परिशीलनं च विदधीरन् इति आशास्महे।

देवालयनिर्माणे तथा मूर्तिनिर्माणे च शिल्पकला अन्वेति। नयनमनोहरा-कारोपसर्पण पूर्वकं चित्रकला विभाति। नित्योत्सव–पक्षोत्सवेषु दैनन्दिन पूजासु गीतं नाट्यं च तत्तत्समयविशेषेण संबद्धम्। अनेन परिपूर्णरूपेण कलानां समावेशः तथैव योगाभ्यास क्रमांश्च देवालये अपरिहरणीयतया समन्वयुञ्जन्।

पाञ्चरात्रागमः पुराणेषु इतिहासेषु च बहुधा उपश्लोकितः। —

इदं महोपनिषदं चतुर्वेद समन्वितम्।
सांख्ययोगकृतान्तेन पाञ्चरात्रानुशब्दितम्॥ इति।

अनेन वेदेषु प्रतिपादिता विषयाः कर्मस्वरूपाभिवर्णनं विश्वस्वरूपनिरूपणं योगाभ्यासप्रकाराश्च संगृहीताः। सांख्ययोगपदेन तत्वचिन्तनप्रकाराः साधना–भ्यासविषयाश्चास्मिन्समाहिता इति वक्तुं युज्यते। अन्यत्रापि —

" पुराणं वेदवेदान्तं तथान्यस्सांख्य योगजम् ।
पञ्चप्रकारं विज्ञेयं यत्र रात्र्यायते द्विज ।
फलोत्कर्षवशेनैव पाञ्चरात्रमितीर्यते ॥ " इत्यादिभिः ।

पूर्वोक्त एवार्थः अनूदितः । रात्रिशब्देन ज्ञानमभिधीयते । पञ्चशब्दः पारिभाषिकदृष्ट्या अज्ञाननिवारकः, अत एव पाञ्चरात्रमित्यभिधा विहिता चिरन्तनैः, भगवच्छास्त्रमिति अस्यागमस्य अन्याऽभिख्या च वर्तते ।

अयमागमः पादचतुष्टयात्मकः । योग चर्या क्रिया साधनपाद भेदेन च विशिष्टः । तत्तत्पादेषु यथाक्रमेण निरूपिता विषयाः साधकानां दिग्दर्शनाय उपयुज्यन्ते । कर्णाटकदेशः भक्तैः योगिभिश्च अधिष्ठितः आसीत् । इदानीमपि शैवाः वैष्णवाश्च सामान्येन भक्तिमेवाश्रयन्ते । अत एव बहवः देवालयाः आद्यन्तमस्मिन्देशे सनातनाः अधुनातनाश्च विजृम्भन्ते । प्राञ्चः देवालयानां रक्षणाय दैनन्दिन पूजाः उत्सवादीनां कृते विस्तारेण भूमिमसमर्पयन् । इदानीं प्रजाराज्ये व्यवस्था रूपान्तरमभजत् । ततश्च मासिक वेतनं देवालयकर्मचारिभ्यः देवालयस्य विभावानुरोधेन दीयते । अनेके अर्चकादयः प्राचीनं गौरवं स्वीय–प्रमादेन अगाळिषुः । तेनेदानीं वृष्टमेघा इव समाजगौरवेण रहिताः केचन सीदन्ति । इमामवस्थां निविवारयिषया शासकाः अर्चकानां नियमेन आगमा–नामभ्यासं शशासुः । अनेन नियमेनानेके आगमानधीयानाः आसते । तथापि इतरविषयेषु अव्युत्पन्ना इव आगमविद्यार्थिनः वर्तन्ते ।

आयत्यां इतरसंस्कृतविद्यार्थिभिः साकमेतेषामपि प्राथमिक विद्याभ्यासे प्रवेशः, प्रौढपाठशालासु परिपूर्णतया सामान्यविद्याभ्यासं च संगमयेयुरिति आशास्महे । अन्ततः आगमविद्यार्थिनः विद्वत्परीक्षया समानतां व्युत्पत्तिं चाव–हेयुरिति बंहीयसी प्रत्याशा आगमिकानां मनोभावनासु आवर्तते ।

पाञ्चरात्रागमप्रबन्धाः प्रायशः पंचाशदुत्तरद्विशतसंख्याकाः स्युरिति विमर्शकैरगणिषन्त । परन्तु वयं केवलं त्रिंशत्संख्याकान् मुद्रितानुपलभामः ।

अद्यत्वे प्राचीनग्रन्थानां पुनर्मुद्रणव्यवसायः सर्वेषु विभागेषु प्रतिवर्षमभिवर्धते। आगमग्रन्थाणां मुद्रणन्तु क्वचिदेव श्रद्धालुभिः चिकीर्षितमिव प्रतिभाति। प्रथमं अयं विषयो अधिगन्तव्यो भवति। अस्मिन् यान्त्रिकयुगे कति वा आगम प्रबन्धाः लोकोपयोगिनः विषयानुपवर्णयन्ति ? केषु आगमेषु अन्यत्र-प्रसिद्धानां विषयाणां केवलमनुवादमात्रमुपलभ्यते ? कतिविषयाः लोकजीवनमनुवर्तन्ते ? कतिविषयाः दार्शनिक भावनासु उपयुज्यन्ते इत्यादि विषयान् सुविशदं अभिध्याय यदि नवीनाः प्रबन्धाः आगमतत्वानां विवरणार्थं विशदाध्यवसायाय च लेखनीयाः स्युः पण्डिताः लिखेयुः प्रकाशयेयुश्च। इदानीं केवलं श्रद्धया प्रवृत्तिः लोकस्य दिने दिने ह्रासमुपगच्छन्ती आस्ते। समीचीनविषय-परिज्ञानमन्तरा आगमसंप्रदायः न गौरवमृच्छेत्। न वा चिरं सम्माननं वा आप्नुयात् स्थास्येत वा।

पण्डितैः शासकवर्गेण च इयं समस्या सुविशदं अनुसन्धेया। वेदान्ताध्ययने साधनाभ्यासे च आगमानां उपकारः कियानिति अध्यवस्येयुः। केवलं गतवैभवस्मरणेन अथवा विद्यमानावस्थानिन्दया वा न कोऽपि पुरुषार्थः लप्स्यते। प्रत्युत हानिमापादयेत्। सर्वत्र "विमृश्य पक्ष-प्रतिपक्षाभ्यां अर्थावधारणं निर्णयः" इति नियमः आप्तैः उपदिष्टः तमनुसरेयुः। आगमानां तत्वमधिगच्छेयुः। अन्येभ्यः उपदिशेयुः। अवरेभ्योऽपि भगवतः उपासनामार्गं आगमोपज्ञं आदर्शयेयुः।

वर्तमानकाले आधुनिक विद्याभ्यासपद्धतिं विहाय मानवस्य नागरिक जीवनमशक्यम्। तस्मात् दीक्षाकुटुम्बिनः ये केवलं देवालयानेव सर्वस्वं संप्रधार्य एतावत्पर्यन्तं अहरहः परिवर्तमान प्रपञ्चव्यापारान् तिरश्चक्रुः ते इदानीं तादृशं औदासीन्यं विहाय वर्तमानस्थितिं अधिगच्छेयुः। लोकवृत्तं अनभिजानन्तः सामाजिक-राजकीयादि क्षेत्रेषु अवराः इति गण्यन्ते। अतः सर्वैरपि आधुनिक विद्याभ्यासः प्रौढशालावधि सर्वथा प्रथममधिगन्तव्यो भवति। अनन्तरं अस्मदीय संस्कृतेः परिरक्षणाय चिरन्तनैरादृतान् पथः आनुवंशिकेन

मार्गेण वा अन्यथा वा अधीयेरन् । जीवन सौकर्यार्थं अपरिहरणीयतया आपतितं यदि एते तिरस्कुर्युः आयत्यां स्वसन्ततिं अज्ञाने स्वयमेव निमज्जयेयुः ' कालधर्मः सर्वात्मना अनुसर्तव्यः । इदानीं सर्वे ऐक्यमिच्छन्ति । विभि संप्रदायानुयायिषु आहारविहारेषु ये भेदाः अवर्तन्त ते इदानीं मृग्याः बभूवुः कन्यादानप्रदानेषु च विभिन्नसांप्रदायिकाः ऐक्यं क्रमशः साधयन्तः दृश्यन्ते दीक्षाकुटुम्बिनः इमं विषयं तीव्रं विमृश्य तेषां संप्रदाय रक्षणाय गौरवस्य अभिवृध्यै शारीरिक–मानसिक शक्तीनां विकासाय यो मार्गः श्रेयान् ऋद्धिं आदधाति तमनुसरध्वम् । आयत्यां बान्धव्यनियमाः सन्ततेः उत्कर्षं लक्षीकृत्य निरूपणीया वर्तन्ते । अस्मिन्नर्थे मनुराह —

उत्तमैरुत्तमैरेव संबन्धानाचरेत् सह ।
कुलं निनीषुरुत्कर्षं अधमानधमांस्त्यजेत् ॥ इति ।

दीक्षाकुटुम्बिनः शालाध्ययनानन्तरं सर्वेषामागमानां अध्ययने तत्पराः भूयासुः । धर्मादायविभागेन (Muzarai Department) उचितं साहाय्यं आददीरन् । नियमेन आधुनिक विद्याभ्यासं अधीयेरन् । अर्हान् विद्यार्थिनः यथाधिकारं अन्यासु जीवनवृत्तिषु योजयेयुः । अर्चनावृत्तिं उपजीवनं इच्छन्तः प्राञ्च इव योग्यताभिवर्धनपूर्वकमेव यशः आर्जयेयुः । अप्रकाशितान् आगम–ग्रन्थान् सर्व प्रयत्नेन प्रकाशयेयुः समीकुर्युः । लोकेभ्यः एषां प्रयोजनं निवेद-येयुः । सर्वेषां इह–परसाधने परार्थयजनमहिमानं आवेदयेयुरिति आशास्महे ।

“ यस्मिन् चिरन्तनगिरामिह तत्परत्वं
तत्तत्प्रलम्भनविमूर्छितशोकहानम् ।
आयत्तमस्ति भववारिधिपोतपादो
रामानुजार्यमुनिरेष जयत्यजस्रम् ॥ ”

Sri Chamarajendra Samskrit College

BANGALORE 2.

THIS is one Samskrit College among existing seven Samskrit Colleges in Karnataka State. In this College eleven branches of learning are taught namely, Rigveda, Krishna-yajurveda, Suklayajurveda, Samaveda, Dwaita, Adwaita, Visishta-Dwaita, Shakti Visista-Dwaita, Jaina Siddhanta, Navina Nyaya, Alankara and Vyakarana.

In every branch from Primary to Vidwath Examination the classes are divided into thirteen years. Scholarships are given from One Rupee to Fifteen Rupees. There is Hostel accommadation for the deserving. Public are requested to avail themselves of this opportunity to learn this great and noble language which has been a unifying force of our Bharath Desha from time immemorial.

S. SHANKARAPPA, M.A.,B.T.
Sri Chamarajendra Samskrit College
Hardinge Road, Bangalore-2

WITH the growing sense of Nationalism and Internationalism, we have reshaped the system of administration through Democratic Institutions. In this modern age writing and talking are more important for every educated human being. At the same time one must be conversant with current events of his nation and the affairs of the world at large. Samskrit Pandits are lagging in this respect; hitherto they were somewhat indifferent regarding the dynamic aspect of human life. Consequently, Samskrit literature is confined to academic field, with all its richness and power of expression. If we [illegible] that Samskrit must survive as a language, current eve[illegible] must be expressed and interpreted fully as in other languages.

In this regard, this collection of essays is a humbl[illegible] attempt in order to focus the thought-flow of the seers and saints in chronological order, from Vedavyasa down to the Father of Nation. Samskrit is the sustainer of Indian culture and national asset. Readers are requested to follow these brief essays with a view of Indian culture and the dominating conceptions of higer values recorded in Samskrit Literature through ages.

—: Copies can be obtained from :—

THE PRINCIPAL,

Sri Chamarajendra Samskrit College,

Hardinge Road, Bangalore-2.

Printed by K. SEETHARAMA ALVA
at "SADHANA PRESS"
5th Main Road, Gandhi Nagar, Bangalore-9